

विक्रमाब्दः- 2074 खीस्ताब्दः-2017 ISSN NO. 2457-0729
प्रथमोऽङ्कः

# वाग्वै ब्रह्म

(सन्दर्भिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्रिका)

सृष्टौ या सर्गरूपा जगदवनविधौ पालिनी या च रौद्री,
संहारे चापि यस्या जगदिदमखिलं क्रीडनं या पराख्या।
पश्यन्ती मध्यमाऽथो तदनु भगवती वैखरीवर्णरूपा-
साऽस्मद्वाचं प्रसन्ना विधिहरिगिरिशाराधिताऽलङ्करोतु॥

व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
(मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम्)
क॰जे॰सोमैयासंस्कृतविद्यापीठम्,
विद्याविहार, मुम्बई - 77

**RNI No.** **MAHSAN/2017/73496**
**ISSN No.** **2457-0729**
**मुद्रकः** प्रो. प्रकाशचन्द्रः
**प्रकाशकः** प्रो. प्रकाशचन्द्रः
**स्वामिनः नाम** राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्याल ।:)
(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्र ।याधीनम्)
क. जे. सोमैया संस्कृतविद्यापीठम्,
विद्याविहारः (पूर्वः), मुम्बई, महाराष्ट्रम् - 400 077
**मुद्रणम्** वन्दना आर्टस्, बी-56, भूमितलम् स्टेशन ञाझा, स्टेशन रोड,
भाण्डुपम् (पश्चिमम्), मुम्बई - 400 07 , महाराष्ट्रम्, भारतम् ।
**प्रकाशनम्** राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्याल ।:)
(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्र ।याधीनम्)
क. जे. सोमैया संस्कृतविद्यापीठम्,
विद्याविहारः (पूर्वः), मुम्बई, महाराष्ट्रम् - 400 077
**अङ्कः** प्रथमः
**अनुवृत्तयः** 100
**प्रकाशनसमयः** दिसम्बर, 2017
**संपादक :** **प्रो. प्रकाशचन्द्रः**

**सम्पादकमण्डलम्**
**प्रो. प्रकाशचन्द्रः**, विभागाध्यक्षः, राष्ट्रियस
**प्रो. बोधकुमारझाः**, आचार्य्यः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
**श्रीसुभाषचन्द्रमीणा**, सहायकाचार्य्य, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
**डॉ. माधवदत्तपाण्डेयः**, संविदाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
**डॉ. नवीनकुमारमिश्रः**, संविदाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
**सुश्रीविदुषीबोल्ला**, शोधप्रज्ञा, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।

**पुनर्वीक्षकमण्डलम्**

- **प्रो. (श्रीमती) अर्चना दूबे,**
  श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरातम् ।
- **डॉ. दिलीपकुमारझाः,**
  कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयः,
  दरभंगा, बिहारः, ।
- **डॉ. अशोकचन्द्रगौडः,**
  राष्ट्रियसंस्कृतसंस्थानम्, गरलीपरिसरः, हिमाचलप्रदेशः ।
- **डॉ. प्रियव्रतमिश्रः,**
  श्रीरामसुन्दरविश्वविद्याप्रतिष्ठानम्,
  रमौली, दरभंगा, बिहारः ।

**मूल्याङ्कनकर्तृमण्डलम्**

- **प्रो. मदनमोहनझाः**, आचार्य्यः, शिक्षाशास्त्रविभागः,
  राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई, महाराष्ट्रम् ।
- **डॉ. देवदत्तसरोदे**, सहायकाचार्य्यः, शिक्षाशास्त्रविभागः,
  राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई, महाराष्ट्रम् ।
- **डॉ. रा. गा. मुरलीकृष्णः**, सहायकाचार्य्यः,
  राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली ।
- **डॉ. मधुकेश्वरभट्टः**, सहायकाचार्य्यः,
  राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली ।

Printed by Prof. Prakash Chandra, Published by Prof. Prakash Chandra on behalf of Rashtriya Sanskrit Sansthan (Deemed University), Under MHRD, Govt. of India, K. J. Somaiya Sanskrit Vidyapeetham, Vidyavihar (E), Mumbai, Mahrashtra – 400 077 and Printed at Vandana Arts B-56, Ground Floor, Station Plaza, Station Road, Bhandup (West), Mumbai – 400 078, Maharashtra, India and Published at Rashtriya Sanskrit Sansthan (Deemed University), Under MHRD, Govt. of India, K. J. Somaiya Sanskrit Vidyapeetham, Vidyavihar (E), Mumbai, Maharashtra – 400 077, Editor Prof. Prakash Chandra.

**प्रो. सुदेश कुमार शर्मा**
प्राचार्य,
**राष्ट्रिय संस्कृत संस्थान**
(मानित विश्वविद्यालय)
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
**क. जे. सोमैया संस्कृत विद्यापीठ,**
**विद्याविहार, मुम्बई - ४०००७७**

**Prof. Sudesh Kumar Sharma**
Principal
**RASHTRIYA SANSKRIT SANSTHAN**
Deemed to be University
(Under MHRD, Govt. of India)
**K. J. Somaiya Sanskrit Vidyapeeth**
**Vidyavihar, Mumbai – 400 077**

RSKS/Mum./2017-18/ Date – 22.12.2017

# शिवसङ्कल्पमस्तु

'महाभाष्यान्तं व्याकरणमि'ति शाब्दिकप्रेक्षावतां काचन धारणा । तयैव धारणया धीरधिषणेन विद्यापीठस्यास्य व्याकरणविभागेन दिवसद्वयव्यापिनीं राष्ट्रियसङ्गोष्ठीं समायोज्य तत्र कानिचन पाणिनीयसूत्राणि पातञ्जलमहाभाष्यात्मकेन मन्थानेन निर्मथ्य तदुत्थशब्दतत्त्वं कतिपयेषु शोधनिबन्धेषु समावेश्य 'वाग्वै ब्रह्म' इत्याख्यायां मूल्याङ्कितराष्ट्रियशोधपत्रिकायामुपनिबध्य प्राकाश्यमानीयत इति महान् सन्तोषस्य विषयः । विशेषतः शब्दशास्त्रसौरभलोलुपानां शाब्दिक-मधुपानां कृते कस्मैचिदुत्सवाय स्ववसरं कल्पते वृत्तमेतत् ।

पत्रिकैषा शाब्दिकेभ्यः शिवाय भूयात् । शोधार्थिभ्यश्च मङ्गलाय वर्तिषीष्ट । कृतश्रमेभ्यः सम्पादकेभ्यः, प्रदत्तशोधलेखेभ्यो लेखकेभ्यश्च यशो वर्धिषीष्टेति सदाशिवं परमेश्वरं प्रार्थये ।

**( प्रो. सुदेशकुमारशर्म्मा )**
**प्राचार्य्यः**

# सम्पादकीयम्

**कौमुदी यदि ह्यायाति वृथा भाष्ये परिश्रमः ।**
**कौमुदी यदि नायाति वृथा भाष्ये परिश्रमः ॥**

इत्यभ्युपगच्छतां शाब्दिकनव्यानां सम्मुखं व्याकरणमहाभाष्यस्य तृतीयं चतुर्थं पञ्चमञ्चाह्निकमुररीकृत्य राष्ट्रियायां शाधसङ्गोष्ठ्यां विमृश्य, संशोध्य चैकविंशतिसंख्याकेषु शोधनिबन्धेषु समवतार्य्य 'वाग्वै ब्रह्म' इत्यभिधेयया मूल्याङ्कितराष्ट्रियशोधपत्रिकया शब्दशास्त्रं समुपस्थापयतामस्माकं दृष्टिरियमेव ते पुनरेकवारं स्वात्मानमवलोकयन्त्विति । महाभाष्यं तावद् गभीरं रत्नाकरत्वं धत्ते यत्र भर्त्तृहरिकैयटदीक्षितनागेशादयो धीवराः स्वस्वसामर्थ्यानुगुणं रत्नानि बहूनि यद्यपि समुद्दध्रुः, तथापि वर्त्तत इदानीमपि महानवकाशः शोद्धुमिति नो द्रढीयान् विश्वासः।

अत्र सोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतीनामाचार्य्यप्रवराणामर्कनाथचौधरीवर्य्याणां शोधलेखः सौभाग्यादुपलब्धोऽपि प्रकाशित इति पत्रिकाया अस्या महते गौरवाय । अथ च सङ्गोष्ठ्यां समुपस्थापितशोधलेखानामाचार्य्याणां, शोधार्थिनां, व्याकरणशास्त्रारण्यविहरणनिपुणानां शाब्दिकानां शोधनिबन्धा अपि शब्दशास्त्रशेमुषीं समेधयितुं सामर्थ्यं दधतीति भावयामः ।

आशास्महे, शोधपत्रिकेयं महाभाष्यस्यानितरसाधारणमहत्त्वमद्यापि शतशः समुपलब्धेषु व्याख्यानग्रन्थेषु सत्स्वपि ख्यापयितुम्, गवेषणदुर्गममार्गगमनसामर्थ्यं निधापयितुम्, व्याकरण-शास्त्रीयपरिशीलनबुद्धिं विशदीकर्त्तुञ्च किमपि नूनमुपकुर्य्यादिति ।

**सम्पादकपक्षतः**

# अनुक्रमणिका


| क्र. सं. | विषयः | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1. | राष्ट्रियः, राष्ट्रीयो वा ? अथवा उभयम् ? | प्रो. अर्कनाथचौधरी | 01 |
| 2. | ‘वृद्धिरादैच्’ इतिसूत्रविमर्शः | प्रो. प्रकाशचन्द्रः | 04 |
| 3. | ‘क्क्ङिति चे’ ति सूत्रभाष्यविमर्शः | प्रो. बोधकुमारझाः | 13 |
| 4. | कृदन्तविमर्शः | डॉ. दयारामदासः | 24 |
| 5. | व्याकरणमहाभाष्यदृष्ट्या ‘वृद्धिरादैच्’ सूत्रविमर्शः | डॉ.अशोकचन्द्रगौडशास्त्री | 38 |
| 6. | महाभाष्यस्थः हलोऽनन्तराः संयोगः, इति सूत्रविचारः | प. सुभाषचन्द्रमीणा | 43 |
| 7. | प्रगृह्यसंज्ञासूत्रविमर्शः | डॉ. माधवदत्तपाण्डेयः | 46 |
| 8. | भाष्योक्तदिशा दाधा घ्वदाप्सूत्रविचारः | डॉ. नवीनकुमारमिश्रः | 56 |
| 9. | भाष्यानुसारी ‘वृद्धिरादैच्’ सूत्रविमर्शः | सुश्रीविदुषीबोल्ला | 65 |
| 10. | भाषाविज्ञानदृष्ट्या प्रयत्नविमर्शः | श्रीचेमटेसुरेशः | 74 |
| 11. | ‘इका गुणवृद्धी’ इत्यत्र इग्ग्रहणविचारः | श्रीमतीऋतम्भरापाण्डेयः | 88 |
| 12. | महाभाष्यदृशा ‘इको गुणवृद्धी’ सूत्रविमर्शः | श्रीसत्यराजरेग्मी | 95 |
| 13. | ‘तुल्यास्यप्रयत्नं सवर्णम्’ इत्यस्मिन् सूत्रे सावर्ण्यविचारः | आ. पद्मराजरेग्मी | 101 |
| 14. | महाभाष्ये शाबरभाष्ये च कृतः संज्ञाविचारः | श्रीधर अवधूतलोहोकरे | 106 |
| 15. | बाह्यप्रयत्नविवेकः | कु. मुग्धा चन्द्रकान्तदाते | 110 |
| 16. | महाभाष्यदृशा ‘इको गुणवृद्धी’इति सूत्रविमर्श | श्रीसर्वेशकुमारतिवारी | 113 |
| 17. | ‘न धातुलोप आर्धधातुके’ इति सूत्रभाष्यविमर्शः | सुश्रीबिन्दुहासिनीमिश्रः | 117 |
| 18. | ‘ईदूदेद्द्विवचनं प्रगृह्यम्’ इति सूत्रभाष्यविमर्शः | सुश्रीआशा छेडा | 119 |
| 19. | ‘ष्णान्ता षट्’ इति सूत्रभाष्यविमर्शः | श्रीश्यामकिशोरपाण्डेयः | 123 |
| 20. | ‘बहुगणवतुडति संख्या’ इति सूत्रभाष्यविमर्शः | श्रीचन्द्रमापौड्यालः | 126 |
| 21. | ‘निपात एकाजनाङ्’ इति सूत्रभाष्यविमर्शः | श्रीउमेशत्रिवेदी | 130 |

# राष्ट्रियः, राष्ट्रीयो वा ? अथवा उभयम् ?

✍प्रो. अर्कनाथचौधरी

**( संस्कृतशास्त्रं कल्पद्रुमायते । यथाकल्पनं फलमस्माल्लब्धुं शक्यते, शक्यते च पाणिनीयां पद्धतिमाश्रित्य कामपि शाब्दीं प्रतिमां निर्मातुमिति निबन्धः प्रमाणयन् किमपि नवीनां शोधपदवीं प्रतिष्ठापयति ।)**

राजते इति राष्ट्रम् । 'सर्वधातुभ्यः ष्ट्रन्' इत्यौणादिकष्ट्रन्प्रत्ययेन सिद्ध्यति । राष्ट्रम् देशः, विषयः, जनपदः, राष्टपालननियमादिकं, राजा च इत्याद्यर्थकम् अस्ति । अस्माच्छब्दात् राष्ट्रियम् राष्ट्रीयम् इति द्वौ शब्दौ व्युत्पाद्य प्रयुज्येते शास्त्रादिषु ।

राष्ट्रे अधिकृतः, राष्ट्रे जातः नाट्योक्तौ राजश्यालः (राजश्यालस्तु राष्ट्रियः इत्यमरकोशवचनं राष्ट्रिय इत्यर्थं प्रदर्शयति ।) राष्ट्राध्यक्षः, राष्ट्रसम्बन्धी च इत्येतान् अर्थान् राष्ट्रियराष्ट्रीयशब्दयोः प्रदर्शयन्ति कोशकाराः । महाभारते (12.18.12) दृश्यते राष्ट्रियप्रयोगः 'ततः सम्प्रेषयेद् राष्ट्रे राष्ट्रियाय च दर्शयेत्' इति । पुनः महाभारते (12.80.9) इत्यत्र राष्ट्रीय इत्यपि दृश्यते । यथा – 'धान्यं हिरण्यं भोगेन भोक्तुं राष्ट्रीयसङ्गतः' इति । सामान्यतः व्यवहारे सर्वत्र राष्ट्रीयशब्दः प्रयुक्तो दृश्यतेऽधुना । केवलं भारतसर्वकारस्थापितस्य संस्कृतसंस्थानस्य नाम्नि – 'राष्ट्रियसंस्कृतसंस्थानम्' इत्यत्र राष्ट्रिय इति दृश्यते ।

संस्कृतानभिज्ञः अभिज्ञश्चापि प्रायेण वदन्ति सन्दिहन्ति – कीदृशं संस्कृतसंस्थानमेतत् यत्र राष्ट्रियम् इति अशुद्धं लिखितं वर्तते, ध्यानाकर्षणेनापि न परिमार्जयन्ति अशुद्धिम् अधिकारिणः । अस्माभिः शास्त्रज्ञैरपि विचारणीयमत्र – किं राष्ट्रावारपाराद्घखौ (4.2.93) इति राष्ट्रशब्दविहित-घस्थानादेशेयादेशेन निष्पन्नः 'राष्ट्रियः' इति प्रयुज्यत, अथवा वृद्धाच्छः (4.2.114) इति वृद्धसंज्ञकात् राष्ट्रशब्दात् छप्रत्ययं विधाय तत्स्थाने कृतेन ईयादशेन निष्पन्न 'राष्ट्रीयः' इति वा प्रयुज्येत ?

तद्धितस्य शैषिकप्रकरणे शेषे (4.2.92) इत्यधिकारे उभयं सूत्रमस्ति । विप्रतिषेधे परं कार्यम् (1.4.2) इति सूत्रनिर्देशात् 'वृद्धाच्छः' इत्यस्य प्रवृत्तिर्भवितुमर्हति, तेन राष्ट्रीय इत्येव भवेत् । 'राष्ट्रावारपाराद्घखौ' राष्ट्रात् विशेषविहितघप्रत्ययकारणात् अपवादभूतोऽयं योगः 'वृद्धाच्छः' इति सूत्रं बाधेत, तेन राष्ट्रिय इत्येव प्रयोगो भवेत् इति मतभेदकारणात् आचार्य-किशोरीदासवाजपेयी इत्याख्येन विदुषा हिन्दीव्याकरणग्रन्थे निर्णीतं यद् राजश्याले एव राष्ट्रियः अन्यत्रार्थे राष्ट्रीयः इत्येव प्रयोगः करणीयः इति ।

अस्माभिः विचारणीयमेतत् यत् - शेषे (4.2.92) इति अधिकारसूत्रं विधिसूत्रञ्च दीक्षितेन स्वीकृतम् । तेन लिखितम् 'शेषे' इति लक्षणं चाधिकारश्च इति । 'तस्य विकार:' (4.3.134) सूत्रात् प्राग्दीव्यतीयात् प्राक् शेषाधिकारः ।

शेषशब्दार्थस्तावत् 'उक्तादन्यः शेषः' इति । इतः प्राक् साधारणतद्धितप्रत्ययाः अण्, ण्यः, अञ्, यञ्, अः, यत्, ईकक्, यञ्, मयट्, ढक्रूप्यादयः अपत्याधिकारे रक्ताद्यर्थप्रकरणे चातुरर्थिकप्रकरणे च तेषु तेषु अर्थेषु उक्ताः । अतः शेषे इत्यनेन अपत्यादिचतुरर्थ्यन्ताद् अन्योऽर्थः गृह्यते । तत्र तत्राथं अणादयः प्रत्यया भवन्ति । अतः चक्षुषा गृह्यते चाक्षुषम्, श्रवणाभ्यां गृह्यते इति श्रावणः शब्दः, उपनिषद्भिः प्रतिपादितः औपनिषदः पुरुषः, दृषदि पिष्टाः दार्षदाः सक्तवः, उलूखले क्षुण्णः औलूखलो यावः इत्यादिप्रयोगाः उक्तादन्येष्वर्थेषु भवन्ति ।

उत्तरसूत्रेषु स्वरितत्वबलात् 'तस्य विकारः' इत्यतः प्रागेवास्याधिकारः इत्युक्तम् । लक्षण-त्वाच्च उपर्युक्ताः शब्दाः ततोऽन्येऽपि आश्वः, चातुरं, चातुर्दशम् इत्यादयो निष्पाद्यन्ते ।

**अत्र भवति प्रश्नः -**

शेषे' इत्यस्य विधित्वाभावेऽपि 'चाक्षुषम्' इत्यादिरूपाणां सिद्धिः 'तस्येदम्' (4.3.120) इत्यणा भवितुमर्हति । 'दार्षदाः' इत्यादिप्रयोगाः अपि 'संस्कृतं भक्षाः' (4.2.96) इत्यत्र समावेशयितुं शक्याः सन्त्येव । अतः प्रयोगसिद्धिरूपप्रयोजनस्यौचित्यं न दृश्यतेऽस्य सूत्रस्य ।

अस्य सूत्रस्य अधिकारत्वेऽपि वक्तुं शक्यते यत् एतदपि अनावश्यकमेवास्ति । यद्युच्येत अपत्यादिचातुरर्थिकार्थपरित्यागाय अस्य अधिकारसूत्रत्वमस्ति तदा वक्तव्यं भवेत् यत् अस्मिन् प्रकरणे तत्र जातः (4.3.25) तत्र भवः (4.3.53) तत आगतः (4.3.74) प्रभवति (4.3.82) इत्याद्यर्थनिर्देशा एव अपत्यादिचातुरर्थिकान् नापेक्षन्ते इति ।

एतदतिरिक्तम् - आर्द्रका शाला इत्यादिवृद्धसंज्ञकानाम् 'उत्कारादिगणे' पाठेन ज्ञापितं भवति यत् अस्यात् प्राग्वर्तिषु अर्थेषु घादिप्रत्ययादीनां प्रवृत्तिः नेष्टा ।

इत्थं घादितः ट्युट्युलप्रत्ययं यावत् अपत्याद्यर्थनिवृत्तिः शेषे इत्यधिकारप्रयोजनं न स्वीकर्तुं योग्यमस्ति । जाताद्यर्थसमष्टिग्रहणमपि अधिकारप्रयोजनं न भवितुमर्हति, यतो हि 'तत्र जातः' (4.3.25) इत्यधिकारात् पूर्वस्य पाठसामर्थ्यात् तत्र यावदेव अस्याधिकारत्वं सूच्यते ।

यदि 'शेषे' इत्यधिकारः समीपवर्त्तिनि 'जात' इत्याद्यर्थे एवं घादिप्रत्ययादीनां निर्धारणाय चरितार्थः इति स्वीक्रियेत तदा वक्तव्यं भवेद् यत् - तस्मादनन्तरं 'तत्र भवः' (4.3.53) इति भवाद्यर्थेषु 'प्राग्दीव्यतोऽण्' (4.1.83) सूत्रप्रभाविताविधिपर्यन्तेषु अर्थेषु विधीयमानाः 'अण्' इत्यादयः एव भविष्यन्ति । इत्यापत्तिं निराकर्तुं 'तत्र जातः' इत्यधिकारात् परं 'प्रावृषष्ठप्'

(4.3.26) इत्यादिसूत्रैः साकं 'राष्ट्रावारपाराद्घखौ' (4.3.93) इत्यादिसूत्राणि पठ्येयरन्, किन्तु यथा न पठितानि ।

अतः 'शेषे' (4.2.92) इत्यधिकारसूत्रं व्यर्थं भवति । व्यर्थीभूय ज्ञापयति इदम् - 'एकस्मात् शैषिकप्रत्ययविधानात् परं द्वितीयः समानः शैषिकप्रत्ययो न विधीयते' इति ।

फलतः शालीयः इत्यादिषु सकृत् छप्रत्ययविधानात् परं पुनश्छप्रत्ययो न भवति । द्वितीयो विरूपप्रत्ययो भवितुमर्हत्येव । यथा शालेयः इति । अनेन सहैव अपत्याद्यर्थेषु घप्रत्ययादिनिवृत्तये अधिकारत्वमस्य सार्थकं भवति । किञ्चास्मिन्नधिकारे 'राष्ट्रावारपाराद्घखौ' इति राष्ट्रशब्दात् विशिष्य विहितः घः सामान्येन 'वृद्धाच्छः' इत्यनेन विहितस्य विरूपस्य छप्रत्ययस्य बाधको न स्यात्, तेन राष्ट्रियः इति राष्ट्रीयः इति च उभ रूपे साधुनी स्याताम् । केवलं कोशनिर्देशानुसारं प्रयोगव्यवस्था भवेदित्यपि ग्राह्यम् ।

**कुलपतिः**
**सोमनाथसंस्कृतविश्वविद्यालयः,**
**गुजरातम् ।**

★★★

# 'वृद्धिरादैच्' इतिसूत्रविमर्शः

✍प्रो. प्रकाशचन्द्रः

'वृद्धिरादैच्' इति सूत्रं पाणिनिव्याकरणस्य प्रथमं सूत्रम् । अस्य सत्रस्य व्याख्याने भाष्यकारेण वार्त्तिकमाध्यमेन विविधाः शोधात्मका विषया विचारिताः, यथा चकारस्य कुत्वाभावविचारः, तद्भावितातद्भावितग्रहणसमीक्षा, संज्ञासंज्ञिभावविमर्शः, इतरेतराश्रयदोषपरिहार-विचारः, प्रत्येकमादैचां वृद्धिसंज्ञाविचारः, तपरकरणविचारपूर्वकं गुणानां भेदकत्वाभेदकत्वादिविषय-विमर्श इत्यादयः प्रमुखा विषयाः सूत्रस्यानुशीलनाय प्रस्तुता भाष्यकारेण ।

**'वृद्धिरादैच्' इति सूत्रपदार्थः कुत्वाभावविचारश्च** । 'वृद्धिरादैच' इति द्विपदं सूत्रं 'वृद्धिः आदैच्' इति 'कृतमनयोः साधुत्वम्' इति अत्र सूत्रभाष्ये दर्शनात् । यद्वा अत्र पदत्रयं 'वृद्धि आत् ऐच्' इति पस्पशायां भाष्योक्तत्वात् 'न केवलानि चर्चापदानि व्याख्यानम् - वृद्धिः, आत्, ऐज् इति' पदविभागदर्शनात् । वृद्धिशब्दस्त्वावृत्त्या योज्यः अत्र पक्षे 'अनयोः' इति भाष्यं खण्डयोरित्यर्थकम्।[1] लघुशब्देन्दुशेखरेऽपि नागेशभट्टेन पदत्रयं निरूपितम् '' 'वृद्धिः आत् ऐच्' इति इदं पदत्रयमिति न सामासान्तादिप्रवृत्तिशङ्का''[2] । भाष्यकारः 'वृद्धिरादैच्' इति सूत्रस्थचकारस्य कुत्वमाशङ्क्य कथयति ''कुत्वं कस्मान्न भवति, चो कुः पदस्य इति''[3] अत्र कुत्वाप्राप्तिः कथं सम्भवतीति विषयं स्पष्टयन् निगदति प्रदीपकारः 'अनेकशक्तेः शब्दस्यशक्त्यवच्छेदेन संज्ञिनि विनियोगान्नित्यत्वाच्च सर्वसंज्ञानां लौकिकत्वादादैच्छब्दस्यानु-करणशब्दत्वाज्जातिशब्दत्वाद्वा शास्त्रप्राप्तिरस्तीति प्रश्नः'[4] शब्दार्थसम्बन्धस्य नित्यत्वात्सर्वसंज्ञानां नित्यत्वमतो लौकिकत्वाच्छास्त्रप्राप्तिरित्यन्वयः । लोकेऽर्थान्तरे प्रसिद्धानामपि संज्ञानां नित्यत्वमिति बोधयितुं सर्वशब्द' इति उद्योतकारः ।[5] हरदत्तमिश्रोऽस्मिन् विषये लिखति 'आदैच्छब्दा-त्समासत्वादर्थवत्त्वाद्वा विभक्त्युत्पत्तौ चो कुः (8/2/30) पदस्येति कुत्वं प्राप्तम् ।'[6] 'छन्दोवत्सूत्राणि भवन्तीति' भाष्येष्ट्या अयस्मयानि छन्दसि (1/4/20) इति सूत्रेण अत्र भत्वात् कुत्वं न भवति, परत्वात् भसंज्ञया पदसंज्ञा बाध्यत इति कुत्वाभावः । अस्मिन् प्रसङ्गे पुनः आक्षिपन् कथयति भाष्यकारः ''यदि भसंज्ञा 'वृद्धिरादैजदेङ्गुणः' इति जश्त्वमपि न प्राप्नोति''[7] संहितापाठे इति भावः । शङ्कां समादधानः स्पष्टयति भाष्यकारः 'उभयसंज्ञान्यपि छन्दसि दृश्यन्ते। तद्यथा 'स सुष्टुभा स ऋक्वता गणेन ।' पदत्वात्कुत्वम्, भत्वाज्जश्त्वं न भवति । एवमिहापि पदत्वाज्जशत्वम्, भत्वात्कुत्वं न भविष्यति ।''[8] वेदव्याकरणयोरङ्गाङ्गिभावत्वाद् व्याकरण-

सूत्राण्येव छन्दोवद् भवन्तीति नान्यानि सूत्राणि यथा कैयटो लिखति 'छन्दोवदिति । न वैशेषिकसूत्राणि, अपित्वङ्त्वाद्व्याकरणसूत्राण्येव'[9] अङ्गत्वादर्थात् 'पदपदार्थबोधनद्वारा वेदोप-कारकत्वादिति'[10] उद्योतकार: ।

**तदभावितातद्भावितग्रहणपक्षसमीक्षा ।** सूत्रेऽस्मिनादैज्ग्रहणं किं स्वरूपं स्वीक्रियते तद्भावितमतद्भावितं वेति समुपस्थिते प्रश्ने भाष्यकारेणोभौ पक्षौ समीक्ष्यादैज्मात्रस्य ग्रहणं स्वीकृत्य तद् भावितातद्भवितेति पक्षद्वयमपि सिद्धान्तितम् । भाष्यवचनमस्ति 'अस्तु तर्हि आदैज्मात्रस्य ग्रहणम् ।'[11] तत्र तद् भावितग्रहणमर्थात् तेन वृद्धिशब्देन भवितानां विहितानां ग्रहणमिति । वृद्धिशब्दस्यावृत्त्यायमर्थो लभ्यत इति भाव: । आदैज्मात्रस्येति स्वीकारे वृद्धिशब्दां नावर्तनीय इति भाव: ।[12] आदैज्मात्रस्यग्रहणमेव पाणिनिसम्मतं मतमिति प्रतिपादयन् कैयटमनुसृत्य नागेशभट्ट: निगदति आदैज्मात्रस्यग्रहणादेव 'मालादीनां च' इति सार्थकम् । अन्यथाऽस्यावृद्धत्वात् 'प्रस्थेऽवृद्धमकर्क्यादीनाम्' इत्येव सिद्धे किं तेन ।[13] मालाशब्दो 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' (1. 1.73) इति सूत्रेण वृद्धसंज्ञोऽस्ति, स च तद्भावितो नास्ति अत: आदैज्मात्रग्रहणपक्ष एव मालादीनां च इति सूत्रे संगच्छत इति भाव: ।

**संज्ञासंज्ञिभावविमर्श: ।** भाष्यकार: 'वृद्धिरादैच' इति सूत्रस्य संज्ञासूत्रत्वं साधयितुं तत्र संज्ञाधिकार: कर्तव्यो न वेति विषयं विमृश्य वृद्धिशब्द: संज्ञेति आदैच्च संज्ञीति कथं स्वीकर्तुं शक्यत इति वार्त्तिकमाध्यमेन विविधैर्विशिष्टविचारै: समीक्षितवान् । यथा वात्तिकमस्ति 'संज्ञाधिकार: संज्ञासंप्रत्ययार्थ:' अत्र भाष्यकार: वात्तिकाभिप्रायं लिखति 'अथ संज्ञा' इत्येवं प्रकृत्य वृद्ध्यादय: शब्दा: पठितव्या: । संज्ञासंप्रत्ययार्थ: । वृद्ध्यादीनां शब्दानां संज्ञा इत्येष सम्प्रत्ययो यथा स्यात् ।[14] अत्र प्रदीपकार: कथयति 'संज्ञाधिकार: इति वात्तिकम् । तस्य व्याख्यानम्, अथसंज्ञेत्येवमिति । अथशब्द: संज्ञाया: प्रस्तावद्योतनार्थ: । संज्ञाधिकारत्वेन वृद्ध्यादय: संज्ञात्वेन प्रतीयेरन्'[15] इति संज्ञाधिकारस्य प्रयोजनम् । तत्र संज्ञाधिकारस्य समर्थनेऽपरं वात्तिकमस्ति । 'इतरथा ह्यसंप्रत्ययो यथा लोके' अर्थात् अक्रियमाणे हि संज्ञाधिकारे वृद्ध्यादीनां संज्ञा इत्येष सम्प्रत्ययो न स्यात् । इदमिदानीं बहुसूत्रमनर्थकं स्यात् । अनर्थकमित्याह । कथम्? यथा लोके । लोके ह्यर्थवन्ति चानर्थकानि च वाक्यानि दृश्यन्ते ।[16] संज्ञाधिकारं विना 'यावच्चाप्तत्वमाचार्यस्य न साधितं तावदनर्थकत्वशङ्का झटिति समन्वयानवगमाद्वा'[17] बहूसूत्रमनर्थकं स्यादिति भाव: संज्ञासंज्ञ्यसंदेहश्च इत्यपि वात्तिकं प्रस्तुवन् भाष्यकार: कथयति क्रियमाणेऽपि संज्ञाधिकारे संज्ञासंज्ञिनोरसन्देहो वक्तव्य: । कुतो ह्येतत् । वृद्धिशब्द: संज्ञा आदैच: संज्ञिन: इति । न पुनरादैच: संज्ञा वृद्धिशब्दसंज्ञीति ।[18] वात्तिकद्वयमपि निराकुर्वन् सिद्धान्तवात्तिकद्वारा निर्दिशति

भाष्यकारः यत्तावदुच्यते संज्ञाधिकारः कर्तव्यः संज्ञासंप्रत्ययार्थः इति । न कर्तव्यः । 'आचार्याचारात्संज्ञासिद्धिः ।' आचार्याचारात्संज्ञासिद्धिर्भविष्यति । किमिदमाचार्याचारादिति । आचार्याणामुपचारात् ।[19] आचार्याणां व्यवहारादित्यर्थः[20] 'यथालौकिकवैदिकेषु' तद्यथा लौकिकेषु वैदिकेषु कृतान्तेषु । लोके तावन्मातापितरौ पुत्रस्य जातस्य संवृत्तेऽवकाशे नाम कुर्वाते देवदत्तो यज्ञदत्त इति । तयोरुपचारादन्येऽपि जानन्ति इयमस्य संज्ञेति वेदे याज्ञिकाः संज्ञा कुर्वन्ति स्फयो यूपश्चषाल इति । तत्र भवतामुपचारादन्येऽपि जानन्ति इयमस्य संज्ञेति । एवमिहापि । इहैव तावत्केचिद्व्याक्षाणा आहुः वृद्धिशब्दः संज्ञा, आदैचः संज्ञिन इति ।[21] अपरं वार्तिकं निराकुर्वन् निगदति यदप्युच्यते क्रियमाणेऽपि संज्ञाधिकारे संज्ञासंज्ञियोरसन्देहो वक्तव्यः इति । संज्ञासंज्ञ्यसंदेहश्च । संज्ञासंज्ञिनोश्चासन्देहः सिद्धः । कुतः? आचार्याचारादेव ।[22] प्रकारान्तरेण, संज्ञाधिकारं विना, वृद्धिशब्दः संज्ञा आदैचः संज्ञिनः कथं भवितुमर्हत इति विषये कथयति 'अनाकृतिः' अथवा अनाकृतिः संज्ञा, आकृतिमन्तः संज्ञिनः । लोकेऽपि, ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते । 'लिङ्गेन वा' अथवा किञ्चिल्लिङ्गमासज्य वक्ष्यामि इत्थं लिङ्गा संज्ञेति । वृद्धिशब्दे च तल्लिङ्गं करिष्यते नादैच्छब्दे ।[23] तत्र 'अनाकृतिः संज्ञा इत्येतत्तु न्यायसिद्धत्वान्न वक्तव्यम्, लिङ्गेन वा' इत्येतद्वक्तव्यम् इति, 'तच्चापि वक्तव्यम्' इति भाष्याशयः । तत्र संज्ञालिङ्गमनुबन्धादिषु करणेन इत्संज्ञा लोपश्च न वक्तव्यौ भवतः । अर्थात् ङकारादिष्वनुबन्धेषु कलादिकमासङ्क्ष्यते ततश्च तेषां संज्ञात्वे सति ङादात्मनेपदं स्वयं निवर्तत इतीत्संज्ञा लोपश्च न वक्तव्यौ भवत इत्यर्थः ।[24] संज्ञासंज्ञिभावज्ञानाय अयमुपायो भवितुमर्हति पाणिन्यसम्मतत्वादपाणिनीयत्वात् स्वीकर्तुं न शक्यते यथा भाष्यकारो निगदति 'सिध्यत्येवम् । अपाणिनीयं तु भवति ।'[25] अतोऽयमुपायो नाश्रयणीय इति भावः ।

'वृद्धिरादैच्' इति सूत्रद्वारा संज्ञासंज्ञिभावावगमार्थं शास्त्रज्ञानार्थञ्च भाष्यकारो विविधान् सम्भावितपक्षानुपस्थाप्य समीक्ष्य च सूत्रं नास्ति अनर्थकं, साधुत्वबोधकम्, प्रयोगनियमार्थम्, आदेशार्थम्, आगमार्थम्, विशेषणार्थञ्च न सम्भवति अपित्वस्ति संज्ञार्थमेवेति सप्रमाणं निर्दिष्टवान्। 'संज्ञाधिकारः संज्ञासम्प्रत्ययार्थ', 'इतरथा ह्यसम्प्रत्ययो यथा लोके' इति वार्त्तिकद्वयेन संज्ञाधिकारं विना सूत्रार्थक्यं शङ्कितमासीत् । तां शङ्कां निराकुर्वन् भाष्यकारः स्पष्टं ब्रूते । न यथा लोके तथा व्याकरणे । प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण । किमतो यदशक्यम् अतः संज्ञासंज्ञिनावेव ।[26] संज्ञाधिकारं विना सूत्रानर्थक्यं नैव शङ्क्यमिति भावः। सूत्रञ्चेदं संज्ञासंज्ञिभावबोधकं विद्यत इत्यभिप्रायः ।

सूत्रविषये अन्यान् संभावितपक्षान् प्रस्तुवन् निराकुर्वन् च भाष्यकारो विचारयति 'कुतो नु खल्वेतत् संज्ञासंज्ञिनावेव । न पुनः साध्वनुशासनेऽस्मिन् शास्त्रे साधुत्वमनेन क्रियते ।'[27] व्याकरणशास्त्रं साध्वनुशासनशास्त्रम्, 'वृद्धिरादैच्' इति सूत्रेण 'वृद्धिरादैच्' इति पदयोः साधुत्वं स्वीकर्तुं शक्यते[8] न वेति प्रश्ने भाष्यकारः समाधत्ते 'कृतमनयोः साधुत्वम् । कथम् । वृधिरस्मयविशेषेणोपदिष्टः प्रकृतिपाठे, तस्मात् क्तिन्प्रत्ययः । आदैचोऽक्षरसमाम्नाय उपदिष्टा'[28] 'वृद्धिरादैच्' इति पदयोः सूत्रेण साधुत्वं न क्रियत इति भावः ।

'प्रयोगनियमार्थं तर्हीदं' सूत्रं विद्यते 'वृद्धिशब्दात्परे आदैचः प्रयोक्तव्या इति' शङ्का निराकुर्वन् कथयति भाष्यकारः 'नेह प्रयोगनियम आरभ्यते ।'[29] 'प्रयुज्यमानस्य नियमो नारभ्यते, अपितु पदावयवस्य प्रकृतिप्रत्ययोपसर्जनागमादिरूपस्य । लोके च केवल एव वृद्धिशब्दः प्रयुज्यत इति न तस्यानेन नियमः क्रियत, लोके प्रयुक्तानां हीदमनुशासनम् ।'[30] अपि च 'यत्र सहप्रयोगप्रसङ्गस्तत्र नियमः कर्तव्यः, न च वृद्ध्यादैच्छब्दयोः सहप्रयोगप्रसङ्गः विनियोगात्प्राग-ससम्बन्धात् उत्तरकालं वृद्धिशब्देनैव गतत्वादिति नास्ति प्रयोगनियमार्थं सूत्रमिति'[31] हरदत्तः ।

आदेशार्थमपि सूत्रं भवितुमर्हति न वेति आक्षेपभाष्येण कथयति भाष्यकारः 'आदेशा-स्तर्हीमे स्यु' । वृद्धिशब्दस्यादैच आदेशाः ।[32] आदैचो वृद्धिशब्दस्यादेशा नैव भवितुमर्हन्तीति निर्दिशन् वदति भाष्यकारः 'षष्ठीनिर्दिष्टस्यादेशा' भवन्ति । न चात्र षष्ठीं पश्यामः ।[33] कैयटो भाष्याशयं स्पष्टयति 'षष्ठीनिर्दिष्टस्येति । स्थानशब्दोऽर्थवाची तिष्ठन्त्यस्मिञ्शब्दा इति स्थानम् । न च वृद्धिशब्दार्थमादैचो वक्तुं शक्ताः, तेनात्र षष्ठ्यर्थाभावादिति तात्पर्यम् ।[34]' तत्र पदमुञ्जरीकारस्यापि समीक्षणं भाष्यानुसारि वर्तते 'स्थान्यर्थाभिधानस्यैव ह्यादेशत्वम् । न च वृद्धिशब्द आदैचाम्, ते वा तस्यार्थमभिधातुं समर्थाः ।'[35] अतो 'वृद्धिरादैच्' इति सूत्रमादेशार्थमपि नास्तीति भावः । आगमार्थमपि सूत्रमिदं भवितुमर्हति न वेति सम्भावयन् भाष्यकारो निगदति । 'आगमास्तर्हीमे स्युर्वृद्धिशब्दस्यादैच आगमाः ।'[36] आदैचामागमत्वं निराकुर्वन् कथयति भाष्यकारः 'आगमा अपि षष्ठीनिर्दिष्टस्यैवोच्यन्ते लिङ्गेन च, न चात्र षष्ठीं, न खल्वप्यागमलिङ्गं पश्यामः।'[37] अत्र प्रदीपकारो विषयं स्पष्टयन् कथयति 'अत्राप्यर्थोऽपेक्ष्यते अनागमकानामर्थे सागमका इत्यर्थः'[38] 'यथा न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' इत्यादौ पञ्चम्याः षष्ठ्यर्थोऽवगम्यते ।'[39] 'देशविशेषप्रतिपत्तये टकारादिलिङ्गम् तत्र क्रियते'[40] अत्र षष्ठीनिर्देशा-भावात् टित्वादिलिङ्गाभावाच्च वृद्धिशब्द आगमार्थमपि नास्तीति भावः । सिद्धान्तपक्षं प्रस्तुवन्, वृद्धिरादैच् पदयोः विशेषणविशेष्यभावनिराकरणपूर्वकं तयोः संज्ञासंज्ञिभावपक्षं स्थापयति यथा कथयति भाष्यकारः इदं खल्वपि भूयः सामानाधिकरण्यमेकविभक्तित्वं च । द्वयोश्चैतद् भवति ।

कयोः विशेषणविशेष्योर्वा संज्ञासंज्ञिनोर्वा । तत्रैतत्स्यात् विशेषणविशेष्ये इति । तच्च न, द्वयोर्हि प्रतीतपदार्थकयोर्लोके विशेषणविशेष्यभावो भवति । न चादैच्छब्दः प्रतीतपदार्थकः । तस्मा-त्संज्ञासंज्ञिनावेव ।[41] वृद्धिरादैच्पदयोः एकसूत्रस्थित्वादस्ति तयोः समानाधिकरण्यमेकविभक्ति-त्वञ्च । सामान्याधिकरण्यमेकविभक्तिञ्च विशेषणविशेष्ययोर्भवति संज्ञासंज्ञिनोर्वा भवति । एतयोर्विशेषणविशेष्यत्वं तु नैव युज्यते यतो हि द्वयोः प्रतीतपदार्थकयोर्लोके विशेषणविशष्यभावो भवति । 'न ह्यस्ति सम्भवो वृद्धिशब्दश्चासावादैच्छब्दश्चेति । न च वर्धनक्रियाऽऽदैजिति । एवं विशेषणे च प्रयोजनमपि नास्ति ।'[42] न चादैकच्छब्दः प्रतीतपदार्थकः, न ह्यस्य कश्चिल्लौकि-कोऽर्थः प्रसिद्ध इत्यर्थः ।[43] तस्मात्संज्ञासंज्ञिनावेव, 'वृद्धिरादैच्' इति सूत्रं संज्ञार्थमिति भावः । तत्र सन्देहो भवति कः संज्ञो का संज्ञेति प्रश्ने भाष्यकारः समाधानत्रयं प्रस्तुतिपूर्वकं लघ्वर्थं हि संज्ञाकरणमिति सिद्धान्तं प्रतिपादितवान्, अपि च पूर्वोच्चारितः संज्ञो परोच्चरिता संज्ञेति तत्त्वं प्रकाशितवान् । सतो हि कार्यिणः कार्येण भवितव्यम् । तद्यथा इतरत्रापि सतो हि मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते ।'[44]

'वृद्धिरादैच्' सूत्रे च पूर्वोच्चाारिता संज्ञा परोच्चारितः संज्ञी इति कथमिति प्रश्ने माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते । अन्यत्र 'सर्वत्रैव हि व्याकरणे पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा 'अदेङ्गुणः' इति यथा ।'[45] दोषवान्खल्वपि संज्ञाधिकारः अष्टमेऽपि संज्ञा क्रियते - 'तस्य परमाम्रेडितम् इति । तत्रापीदमनुवर्त्त्यं स्यात् ।'[46] अर्थात् संज्ञासंज्ञीभावस्य लोकवेदशास्त्रसिद्धत्वाद् दोषयुक्तत्वाच्च संज्ञाधिकारो नैव विधेय इति भाष्याशयः ।

**इतरेतराश्रयदोषनिराकरणम् ।** 'वृद्धिरादैच्' इति सूत्रे इतरेतराश्रयरूपदोषमुद्भाव्य शब्दस्य नित्यत्वाद् दोषो निराकृतो भाष्यकारेण । यथा वार्त्तिकमाध्यमेन कथयति भाष्यकारः । सतो वृद्ध्यादिषु संज्ञाभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः । अर्थात् 'सतामादैचां संज्ञया भवितव्यम्, संज्ञया चादैचो भाव्यन्ते । तदेतद इतरेतराश्रयं भवति । इतरेतराश्रयाणि च प्रकल्पन्ते । तद्यथा नौर्नाविबद्धा नेतरत्राणाय भवति।'[47] दोषं निराकुर्वन् वार्त्तिकं प्रस्तुवन् भाष्यकारो ब्रूते 'सिद्ध तु नित्यशब्दत्वात् ।' सिद्धमेतत्। कथम् नित्यशब्दत्वात् । नित्याः शब्दाः नित्येषु शब्देषु सतामादैचां संज्ञा क्रियते, न च संज्ञयाऽऽदैचो भाव्यन्ते ।[48] अत इतरेतराश्रयदोषो न सम्भवतीति भावः । शब्दस्य नित्यत्वाच्छास्त्रा- नर्थक्यमाशङ्क्य कथयति भाष्यकारः । 'यदि तर्हि नित्याः शब्दाः किमर्थं शास्त्रम् ।' शङ्कायाः समाधानं विद्यते । किमर्थं शास्त्रमिति चेन्निवर्तकत्वात्सिद्धम् । निवर्तकं शास्त्रम् । कथम् । 'मृजिरस्मायविशेषेणोपदिष्टः । तस्य सर्वत्र मृजिबुद्धिः प्रसक्ता ।

तत्रानेन निवृत्तिः क्रियते । मृजेरक्ङित्सु प्रत्ययेषु मृजिप्रसङ्गे मार्जिः साधुर्भवतीति ।'[49] तदेव शब्दस्यनित्यत्वादितरेतराश्रय- रूपदोषो न क्वापि शास्त्रे विद्यत इत्यभिप्रायः । वृद्धिगुणसंज्ञे आदैचाम् अदेङाञ्च प्रत्येकं वर्णानां भवतः समुदायस्य वेति विषयं वार्त्तिकमाध्यमेन समीक्ष्यं संज्ञाद्वयमपि प्रत्येकं वर्णस्य भवतो न समुदायस्य इति सप्रमाणं निर्दिष्टवान् भाष्यकारः । तत्र वार्त्तिकमस्ति 'प्रत्यवयवं च वाक्यपरि- समाप्तेः' वार्त्तिकं स्पष्टयन् कथयति भाष्यकारः प्रत्यवयवञ्च वाक्यपरिसमाप्तिर्दश्यते । न चोच्यन्ते प्रत्येकमिति । प्रत्येकं च भुजिः परिसमाप्यते । सत्येतस्मिन्दृष्टान्ते यदि तत्र सहग्रहणं क्रियते, इहापि प्रत्यकमिति वक्तव्यम् । अथ तत्रान्तरेण सहग्रहणं सहभूतानां कार्यं भवति, इहापि नार्थः प्रत्येकमिति वचनेन ।[50] अन्यत्र सहवचनात्समुदाये संज्ञाऽप्रसङ्गः अर्थात् अन्यत्र सहवचना- त्समुदाये वृद्धिगुणसंज्ञयोरप्रसङ्गः । यत्रेच्छति सहभूतानां कार्यं करोति तत्र सहग्रहणम् । तद्यथा 'सह सुपा' 'उभे अभ्यस्तं सह' इति ।[51] अस्मिन् विषये पदमञ्जरीकारो निगदति । अतो यत्नाभावात्प्रत्येकमेव संज्ञा । किञ्च लौकिकप्रयोगे व्यवस्थितामादैचां संज्ञया भवितव्यम्, न च समुदायस्य क्वचित्प्रयोगः, अतोऽसम्भवादपि प्रत्येकमेव संज्ञा । लिङ्गाच्च । किं लिङ्गम्? प्रस्थेऽवृद्धमकर्क्यादीनाम् (6.2.87) मालादीनां च (6.2.88) इह हि 'मालाप्रस्थः' इत्यादाव- वृद्धमिति पर्युदासे वचनम्, अतः प्रत्येकमेव संज्ञा[52] न समुदायस्येति भावः ।

सूत्रे आकारस्य तपरकरणं किमर्थमिति प्रश्नं विचारयन् कथयति भाष्यकारः । अथ किमर्थमाकारस्तपरः क्रियते?[53] प्रश्नाशयं स्पष्टयति प्रदीपकारः 'अथ किमर्थमिति । किमाकृतिपक्षे भिन्नकालनिवृत्त्यर्थम् अथवा व्यक्तिपक्षे गुणान्तरयुक्तानां ग्रहणार्थमिति प्रश्नः ।'[54] 'आकारस्य तपरकरणं सवर्णार्थम्' इति वार्त्तिकद्वारा समाधत्ते भाष्यकारः तपरकरणं क्रियते । किं प्रयोजनम् । सवर्णार्थम् । 'तपरस्तत्कालस्य' इति तत्कालानां सवर्णानां ग्रहणं यथा स्यात् । केषाम्? उदात्तानुदात्तस्वरितानाम् ।[55] अस्मिन् प्रसङ्गे गुणानां भेदकत्वाभेदकत्वपक्षद्वयमपि लौकिकदृष्टान्त- द्वारा विविच्य गुणानामभेदकत्वपक्षः सूत्रप्रमाणेन सिद्धान्तत्वेन स्वीकृतो भाष्यकारेण । यथा भाष्यमस्ति 'उभयमिदं गुणेषूक्तम् - भेदका अभेदका इति । किं पुनरत्र न्याय्यम् । कुत एतत्? 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इति उदात्तग्रहणं करोति । यदि च भेदका गुणाः स्युः उदात्त- मेवोच्चारयेत् ।'[56] तपरकरणस्य प्रयोजनान्तरं निर्दिशन् कथयति भाष्यकारः 'इदं तर्हि प्रयोजनम् आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा वा मा भूवन्निति । खट्वा इन्द्रः खट्वेन्द्रः खट्वा उदकं खट्वोदकम्, खट्वा ईषा खट्वेषा, खट्वा ऊढा खट्वोढा, खट्वा एलका खट्वैलका, खट्वा ओदनः खट्वौदन, खट्वा ऐतिकायनः खट्वैतिकायनः, खट्वा औपगवः

खट्वौपगवः इति ।'[57] त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति तपरपदे तः परो यस्मात्सोऽयं तपर इति विग्रहेन साकं तादपि परस्तपर इति विग्रहोऽपि भाष्यकारेण निर्दिष्टः तेन वृद्धिगुणसंज्ञकसूत्रद्वयस्थिताः सर्वेऽपि वर्णाः तपरा भवन्ति येन त्रिमात्रचतुर्मात्राणां स्थानिनां द्विमात्रा एव आदेशा भवन्ति न तु त्रिमात्राश्चतुर्मात्रा वेति भावः । यथा भाष्यवचनमस्ति। अथ क्रियमाणेऽपि तकारे कस्मादेव त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवन्ति। तपरस्तत्कालस्येति नियमात् । ननु तःपरो यस्मात्सोऽयं तपरः । नेत्याह तादपि परस्तपरः ।[58]

काशिकाकारः भाष्यसम्मतं सूत्रार्थं निर्दिशन् निगदति 'वृद्धिशब्दः संज्ञात्वेन विधीयते प्रत्यकमादैचां वर्णानां सामान्येन तद्भावितानामतद्भावितानां च । तपरकरणमैजर्थं तादपि परस्तपर इति । खट्वैडकादिषु त्रिमात्रचतुर्मात्रप्रसङ्गनिवृत्तये ।'[59]

तदेव पाणिनिव्याकरणस्य 'वृद्धिरादैच्' इति प्रथमं सूत्रं छन्दोवत्सूत्राणि भवन्तीति सिद्धान्तप्रतिपादकम्, तद्भावितातद्भावितोभयपक्षनिदर्शकम्, सूत्रानर्थक्यनिषेधकम्, शब्दसाधुत्वानुशासनबोधकम्, प्रयोगनियमनियामकम्, आदेशागमस्वरूपप्रतिपादकम्, विशेषणविशेष्यभावस्वरूपबोधकम्, व्याकरणे संज्ञासंज्ञिभावस्वरूपनिर्णायकम्, लघ्वर्थं हि संज्ञाकरणमिति सिद्धान्तद्योतकम्, मङ्गलार्थप्रबोधकम्, शब्दनित्यत्वसिद्धान्तप्रतिपादनद्वारा व्याकरणशास्त्रे इतरेतराश्रयदोषनिवारकम्, शास्त्रं निवर्तकमिति सिद्धान्तप्रतिपादकम्, प्रत्येकमादैचां वर्णानां संज्ञात्वनिर्णायकम्, गुणानामभेदकत्वसिद्धान्तप्रतिष्ठापकम्, 'तपरस्तत्कालस्य' इति सूत्रस्य व्यवस्थापकम्, सूत्रकारस्य सूत्राणाञ्च प्रामाण्यपोषकमिति बहुविधशोधविषयसमन्वितं सद्व्याकरणशास्त्रस्य प्रवर्तकं प्रस्तावकञ्च सूत्रं वर्तत इति भाष्यानुशीलनेन सप्रमाणं वक्तुं युज्यत इति शम् ।

**सन्दर्भाः**

1. महाभाष्योद्योतः ।
2. लघुशब्देन्दुशेखरः, संज्ञाप्रकरणम् ।
3. महाभाष्यम् 1.1.1 ।
4. तत्रैव प्रदीपः ।
5. तत्रैवोद्योतः ।
6. पदमञ्जरी 1.1.1 ।
7. महाभाष्यम् 1.1.1 ।
8. तदेव ।

9. तत्रैव प्रदीपः ।
10. तत्रैवोद्योतः ।
11. महाभाष्यम् 1.1.1 ।
12. महाभाष्यप्रदीपरत्नप्रकाशः 1.1.1 ।
13. महाभाष्योद्योतः 1.1.1 ।
14. महाभाष्यम् 1.1.1 ।
15. तत्रैव प्रदीपः ।
16. महाभाष्यम् 1.1.1 ।
17. तत्रैव प्रदीपः ।
18. महाभाष्यम् 1.1.1 ।
19. तदेव ।
20. तत्रैव प्रदीपः
21. महाभाष्यम् 1.1.1 ।
22. तदेव ।
23. तदेव ।
24. तत्रैव प्रदीपः ।
25. महाभाष्यम् 1.1.1 ।
26. तदेव ।
27. तदेव ।
28. तदेव ।
29. तदेव ।
30. तत्रैव प्रदीपः ।
31. पदमञ्जरी 1.1.1 ।
32. महाभाष्यम् 1.1.1 ।
33. तदेव ।
34. तत्रैव प्रदीपः ।
35. पदमञ्जरी 1.1.1 ।
36. महाभाष्यम् 1.1.1 ।

37. तदेव ।
38. तत्रैव प्रदीपः ।
39. पदमञ्जरी 1.1.1 ।
40. महाभाष्यप्रदीपः 1.1.1 ।
41. महाभाष्यम् 1.1.1 ।
42. पदमञ्जरी 1.1.1 ।
43. महाभाष्यप्रदीपः 1.1.1 ।
44. महाभाष्यम् 1.1.1 ।
45. तदेव ।
46. तदेव ।
47. तदेव ।
48. तदेव ।
49. तदेव ।
50. तदेव ।
51. तदेव ।
52. पदमञ्जरी 1.1.1 ।
53. महाभाष्यम् 1.1.1 ।
54. तत्रैव प्रदीपः ।
55. महाभाष्यम् 1.1.1 ।
56. तदेव ।
57. तदेव ।
58. तदेव ।
59. काशिका 1.1.1 ।

**आचार्यः ( व्याकरणविभागः )**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैयासंस्कृतविद्यापीठम्**
**विद्याविहारः, मुम्बई ।**

★★★

# 'क्क्ङति चे' ति सूत्रभाष्यविमर्शः

प्रो.बोधकुमारझाः

**('क्क्ङति चे'ति सूत्रभाष्यविमर्शः' इति शीर्षकमाश्रित्य निबद्धोऽयं निबन्धः निमित्तसप्तमी - सत्सप्तमी - परसप्तमीति पक्षे सूत्रार्थं विमृश्य सूत्रस्य ककारद्वयघटितत्वेन लेखनं समर्थ्य पर्य्युदासप्रसज्यप्रतिषेधपक्षे चैकवाक्यतास्वरूपमुपपाद्य युक्तिप्रमाणाभ्यां निमित्तसप्तमीं पुरस्कृत्य सूत्रार्थस्य पदकृत्यं प्रदर्श्य भाष्यव्याख्यातांशं सारल्येन प्रतिपाद्य 'अथवाकल्पे बीजम्', 'प्रकृतभाष्येण विशेषोपलब्धिः', 'भाष्यानुपपत्ति-परिहारः', 'पाठभेदेन भाष्याशयविमर्शः', 'उद्द्योतकारस्यायुक्तत्वमि' त्यादिशीर्षकेण कञ्चन विशिष्टं शोधप्रकारं विदुषां मोदाय, गवेषकाणां पथिप्रदर्शनाय, छात्रेभ्यो हिताय, शास्त्रस्य च विकासाय पुरस्कुरुते इति मे मतिः ॥)**

सूत्रार्थस्तावद् ग् च क् च ङ् च इति क्क्ङः, ते इतो यस्य स क्क्ङित्, तस्मिन् क्क्ङति । द्वन्द्वगर्भो बहुव्रीहिः । चेति समुच्चयार्थकमव्ययम् । 'इको गुणवृद्धी' त्यत[1] 'इक' इति, 'गुणवृद्धी' इति, 'न धातुलोप आर्धधातुके'[2] इत्यतश्च 'न' इत्यनुवर्त्तते ˙ तत्र 'क्क्ङति' इत्यत्र या सप्तमी सा निमित्तसप्तमी, परसप्तमी, सत्सप्तमी वेति पक्षत्रैविध्यसम्भावनया क्रमशो गित्किन्ङिन्निमित्ते गुणवृद्धी न स्तः, गित्किन्ङित्प्रत्यये परे इग्लक्षणे गुणवृद्धो न स्तः, अपि च गित्किन्ङित्प्रत्यये सति इग्लक्षणे गुणवृद्धी न स्त इति त्रिविधः सूत्रार्थः सम्भाव्यते ।

**सत्सप्तमी, निमित्तसप्तमी च ।** निमित्तात्सप्तमी निमित्तसप्तमी । 'पञ्चमी भयेन' इति 'पञ्चमी' इति योगविभागात् समासः । सा पुनः सप्तमी 'यस्य च भावेन भावलक्षणम्'[4] इत्यनेन वेदितव्या । सा च ज्ञापकत्वार्थिका । ज्ञापकत्वं च सम्बन्धं विनाऽनुपपन्नं सत् विधिशास्त्रक्लृप्त-निमित्तत्वमादाय पर्यवस्यति । एवञ्च निमित्तत्वेन क्क्ङित्ज्ञाप्ये गुणवृद्धी नेत्यर्थः । कौस्तुभकृतस्तु[5] क्रियान्तराश्रयणात् औत्सर्गिकसत्ताक्षेपः । ततश्च क्क्ङति सति प्राप्ते ये गुणवृद्धी इति सम्बन्धे कृते सिद्धसाध्यसमभिव्याहारन्यायेनोपलक्षणीभूतसत्ताश्रयणस्य निमित्तत्वमुत्सर्गतः फलति, न त्विह

विशिष्य निमित्ततायां सप्तमीविधानमस्तीत्याहुः । तथाहि सत्सप्तमी एवात्र निमित्तसप्तमीत्वेन बोध्या, न तु पार्थक्येन ।

**क्क्ङतीत्यस्य विशष्यविशेषणभावविचारः -**

इह क्ङितीत्येतद् गुणवद्धीभ्यां सम्बध्यते येन व्यवहितस्यापि 'छिन्नं भिन्नमि'त्यादौ प्रतिषेधो लभ्यते । न चात्र निर्दिष्टपरिभाषा सम्भवति, विध्यङ्गभूतानां परिभाषाणां साक्षाद्विधेय-निषेध्यक्रियान्वयिन्येव प्रवृत्तेः। इदन्तु क्रियान्वयिनो विशेषणम्, न तु क्रियायाः । अतोऽत्र न परिभाषाप्रवृत्तिः । ननु क्क्ङत्येतत् प्रधानान्वयस्य सम्भवतस्त्यागायोगादिति चेत्? न, यत्र हि गुणः कृतात्मसंस्कारः प्रधानोपकाराय महते प्रभवति तत्रात्मनोऽपि संस्कारमनुभूय प्रधानेन सम्बध्यते । उक्तञ्च[6]

**गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते ।**
**प्रधानस्योपकारे हि तथा भूयसि वर्त्तते ॥ इति ॥**

इह गुणवृद्ध्योः क्क्ङद्ग्रहणेन विशेषितयोः प्रधानस्य महानुपकारो भवति व्यवहितस्यापि प्रतिषेधसिद्धेः । क्नोः कित्करणञ्चात्र ज्ञापकम् । अन्यथा प्रधानेनैवान्वये निर्दिष्टपरिभाषाया-श्चोपस्थितौ सत्यां व्यवहिते निषेधस्याप्रवृत्तौ व्यर्थमेव 'त्रसिगृधिधृषिक्षिपेः क्नु'[7] इत्यत्र कित्त्वं स्यात् ।

**गकारग्रहणविचारः -**

प्रकृते सूत्रे काशिकाकृतोक्तम् - गकारोऽप्यत्र चर्त्त्वभूतो निर्दिश्यते । 'ग्लाजिस्थश्च ग्स्नुः' (3.2.139) । जिष्णुः । भूष्णुः इति । अत्र चर्त्त्वेन गकारोऽपि प्रश्लिष्यत इत्याशयः । किति त्वस्मिन् 'स्थास्नु'रित्यत्र 'घुमास्था.'[8] इतीत्वं प्रसज्येत । न च स्नोर्गित्त्वे भूष्णुरित्यत्रेण्निषेधो न स्यात् 'ग्लाजिस्थश्चे'ति चकाराद्भुवश्च ग्स्न्भर्वतीति स्वीकारा- दिति वाच्यम्, श्र्युकः क्किति'[9] इत्यत्रापि चर्त्त्वेन गकारं प्रश्लिष्य गित्कितोरिण्न् स्यादिति व्याख्यानात् । न चैवं चर्त्त्वस्यासिद्धतया श्र्युकः' इत्यत्र विसर्जनीयो न लभ्यत इति 'दृशि च' इत्युत्वमेव स्यादिति वाच्यम्, सौत्रत्वात्, 'न मुने'[10] इत्यत्र नेति योगविभागेनासिद्धत्वाभावाद्वेष्टसिद्धेः । वामनस्तु 'ग्लाजिस्थश्च' इत्यत्र 'स्था आ' इत्याकारं प्रश्लिष्य क्स्नुप्रत्ययान्तस्य तिष्ठतेराकार एव न त्वीत्वमिति व्याख्यानादेव स्थास्नोः सिद्धौ न क्वापि गकारप्रश्लेषः कार्य्य इत्याह । नन्वेतेन तन्मते 'दंशच्छन्दस्युपसंख्यानम्' इति कात्यायनवचनेन क्स्नौ । 'दंक्ष्णवः पशवः' इत्यत्र 'अनदिताम्.'[11] इति नलोपः स्यात् । सत्यम्, छान्दसत्वात् समाधेयः । अत्रेदं विमृश्यते - यदि गकारः चर्त्त्वेर्न प्रश्लिष्यते तर्हि ककारद्वयघटितेन सूत्रेण भाव्यम् । न प्रश्लिष्यते चेद् एकककारघटितेन । उभयमुपलभ्यते । अस्यां स्थितौ सूत्रेऽस्मिन् अस्माभिः कथं भाव्यमिति प्रश्नः । परमत्र

निष्कर्षलाभाय पूर्वं महाभाष्यमालोडनीयम् । जयादित्यदीक्षितयोः गकारप्रश्लेषः योऽभिमतः, स भाष्यकाराभिमतो न वेति । तत्र यदि प्रकृतसूत्रभाष्यमुत्पश्यामः तर्हि तत्रत्यं भाष्यं प्रश्नेऽस्मिन् मौनमेवावलम्बते । गकारग्रहणाग्रहणविचारः तत्रास्त्येव नहि परमस्य प्रश्नस्य समाधानं भाष्ये नास्तीति मनो न मन्यते । तस्मादग्रिमं भाष्यमालोडयामश्चेत् 'ग्लाजिस्थश्चे' ति सूत्रे 'गुणाभावस्त्रिषु स्मार्यः' इति वार्त्तिकं व्याचक्षाणो भाष्यकारः स्पष्टं ब्रूते - 'गुणाभावस्त्रिषु स्मर्त्तव्यः ।' गिति किति ङिति चेति। तद्गकारग्रहणं कर्त्तव्यम् ? न कर्त्तव्यम् । क्रियते न्यास एव। ककारे गकारश्चत्त्वभूतो निर्दिश्यते - 'क्क्ङिति चेति' इति । एतेन भाष्येण गकारप्रश्ले-षोऽस्तीति प्रमीति सूत्रं लेखनीयम्, तथोच्चारणीयञ्च । यत्तु एकककारघटितमेव सूत्रमिदम्, लक्ष्यानुरोधात् व्याख्यानाद् गकारलाभ इति वदन्ति, तन्न, स्पष्टप्रतिपत्तये ककारद्वयस्यैवोचिततत्वात्, भाष्यकृता गकारन्यासस्य स्वीकृतत्वाच्च । संहितापाठे 'न धातुलोपआर्धधातुकेक्क्ङिति चे' त्यत्र द्विककारको निर्देशः 'अनचि चे' ति द्वित्वेनोपपन्नः, असंहितापाठे च तदसम्भवादेकककारेण भाव्यमिति बीजम् एकककरोप- लब्धाविति गृहाण । परमस्याज्ञानप्रसूतत्वादश्रद्धेयत्वमेव ।

**नञः पर्युदासे प्रसज्यप्रतिषेधे चैकवाक्यताविचारः -**

'क्क्ङिति चे'त्यत्रानुवृत्तस्य नञे भेदार्थकत्वेन 'क्क्ङिति ने' त्यस्य विधावुपस्थितौ क्क्ङितः स्वप्रतियोगिकत्वसम्बन्धेन भेदे, तस्य च स्वरूपसम्बन्धेन सार्वधातुकार्धधातुकरित्यर्थः । तथा च परस्परनिरूप्यनिरूपकभावान्नविषयताप्रयोजकपदघटितत्वात् निषेध्यशास्त्रेण पदैकवाक्यत्वम्। तत्र क्क्ङिति नेति प्रकारताप्रयोजकं पदम्, सार्वधातुकार्धधातुकयोरिति तन्निरूपितविशेष्यताप्रयोजकं पदम् बोध्यम् । ननु 'घटे न द्रव्ये' इत्यादिवाक्याद् घटभिन्ने द्रव्ये इत्यर्थाप्रतीतेः असमस्तनञा भेदबोधने प्रथमान्तप्रतियोग्यनुयोगिवाचकपदसमभिव्याहारस्य कारणताया वक्तव्यतया प्रकृते प्रति-योग्यनुयोगिवाचकपदयास्सप्तम्यन्तत्वेन भेदबोधकत्वं नञो न सम्भवतीति चेत् ? उच्यते - क्क्ङन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः इति पृथगेव वाक्यार्थबोधः । तथाहि निषेधशास्त्रस्य निषेध्यशास्त्रीयपदधर्मिकार्थविशेषविषयकबोधजनकत्वप्रकारकतात्पर्य्यग्राहकत्वात् उपजीव्योपजीवक-भावापन्नबोधप्रयोजकत्वात् प्रसज्यप्रतिषेधपक्षे वाक्यैकवाक्यता बोध्या । यद्यपि अत्र वाक्यार्थद्वये गौरवम्, तथापि पर्युदासस्योक्तयुक्त्याऽसम्भवदुक्तिकत्वेनागत्या गौरवं स्वीकार्य्यम् ।

**परसप्तमीति** । असति बाधके सर्वासां सप्तमीनामौपश्लेषिकाधिकरणबोधकत्वमिति नियमात् 'क्क्ङिति' चेति सूत्रसप्तमी अपि औपश्लेषिकाधिकरणबोधिका । अतः औपश्लेषिकाधिकरणबोधकसप्तम्यन्तपदघटिते शास्त्रे 'निर्दिष्टे' 'पूर्वस्य' इत्युपतिष्ठते - इत्यर्थके 'तस्मिन्नति' सूत्रेणैकवाक्यतया गित्कित्ङित्प्रत्ययाव्यवहितस्य पूर्वत्वविशिष्टस्येकः स्थाने गुणवृद्धी

नेति तदर्थः । 'अनुवादे परिभाषा नोपतिष्ठते' इति त्विको गुणवृद्धी, अचश्चेतिसूत्रद्वयविषयमेवेति । एवञ्च सम्भवन्त्यां परसप्तम्यां 'यस्य च' - इति सप्तम्या असम्भवः, उपपदविभक्तेरिति न्यायात्।

कतरः पक्षः श्रेयान्? क्क्ङतीति यदीयं परसप्तमी स्यादनन्तरस्यैवेकः प्रतिषेधः स्यात् चितः चितवानित्यादौ । 'भिन्नो भिन्नवानि'त्यादौ न स्यात् । किञ्च अतिशयेन पुनः पुनर्वा रौति इति विग्रहे रूधातोर्यङि प्रत्यये, लुकि 'रोरवीती'ति प्रयोगे, अथ च कविरिवाचरति - इति विग्रहे कविशब्दात् क्विप्प्रत्यये 'कवयती'ति प्रयोगे प्रत्ययलक्षणेन यङ्क्विब्बुद्ध्या तदव्यवहितस्य पूर्वत्वविशिष्टस्येको गुणनिषेधः स्याद्यतः प्रयोगासिद्धिप्रसङ्गः । अतः उक्तं कात्यायनेन - 'क्क्ङति प्रतिषेधे तन्निमित्तग्रहणम्' इति[12] निमित्तसप्तम्यां त्वस्यां सर्वत्रं भवितव्यम्, व्यवहितयोरपि निमित्तनिमित्तिभावसद्भावात् ।

ननु 'क्क्ङति चे'ति सूत्रे परसप्तम्याश्रयणेऽपि 'रोरवीती'त्यत्रान्तरङ्गप्रतिषेधदृष्ट्या (बहिवर्त्तिनं तिपमाश्रित्य जायमानस्य सार्वधातुकगुणस्य बहिरङ्गत्वम्, अन्तर्वर्त्तिनं यङो ङितमाश्रित्य जायमानस्य निषेधस्य अन्तरङ्गत्वम्) बहिरङ्गगुणस्यासिद्धत्वेन बाधायोगात् तन्नि-मित्तग्रहणं न कार्य्यम्, एवं 'कवयती'त्यत्रापि आचारक्विब्निमित्तकगुणनिषेधो नेति । न च परसप्तम्याश्रयणे 'भिन्नमि'त्यत्र दकारेण व्यवधानाद् गुणनिषधो न स्यादिति वाच्यम्, क्नोः कित्त्वसामर्थ्येनैकवर्णव्यवधानेऽपि निषेधप्रवृत्तिस्वीकारात् । न चैवं 'भवत' इत्यादौ अकारव्यव-धानेऽपि गुणनिषेधः स्यात्, निषेधस्य बहिरङ्गतया असिद्धत्वन्तु न, 'निषेधाश्च बलीयांस' इत्यनेन तद्बाधात् - इति वाच्यम्, वर्णपदेन हल्वर्णस्य ग्रहणेनादोषात् । न च 'अक्षैष्टाम्' इत्यत्र सकारेण व्यवधानद् वृद्धिनिषेधः स्यादिति वाच्यम्, धात्ववयवहल्वर्णस्य ज्ञापकसाजात्यात्तत्र ग्रहणादिति चेन्न, 'गुते'त्यत्र डानिमित्तकगुणनिषेधाऽनापत्त्या धात्वावयवेत्यादिसङ्कोचासम्भवेन 'भवत' इत्यादौ गुणनिषेधापत्तेः परसप्तम्याश्रयणस्य अशक्यत्वात् ।

ननु 'क्क्ङती'ति परसप्तम्येव, क्नोः कित्त्वसामर्थ्येन गुणवृद्धिनिमित्तप्रत्ययभिन्न-हल्व्यवधानं सह्यते, तेन 'अक्षैष्टाम्' इत्यत्र वृद्धिनिमित्तहल्व्यवधानान्न वृद्धिनिषेधः । अत एव निमित्तसप्तमीवादिनो मतेऽपि वृद्धिनिषेधो न, अन्यथा 'तां' रूपङिन्निमित्तकत्वेन वृद्धेर्निषेधो दुर्वार एव स्यात् । 'गुते'त्यत्र गुणनिमित्तभिन्नतकाररूपहल्व्यवधानाद् गुणनिषेधश्च सिद्धः । न च 'गुणवृद्धिनिमित्तकप्रत्ययेतरहल्वर्णव्यवधानं सह्यते' इति कल्पना तावन्न युक्ता यतो निमित्तता नाम कारणता । सा च द्विविधा । फलोपधायकतारूपा, स्वरूपयोग्यतारूपा च । तत्राद्यायाम् अक्षैष्टामित्यत्र निषेधप्रवृत्तिकाले निमित्ततायाः सिचि अभावेन वृद्धिनिमित्तकप्रत्ययेतरस्य सिचा व्यवधानेऽपि निषेधप्रवृत्त्या दोषतादवस्थ्यात् । द्वितीयायाम् 'गुता' इत्यत्र दोषः स्यात्, तत्र

स्वरूपयोग्यतारूपकारणतायाः सत्त्वादतो नैतादृशी कल्पना कर्त्तुं शक्यते इति वाच्यम्, ज्ञापक-साजात्येन यन्निमित्तं कित्त्वं ङित्त्वं वाऽऽश्रित्य गुणनिषेधश्चिकीर्षितः, तदनधिकरणीभूतप्रत्ययेतर-वर्णव्यवधानं सह्यत इति कल्पनान्तरे दोषाभावात् ।

तदेवं निमित्तसप्तमीपरसप्तम्योः द्वयोरेव पक्षयोः निर्दुष्टत्वात् कतरः पक्षः आश्रयणीय इति परिप्रश्ने बोध्यमिदम् - वार्त्तिककारमतेनात्र क्क्ङिती'त्यत्र निमित्तसप्तमी । तदुक्तम् - 'क्क्ङिति प्रतिषेधे तन्निमित्तग्रहणमि'ति । भाष्यकृता च वार्त्तिककृत्प्रदर्शितस्य निमित्तग्रहणप्रयोजनस्य अन्यथा सिद्धिः प्रदर्शिता, यतः परसप्तम्यभिमता भाष्यकृत इति समक्षमायाति । काशिकाकौमुदीकृतौ च वार्त्तिकानुरोधेन निमित्तसप्तमीमाश्रित्य 'क्क्ङिति चे'ति व्याख्यातवन्तौ । अस्यां स्थितौ मन्मतेनापि निमित्तसप्तम्येवोचिता । यतो निषेध्यत्वेन गुणवृद्ध्योः प्रधानतया तयोरेव विशेषणं क्क्ङद्ग्रहणम्। तदा परसप्तम्या अप्रसङ्ग एव । न हि विहितयोर्निषेधः, अपि त्वनभिनिर्वृत्तयोरेवेति तस्मिन्नितिपरिभाषानुपस्थानान्निमित्तसप्तम्येव 'क्क्ङिति' इति कैयटोक्तेः । अनभिनिर्वृत्ते पूर्वपर-व्यवहारस्य कर्त्तुमशक्यत्वात्, निवृत्तनिषेधे तु देवदत्तहन्तृहतन्यायेन चितमित्यादाविकः श्रवणं न स्यात् । भवनक्रियातदभावयोरमूर्त्तत्वेन क्क्ङत्परत्वासम्भवाच्च । अत एव क्क्ङन्निमित्ते ये गुणवृद्धी प्राप्नुतः इति भाष्यं सङ्गच्छते । 'इक' इत्यास्याद्याप्यनुवृत्त्यनुक्तेः । अनुवृत्तावपि तस्य शब्दपरत्वात् । अन्यथा इक इत्यस्यापि तत्र लेखौचित्येन भाष्यासङ्गतिः स्पष्टैव । न चैतत्स्वीकारे भाष्यकृतः प्रयोजनप्रत्याख्यानस्य नैरर्थक्यमिति शङ्क्यम्, तस्य भाष्यस्य निमित्तग्रहणाभावेऽपि कथञ्चित् दोषाभावप्रदर्शनेन सार्थक्यात् । निमित्तसप्तमीस्वीकारादेव प्रदीपकृतः 'क्क्ङद्ग्रहणं गुणवृद्धिविशेषणम्' इति, उद्योतकृतश्च 'क्क्ङितीत्येतत् गुणवृद्धिविशेषणमेवे'ति चैतयोः संवादित्व-लाभः, काशिकाकौमुदीकृतोश्च निमित्तसप्तमीपरकव्याख्यानस्य चोपपत्तिः । अथ च 'कार्य्यम-नुभवन् हि कार्य्यी निमित्ततया नाश्रीयते'[13] इति परिभाषायाः 'नन्वध्येता शयितेत्यादाविङ्-शीङोर्ङित्त्वात् क्क्ङिति चेति गुणः निषेधः स्यादि'ति नागेशावतरणस्य सङ्गतिः, निमित्तपदेन षष्ठ्यन्तसप्तम्यन्तपञ्चम्यन्तपदप्रयोज्यविषयताश्रयमात्रस्य ग्रहणेन प्रकृतिरूपङित्पर्य्याप्तषष्ठ्यन्तपदप्र-योज्याऽङ्गत्वावच्छिन्ननिमित्ततामादाय गुणनिषेधस्य सम्भवात् निमित्तपदेन कारणमात्रस्याभिधानात् ।

सूत्रव्यावृत्तिः - तथाहि इक इति शब्दमुच्चार्य विहिते गुणवृद्धी गितं कितं ङितञ्च निमित्तयाऽऽश्रित्य ये प्राप्नुतस्ते न स्त इति सूत्रस्य भाष्यकृदभिमतः अर्थः । तत्र गित् - जिष्णुः, 'ग्लाजिस्थश्च ग्स्नुः'[13] कित् - चितम्, स्तुतम्, मृष्टम् । ङित् - चिनुतः, सुनुतः, मृष्टात् । निमित्तसप्तम्याश्रयणं किम्? व्यवहितेऽपि यथा स्यात् - छिन्नं, भिन्नम् । इक इति किम्? कामयते । अत्र 'कमेर्णिङ्' ।[14] 'अत उपधायाः'[15] इति वृद्धेः प्रतिषेधो न । शब्दव्यापाराश्रयणं

किम्? लैगवायनः । ओर्गुणो हीक एक प्रवर्त्तते न तत्रेक्पदोपस्थितिः, ओरितिनिर्दिष्टस्थानिकत्वात्। भाष्य प्रकृतसूत्रे गितः उदाहरणं नोपन्यस्तम्।

प्रकृतसूत्रे भाष्यव्याख्यानसारांश – अत्र 1. तन्निमित्तग्रहणप्रयोजनमुक्त्वा तत्खण्डनं कृतम्, 2. इग्लक्षणयोः गुणवृद्ध्योः निषेधं मन्यमानो 'लैगवायनः कामयते' इत्यत्र वृद्धिनिषेधाभावः साधितः, 3. 'अचिनवम्' 'असुनवम्' इत्यादौ स्थानिवद्भावेन प्राप्तं लङो ङित्त्वं मत्वा तत्परकस्य ङित्कार्यस्य यासुटो ङिद्वचनेन निराकरणञ्चेति त्रिविधो विचार उपलभ्यते ।

1. भाष्यकृता तन्निमित्तग्रहणप्रयोजनत्वेन दश प्रयोगा उपन्यस्ताः, पश्चाच्च तत्खण्डनमपि विहितम् । तद्यथा –

| **प्रयोगः** | **प्रयोजनम्** | **खण्डनप्रकारः** |
|---|---|---|
| उपधार्थम् – भिन्नः (भिद्+क्त), भिन्नवान् (भिद्+क्तवतु) | दकारव्यवधानेऽपि यथा स्यात् । अन्यथा क्क्ङित्यनन्तरत्वाभावान्न गुणनिषेधः । | 1. धातोर्विहिते क्क्ङितीत्यर्थकरणेन तादृशकित्परस्य भिद्धातोः इको गुणनिषेधः सिद्धः ।<br>2. कार्य्यकालपक्षे पुगन्तसूत्रेऽस्योपस्थितेः 'येन नाव्यवधानमि'ति न्यायेन उपधार्थमेकाक्षरस्य व्यवधानावश्यभावित्वेन दकारव्यवधानेऽपि गुणनिषेधः ।<br>3. पुगन्तसूत्रे क्क्ङिद्ग्रहणस्यानवकाशत्वाद् गुणो न ।<br>4. 'त्रसिगृधिधृषिक्षिपेः क्नुः' (उदा. गृध्नु, क्षिप्नुः), 'हलन्ताच्च (उदा. बिभित्सति, बुभुत्सते) इत्यनेन क्नुसनोः कित्करणरूपाचार्यप्रवृत्तिज्ञापनात् उपधालक्षणस्यापि गुणस्य प्रतिषेधः च।' |

| | | |
|---|---|---|
| रोरवीत्यर्थम्<br>(रोरूय-लट्-ईट्-तिप्) | अत्र गुणनिमित्तः तिप्, न तु यङ् । अतो ङित्त्वाभावात् न गुणनिषेधः । अन्यथा प्रत्ययलक्षणेन यङः सत्त्वात् तत्परस्य द्वितीयोकारस्य गुणनिषेधः । | 1. 'न लुमता तस्मिन्' इति वार्त्तिकेन प्रत्ययलक्षणनिषेधात् ङित्परकत्वाभावात् न निषेधः ।<br>2. 'न लुमताङ्गस्य' इति सूत्रेण निषेधात् । न चाङ्गाधिकारस्यैव कार्यस्यानेन निषेधः, कार्यकालपक्षे सार्वधातुकाध. इति सूत्रोपस्थितस्य तथात्वात् ।<br>3. छान्दसमेतत् । तस्मान्न गुणनिषेधः ।<br>4. 'न धातुलोपे'ति सूत्रे यदार्धधातुकग्रहणं तस्यानवकाशत्वात् सार्वधातुके परे प्राप्तस्य गुणस्य बाधकत्वम् । |
| हतः, हथः<br>(हन्+तस्/थस्) | तस्थसोः अपित्सार्वधातुकत्वात् ङित्त्वात् ङिति सति हकारोत्तरस्य गुणसंज्ञकस्य अकारस्य अभावः स्यात् । निमित्तग्रहणे च तन्निमित्तकगुणाभावात् न अकाराभावः । | प्राप्तस्य असतश्च एव प्रतिषेधात् अत्र धातूपदेशावस्थायामेव अकारस्य सत्त्वात् न तन्निषेधः । |
| उपायते (उप+ऊयते वेञ्, लट्, यक् सम्प्रसारणं, दीर्घः 'आद्गुण' इति गुणः), औयत (वेञ्, लङ्, यक्, सम्प्रसारणम्, दीर्घः, आडागमः, 'आटश्च' इति वृद्धिरेकादेशः) | अत्र 'ओ', 'औ' इति गुणवृद्धी कितं यक्प्रत्ययं निमित्तीकृत्य न स्तः, अतो न तन्निषेधः । अन्यथा किति सति गुणाभावः स्यात् । | उप ऊयते, आ ऊयत इत्यनयोः पदद्वयमाश्रित्य जायमानः ओकारः औकारश्च बहिरङ्गः, निषेधस्य एकपदस्थकमाश्रित्य जायमानत्वात् सः अन्तरङ्गः । 'असिद्धं बहिरङ्गमन्तरङ्गे' इति गुणवृद्ध्योः असिद्धत्वात् निषेधदृष्ट्या तदभावात् न निषेधः, अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वात् । |

| | | |
|---|---|---|
| लौयमानिः (लूयमान+अपत्यार्थकः इञ्, आदिवृद्धिः), पौयमानिः (पूयमानस्यापत्यमित्यर्थे पूर्ववत्) | अत्र किद्यग्निमित्ता वृद्धिः न, अपितु इञ्निमित्ता । अतो वृद्धिनिषेधो न । | अत्र यक्परवर्त्तिनः इञः आश्रितत्वात् वृद्धिः बहिरङ्गा । केवलस्य यकः आश्रितत्वात् निषेधः अन्तरङ्गः । असिद्धत्वात्, वृद्ध्यभावात् न निषेधः । |
| नेनिक्ते (निज्, लट्, त, शप्, श्लु, द्वित्वम्, श्लौ अभ्यासस्य नेः 'निजां त्रयाणां गुणः श्लौ' इति गुणः) | तप्रत्ययस्य ङित्त्वेऽपि तन्निमित्तकगुणाभावात् न गुणनिषेधः । अन्यथा ङित्सत्त्वे गुणाभावः स्यात् । | द्वितीयेन निजा व्यवहितत्वात् अभ्यासात्परस्य ङित्प्रत्ययस्य अभावान्न गुणनिषेधः तप्रत्ययात् अव्यवहितस्य निजः उपधागुणो भवत्येव । |

2. इक्शब्दमुच्चार्य विहिते गुणवृद्धी एव 'क्ङिति चे'ति सूत्रविषये । अत एव 'लैगवायनः' 'कामयते' इत्यादौ न वृद्धिनिषेधः । अत्रेदं बोध्यम् – लिगोरपत्यमित्यर्थे गोत्रापत्ये 'नडादिभ्यः फक्'[16] इति फकि, 'किति च'[17]ति आदिवृद्धौ एकारे लैगवायन इति, कमेः स्वार्थे णिङि, 'अतः उपाधायाः' इति वृद्धौ आकारे च कामयते इति सिद्ध्यति । अत्र फकः कित्त्वात्, णिङः ङित्त्वाच्च वृद्धिनिषेधः प्राप्तः, परम् एतेन इग्लक्षणगुणवृद्ध्योरेव निषेधे स्वीकृते 'लैगवायनः' इत्यत्र अज्लक्षणत्वाद् वृद्धेः, 'कामयते' इत्यत्र उपधालक्षणत्वाच्च वृद्धेः न निषेधः ।
3. ननु लकारस्य ङित्त्वात् आदेशेषु स्थानिवद्भावात् 'अचिनवम्' (चि, श्नु, लङ्, मिप्, अम्) 'असुनवम्' (सु, श्नु, लङ्, मिप्, अम्), 'अकरवम्' (कृ, उ, लङ्, मिप्, अम्) इत्यादौ ङिति सार्वधातुकगुणो न स्यात् – इति चेन्न, भगवतः पाणिनेः 'यासुट् परस्मैपदेषूदात्तो ङिच्च'[18] इति ङिद्वचनात् ज्ञापकात् (स्थानिवद्भावात् मिबादेः ङित्त्वात् तस्य यासुडागमस्य 'यदागम' न्यायेन ङित्त्वात् तस्य ङिद्वचनं व्यर्थं सञ्ज्ञापयति) ङिदादेशस्य ङित्त्वाभावात् । न चैवं ङित्त्वाभावात् 'नित्यं ङितः'[19] सकारलोपः, 'इतश्च'[20] इति ङितः तिबादेः इकारलोपो न स्यादिति वाच्यम्, ङितो यत्कार्यं भवति तद् भवति, ङिति यत्कायं तन्न भवतीति ज्ञापनात्

(सम्प्रसारणादिकार्य्यस्य यासुट् न निमित्तः, तदर्थं तस्य ङित्त्वं व्यर्थं सत् तिबादो ङित्त्वं ज्ञापयति यतश्च ङित्तिबादिपरे अङ्गस्य सम्प्रसारणादिकार्य्यं सम्भवतीति) ।

**अथवाकल्पे बीजम्** - नित्यप्रणत्यञ्जलिना पतञ्जलिना कस्यचिदाक्षेपस्य बहुधा 'अथवा' 'अथवा' इति कल्पेन समाधानानि प्रस्तूयन्ते । तत्र गवेषणायां सत्या निष्कर्षद्वयम् - सत्यां पूर्वसमाधाने अरुचौ अथवेति कृत्वा समाधानान्तरप्रदर्शनम्, सत्यपि उपाये उपायान्तरस्यापि सत्त्वप्रदर्शनाय समाधानान्तरप्रदर्शनञ्च। तद्यथा 1. उपाधार्थं निमित्तग्रहणं नेति प्रदर्शनाय भाष्ये 'न धातुलोपे' इति सूत्रात् 'धातोः' इत्यनुवर्त्त्य धातोर्विहिते क्क्ङित्यनन्तरो यो धातुर्विकरणे वा तस्य प्रतिषेध इत्यर्थे 'चिनुतः, लुनीतः' इत्यादौ धातोः विकरणस्य गुणनिषेधसिद्धिं प्रदर्श्य पश्चात् धातुग्रहणस्य सूत्रस्य च प्रत्याख्यानात् नायं समाधिर्युक्तोऽत आह 'अथवा कार्यकालं सञ्ज्ञापरिभाषमित्यादि । पुनश्च श्रुतत्वात् सार्वधातुकादिकं क्क्ङितीति च पुगन्तादीनामेव विशषणमित्यभिमानेन 'पुगन्तलघूपधस्य क्क्ङति गुणे नेत्युक्त्वा 'भिन्न' इत्यादौ पूर्वं गुणनिषेधं प्रदर्श्य पश्चात् अङ्गांशे उत्थिताकाङ्क्षत्वेन तद्विशेषणत्वौचित्यमिति अरुचौ 'अथवा' इत्यनेन अनवकाशत्वाद् गुणनिषेधं प्रस्तौति । अपि च, तदनन्तरम् 'अथवाऽऽचार्यप्रवृत्तिर्ज्ञापयति - भवत्युपधालक्षणस्य गुणस्य प्रतिषेधः' इति प्रदत्ते समाधाने प्रदीपकारो वक्ति - अनेक-परिहारोपन्यासो न्यायव्युत्पादनार्थ' इति न्यायव्युत्पतिर्नाम तत्प्रतिपत्तिः । श्रोतृणां तदुत्पादनायेत्यर्थः । अत्र सत्यपि परिहारे व्युत्पादनार्थं परिहारान्तस्योपस्थापनं पतञ्जलिना कृतम् ।

**प्रकृतभाष्येण विशेषोपलब्धिः** - संज्ञापरिभाषादेशावच्छेदेन शास्त्रे पक्षद्वयं प्रसिद्धम् - यथोद्देशम्, कार्य्यकालञ्च । परं 'क्क्ङति चे'ति सूत्रभाष्ये निषेधसूत्रस्यास्य कृतेऽपि भाष्यकृता कार्य्यकालपक्षोपन्यासः कृतः । तेन विध्युपकारकत्वमात्रेणाऽऽरोपितं परिभाषात्वं तत्राप्यस्तीति विशेषलाभः । उक्तञ्च नागेशेन - 'निषेधवाक्यानामपि निषेध्यविशेषाकाङ्क्षत्वाद्विध्येकवाक्य-तयैवान्वय इति परिभाषासादृश्यात् परिभाषात्वेन व्यवहारः 'क्क्ङति चे'त्यत्र भाष्ये' इति ।[21]

**भाष्यानुपपत्तिपरिहारः** - 'लकारस्य ङित्त्वादादेशेषु स्थानिवत्प्रसङ्ग' इति कात्यायन- वार्त्तिकं व्याचक्षाणो भाष्यकारः पित्तिबादिमपि स्थानिवद्भावेन ङितं मत्वा 'अचिनवम्' इत्यादौ सार्वधातुकगुणस्य निषेधरूपो दोषः प्रदर्श्यते । परं भाष्यकृतः सिद्धान्तः - 'पिच्च ङिन्न, ङिच्च पिन्न' इति । तस्मात् स्वसिद्धान्तविरुद्धो दोषोपन्यासो भाष्यकृतोऽनुपपन्न इति समक्षमायाति । परिहारश्चास्य उच्यते कैयटेन तत्रैव - 'पिच्च ङिन्न, ङिच्च पिन्न' इति भाष्यकारस्य कल्पना, न वार्त्तिककारस्येति दोषोपन्यास' इति । एतेनोक्तभाष्यानुपपत्तिः परिह्रियते ।

**पाठभेदेन भाष्याशयविमर्शः** - भाष्यस्य पृथक्पृथक्संस्करणे द्विधा पाठ उपलभ्यते । तद्यथा - 'अपर्याप्तश्चैव हि यासट् समुदायस्य ङित्त्वे । ङितं चैनं करोति' इति । अत्रैकस्मिन् संस्करणे 'अपर्य्याप्तश्चैव हि' इति स्थाने 'सुपर्य्याप्तश्चैव हि' इत्युक्तम् । उभयं विरुद्धम् । तस्माच्चिन्ता जागर्त्ति कथं द्विविधस्योक्तभाष्यस्य लापनं सम्भवम्? तत्र भाष्यटीकाकारः कैयटः स्वयं लापयन् ब्रूते - 'अपर्याप्तश्चेति । समुदायस्य ङिद्व्यपदेशे कर्त्तव्ये यासुडसमर्थः । यासुट एव ह्यनेन ङित्त्वं क्रियते, न समुदायस्य । 'क्क्ङिति च'त्यत्र तन्निमित्तग्रहणस्य प्रत्याख्याततत्वादगुणनिमित्तेऽपि (तन्मात्रस्य सार्वधातुकत्वादेरभावात्) यासुटि ङिति गुणनिषेधः सिध्यति । यदि समुदाये स्थानिवद्भावेन ङित्कार्य्यमभविष्यत्, यासुटो ङित्त्वं न व्यधास्यत् इति । 'सुपर्य्याप्तश्चैव ही' ति। तत्रावयवङित्त्वद्वारेण समुदायस्य ङित्त्वं विधीयत इति व्याख्येयम् । एवं हि क्क्ङितीति निमित्तसप्तमीपक्षेऽपि गुणनिषेधः सिध्यति । अस्मिन्पक्षे 'ङितं चैनं करोति' इति समुदायः परामृश्यते' इति[22] । अत्र कैयटस्य विचारचातुरी शाब्दिकानां नूनं मनोरमात्वेन भाति ।

उद्द्योतकारस्यायुक्तत्वम् - प्रसक्तस्यानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या कर्त्तुम्' इति भाष्यप्रतीकमादाय कैयटोक्तं 'परमार्थतस्तूत्सर्गापवादयोरप्येकवाक्यतायाम्- प्राप्त्यनुमानं बाध इति सिद्धान्तः' इति वाक्याशयं प्रकटयन् नागेशः 'यद्वा प्रसज्यप्रतिषेधेन वाक्यार्थबोधे तदंशे सामान्यशास्त्रजज्ञानस्याप्रामाण्यं कल्प्यते' इति उद्योते उक्त्वा शास्त्रस्याप्रामाण्यं यदुच्यते तद्युक्तिविरुद्धम्, तस्य विशेषविशेषमात्रपरत्वकल्पनात् । अत्रेदं बोध्यम् - विशेषशास्त्रादर्शने सामान्यशास्त्रालोचने तस्य सर्वविषयत्वं प्रतीतितोऽवगतम्, न तु वस्तुगत्या तत्सर्वविषयम् । तद्दर्शने तु नायमस्य विषयः तस्मात् सामान्यशास्त्रस्याल्प- विषयकत्वकल्पनेन सङ्कोचमात्रं न त्वाप्रामाण्यमिति ।

तदित्थं 'क्क्ङिति चे'ति सूत्रभाष्यविमर्शः' इति शीर्षकमाश्रित्य निबद्धोऽयं निबन्धः निमित्तसप्तमी - सत्सप्तमी - परसप्तमीति पक्षे सूत्रार्थं विमृश्य सूत्रस्य ककारद्वयघटितत्वेन लेखनं समर्थ्य पर्य्युदासप्रसज्यप्रतिषेधपक्षे चैकवाक्यतास्वरूपमुपपाद्य युक्तिप्रमाणाभ्यां निमित्तसप्तमीं पुरस्कृत्य सूत्रार्थस्य पदकृत्यं प्रदर्श्य भाष्यव्याख्याताशं सारल्येन प्रतिपाद्य 'अथवाकल्पे बीजम्', 'प्रकृतभाष्येण विशेषोपलब्धिः', 'भाष्यानुपपत्तिपरिहारः', 'पाठभेदेन भाष्याशयविमर्शः', 'उद्द्योत- कारस्यायुक्तत्वमि'त्यादिशीर्षकेण कञ्चन विशिष्टं शोधप्रकारं विदुषां मोदाय, गवेषकाणां पथिप्रदर्शनाय, छात्रेभ्यो हिताय, शास्त्रस्य च विकासाय पुरस्कुरुते इति मे मतिः ।।

**सन्दर्भाः**

1. पा. सू. 1.1.3 ।

2. पा. सू. 1.1.4 ।
3. तदेव 2.1.36 ।
4. तदेव 2.3.37 ।
5. श. कौ. 1.1.5 ।
6. तदेव पृ. सं. 103 ।
7. पा. सू. 3.2.140 ।
8. पा. सू. 6.4.63 ।
9. पा. सू. 7.4.11 ।
10. पा. सू. 8.2.3 ।
11. पा. सू. 6.4.24 ।
12. पा. सू. 1.1.5 ।
13. पा. सू. 3.2.139 ।
14. पा. सू. 3.1.10 ।
15. पा. सू. 7.2.116 ।
16. पा. सू. 4.1.99 ।
17. पा. सू. 7.2.118 ।
18. पा. सू. 3.4.103 ।
19. पा. सू. 3.4.99 ।
20. पा. सू. 3.4.97 (इतश्च लोपः परस्पैपदेषु)
21. परिभाषेन्दुशेखरः, परि.सं. 2-3 ।
22. एकदेशिसमाधानवार्त्तिकम् 'लकारस्य ङित्त्वा.' अ. । पा. - 1, आ. - 4, सू. - 5, महाभाष्यम् ।

**आचार्य्यः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैयासंस्कृतविद्यापीठम् ।**
**विद्याविहारः, मुम्बई ।**

★★★

# कृदन्तविमर्शः

✍डॉ. दयारामदासः

पाणिनीयव्याकरणस्य व्याख्याया द्वौ प्रकारौ वर्तेते । प्रथमः सूत्रक्रमानुसारी तत्र महाभाष्यम्, काशिका, भागवृत्तिः, भाषावृत्तिः, मिताक्षरा शब्दकौस्तुभः, व्याकरणसिद्धान्तसुधा-निधिरित्यादयः ।

द्वितीयः प्रक्रियाक्रमानुसारी रूपावतारः, प्रक्रियाकौमुदी, सिद्धान्तकौमुदी, मध्यसिद्धान्त-कौमुदी, लघुसिद्धान्तकौमुदी, वेदाङ्गप्रकाश इत्यादयः ।

प्रक्रियाक्रमानुसारिग्रन्थेषु श्रीभट्टोजिदीक्षितेन प्रणीता सिद्धान्तकौमुदी वर्तते। सिद्धान्त-कौमुद्या बह्व्यः टीकाः सन्ति । तासु टीकासु श्रीवासुदेवदीक्षितेन प्रणीता बालमनोरमा टीका, श्रीज्ञानेन्द्र सरस्वटतीविरचिता तत्त्वबोधिनी टीका च वर्तेते । द्वे अपि छात्रोपयोगिन्यौ वर्तेते ।

मया द्वे अपि टीके अधीते । अध्ययनकाले केषुचित् स्थलेषु संदेहो जातः । तस्य निवारणं परमपूज्यश्रीसीतारामशास्त्रिगुरुकृपया जातम् । तदेव अस्मिन् निबन्धे मया विमश्यते ।

कृदन्तविमर्शः, सिद्धान्तकौमुदीकृदन्तप्रकरणम्, मोतीलालबनारसीदाससंस्करणम्, सम्पादकौ - (1) म. म. पं. गिरिधरशर्मा चतुर्वेदः । (2) म. म. पं. परमेश्वरनन्दशर्मा भास्करः । पृष्ठसंख्या 11, सूत्रसंख्या 2848 गदमदचरयमश्चा्नुपसर्गे । (3-1-100)

गद्यम् । मद्यम् । चर्यम् ।

यमेर्नियमार्थम्, सोपसर्गान्मा भूदिति । प्रयाम्यम् ।

**बालमनोरमाटीका -**

ननु 'पोरदुपधात्' इत्येव सिद्धे यमेरिह ग्रहणं व्यर्थमित्यत आह यमेर्नियमार्थमिति । अनुपसर्गादेव यमेर्ण्यदिति नियमार्थमित्यर्थः । तत्फलमाह सोपसर्गान्मा भूदिति ।

**बालमनोरमा -**

यम् धातोः पोरदुपधात् (3-1-98) इत्यनेन यम्यम् इत्यस्य सिद्धिर्भवितुं शक्नोति। गदमदचरयमश्चानुपसर्गे इति सूत्रे यमेः पाठो नियमार्थं वर्तते । नियमस्वरुपम् अनुपसर्गादेव यमेर्ण्यदिति । तस्य फलं सोपसर्गकयमेर्यत्प्रत्ययो न भवति । यथा - प्रयाम्यम् ।

**विमर्शः -**

गदमदचरयमश्चानुपसर्गे इत्यनेन यत्प्रत्ययो भवति न तु ण्यत्प्रत्ययः। अतः नियमस्वरूपम् अनुपसर्गादेव यमेर्यदिति । तस्य फलं-प्रयाम्यम् इत्यत्र यत् प्रत्ययो न भवति ण्यत्प्रत्ययो भवति । अतः अनुपसर्गादेव यमेर्ण्यदिति पाठस्थाने अनुपसर्गादेव यमेर्यदिति पाठो युक्तः।

पृष्ठसंख्या 18, सूत्रसंख्या-2862 मृजेर्विभाषा (3-1-113)

**मृजेः क्यब्वा स्यात् । पक्षे ण्यत् । मृज्यः ।**

**बालमनोरमा । मृज्य इति । कित्त्वान्न गुणः ।**

**बालमनोरमा -**

मृज् धातोः 'ऋदुपधाच्चाक्लृपिचृतेः' (3-1-110) इति सूत्रेण नित्यं क्यपि प्राप्ते तं बाधित्वा 'मृजेर्विभाषा' इत्यनेन विकल्पेन क्यप्प्रत्यये, ककारपकारयारनुबन्धलोपे मृज्य इति स्थिते 'पुगन्तलघूपधस्य च'[1] (7-3-86) इत्यनेन गुणो न भवति 'क्क्ङिति च'[2] (1-1-5) इति निषेधात्। स्वादिकार्ये 'मृज्यः' इति रूपं सिद्ध्यति ।

**विमर्शः -**

मृज् + (क्यप्)य इति स्थितौ 'मृजेर्वृद्धिः'[3] (7-2-114) इत्यनेन वृद्धौ प्राप्तायं क्क्ङिति च (1-1-5) इत्यनेन निषेधे स्वादिकार्ये 'मृज्यः' इति रूपं सिद्ध्यति ।

मृज्य इति स्थितौ मृजेर्वृद्धिः (7-2-114) इत्यनेन वृद्धिप्रसङ्गो वर्तते । अतः वृद्धेर्निषेधो भवति, क्कङ्िति च इत्यनेन न तु गुणस्य । अतः कित्त्वान्न गुणः पाठस्थाने कित्त्वान्न वृद्धिः पाठो युक्तो वर्तते ।

पृष्ठसंख्या 37, सूत्रसंख्या 2899 पाघ्राध्माधेट्दृशः शः। (3-1-137) पिबतीति पिबः । जिघ्रः । धामः । धायः । धाया कन्या । धटष्टित्त्वात् 'स्तनन्धायी' इति खशीव ङीप्प्राप्तः 'खशोऽन्यत्र नेष्यते' इति हरदत्तः ।

**बालमनोरमा -**

स्तेनंधयीति । स्तनशब्दे उपपदे धेट्धातोः 'नासिकास्तनयोः - 'इति खशि कृते 'खित्य-नव्ययस्य' इति मुमि स्तनन्धयशब्दः । तत्र खशि कृते धेटष्टित्त्वमाश्रित्य यथा 'टिड्ढाणञ्.' इति ङीप् ।

**बालमनोरमा -**

स्तनं धयतीति विग्रहे स्तनमिति कर्मण्युपपदे धट्धातोः टकारस्यानुबन्धलोपे 'स्तनधेटो नासिकायां धमश्चेति वाच्यम्' इति वार्त्तिकसहकारेण 'नासिकास्तनयोर्ध्माधेटोः' (3-2-29)

इत्यनेन कर्तरि खशि, खशयोरित्यञ्ज्ञायां लोपे च कृते, 'कर्तृकर्मणोः कृति' इत्यनेन कर्मणि षष्ठी स्तन ङ्स् धे अ इति स्थिते खशोऽकारस्य 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसञ्ज्ञायां 'कर्तरि शप्' इत्यनेन शपि, शकारपकारयोरित्संज्ञायां लोपे च जाते स्तन ङ्स् धे अ अ इति स्थिते। 'अतो गुणे' इत्यनेन पररूपे स्तन ङ्स् धे अ इति स्थिते 'एचोऽयवायावः' इत्यनेन अयादेशे, संयोगे स्तन ङ्स् धाय इति जाते 'उपपदमतिङ' इत्यनेन उपपदसमासे, सुपो (ङसः) लुकि स्तन् धय इति जाते 'खित्यनव्ययस्य' इत्यनेन मुमागमे, उमि गते, पदान्तमस्यानुस्वारे, परसवर्णे च कृते स्तनन्धय इति जाते कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपतिकसंज्ञायां सौ, रुत्वे विसर्गे च 'स्तनन्धयः' इति । टिड्ढाणञ् इत्यत्र टिदाद्यन्तं यदन्तं प्रातिपदिकमिति व्याख्यातम्, तथापि टित्त्वस्यावयवेऽचरितार्थत्वादत्रङीबिति हरदत्तादिमते 'स्तनन्धयी' इति भवति ।

**विमर्शः -**

स्तन धय इति स्थिते 'खित्यनव्ययस्य'[4] इत्यनेन मुमागमो न भवति, एतेन सूत्रेण पूर्वपदस्यय ह्रस्वं भवति । 'अत्र अरुर्द्विषदजन्तस्य मुम्' इत्यनेन मुमागमो भवति । अतः खित्यनव्ययस्य इति पाठस्थाने 'अरुर्द्विषदजन्तस्य'[5] मुम् इति पाठो युक्तः ।

पृष्ठसंख्या 47, सूत्रसंख्या 2917 प्रष्ठोऽग्रगामिनि (8-3-92) । प्रतिष्ठत इति प्रष्ठो गौः । अग्रतो गच्छतीत्यर्थः ।

**बालमनोरमा -**

प्रष्ठोऽग्रगामिनि । प्रपूर्वात् स्थाधातोः आतश्चोपसर्गे इति कप्रत्यये आतो लोपे प्रस्थशब्दः।

**बालमनोरमा -**

प्र + स्था धातोः 'आतश्चोपर्गे'[6] इत्यनेन कप्रत्यये, ककारस्य अनुबन्धलोपे प्र + स्था + अ इति स्थिते 'आतो लोप इटि च'[7] । इत्यनेन स्थाधातोः आकारस्य लोपे, संयोगे, प्रस्थ इति जाते सकारस्य इण्कवर्गाभ्यां परत्वाभावात् षत्वाप्राप्त्यां 'प्रष्ठोऽग्रगामिनि' इति निपातनात् सकारस्य षत्वे, ष्टुत्वे स्वादिकार्ये च 'प्रष्ठः' इति रूपं सिद्ध्यति ।

**विमर्शः -**

प्र + स्थाधातोः 'सुपि स्थः'[8] इत्यनेन कप्रत्ययो भवति आतश्चोपसर्गे इति सूत्रं प्रबाध्य ।

प्र + स्था + (क) अ, लोपे, षत्वे ष्टुत्वे, स्वादिकार्ये प्रष्ठः इति रूपं सिद्धम् । अतः आतश्चोपसर्गे इति पाठस्थाने 'सुपि स्थः'[9] इति पाठो युक्तः ।

पृष्ठसंख्या 62, सूत्रसंख्या-2963 संज्ञायां भृr§वृजिधारिसहितपिदमः । (3-2-46) विश्वं बिभर्तीति विश्वम्भरः । रथन्तरं साम । पतिंवरा कन्या । शत्रुञ्जयो हस्ती । युगन्धरः पर्वतः । शत्रुंसहः । शत्रुन्तपः । अरिन्दमः ।

**बालमनोरमा -**

शत्रुंसह इति । शत्रून् सहते इति विग्रहः । ह्रस्वादिः पूर्ववत् ।

**बालमनोरमा**

'शत्रून् सहते' इति विग्रहे शत्रून् इति कर्मण्युपपदे सह् धातोः 'संज्ञायां भृr§वृजिधारिसहितपिदमः' इत्यनेन कर्तरि खचि, खकारचकारयोरित्यसञ्ज्ञायां लोपे च कृते, 'कर्तृकर्मणोः कृति' इत्यनेन कर्मणि षष्ठी शत्रु आम् + सह +अ इति स्थिते, उपपदमतिङ् इति सूत्रेण समासे, सुपो (आमः) लुकि शत्रु सह इति जाते 'खचि ह्रस्वः' इत्यनेन ह्रस्वे 'अरुर्द्विषदजन्तस्य'[10] इत्यनेन मुमागमे अनुस्वारे शत्रुंसह इति स्थिते स्वादिकार्ये 'शत्रुंसहः' इति रूपं सिद्धम् ।

**विमर्शः -**

युगं धारयति इति युगंधरः इतिवत् शत्रून् सहते इति शत्रुंसहः इति प्रयोगे 'खचि ह्रस्वः'[11] इत्यनेन ह्रस्वस्य प्राप्तिर्नास्ति खच्परकण्यभावात् । मुमागमः पूर्ववद् भवति । अतः ह्रस्वादिपूर्वः वत्पाठस्थाने मुमादिपूर्ववत् पाठो युक्तः ।

पृष्ठसंख्या 86, सूत्रसंख्या 3020 द्रवमूर्तिस्पर्शयोः श्यः। (6-1-24) द्रवस्य मूर्तौ काठिन्ये, स्पर्शे चार्थे श्यैङः संप्रसारणं स्यान्निष्ठायाम् ।

सूत्रसंख्या 3021 श्योऽस्पर्शे । (8-2-47) श्यैङो निष्ठा तस्य नः स्यादस्पर्शेऽर्थे । हलः (सूत्र सं. 2559) इति दीर्घः । शीनंघृतम् ।

**बालमनोरमा -**

तथा च श्यैङः क्ते आत्त्वे संप्रसारणे पूर्वरूपे शित इति स्थिते श्योऽस्पर्शे ।

**बालमनोरमा -**

श्यैङ् गतौ धातोः भावे क्तप्रत्यये श्यै + त इति स्थिते 'आदेच उपदेशेऽशिति' इत्यनेन आत्वे श्या + त इति जाते 'द्रवमूर्त्तिस्पर्शयोः श्यः' इत्यनेन संप्रसारणे 'सम्प्रसारणाच्च'[12] इत्यनेन पूर्वरूपे 'शित' इति जाते 'श्योऽस्पर्शे' इत्यनेन तकारस्य नत्वे 'हलः'[13] इत्यनेन दीर्घे स्वादिकार्ये 'शीनं घृतम् ' इति सिद्धम् ।

**विमर्शः -**

श्यैङ् गतौ इत्युपदेशावस्थायाम् एव 'आदेच उपदेशेऽशिति'[14] इत्यनेन आत्वं भवति । ततः क्तः, संप्रसारणं नत्वं दीर्घः 'शीनम्' इति सिद्धं भवति ।

अतः 'श्यैङ् क्ते आत्वे' पाठस्थाने श्यैङ् आत्वे ततः क्त इति पाठो युक्तः ।

पृष्ठसंख्या 92, सूत्रसंख्या 3041 वित्तो भोगप्रत्यययोः (8-2-58) विन्दतेर्निष्ठान्तस्य निपातोऽयं भोग्ये प्रतीते चार्थे । वित्तं धनम् । वित्तः पुरुषः ।

**बालमनोरमा -**

निपातोऽयमिति । 'नुदविदोन्द' इति प्राप्तस्य पाक्षिकनत्वस्य अभावनिपातनमित्यर्थः ।

**बालमनोरमा -**

विद्लृ लाभे, तुदादिधातोः क्तप्रत्यये विद् + त इति स्थिते 'नुदविदोन्दत्राघ्राह्री-भ्योऽन्यतरस्याम्' इत्यनेन विकल्पेन नत्वे प्राप्ते तस्य 'वित्तो भोगप्रत्यययोः' इत्यनेन निपातनात् नत्वाभावे, चत्वे, स्वादिकार्ये 'वित्तः' इति सिद्धम् ।

**विमर्शः -**

विद्लृ लाभे तुदादिधातोः क्तप्रत्यये विद् + त इति स्थिते नुदविदोन्दत्राघ्राह्री-भ्योऽन्यतरस्याम्' इति सूत्रस्य प्राप्तिर्नास्ति । अस्मिन् सूत्रे विद्विचारणे[15] रौधादिकस्य ग्रहणं वर्तते उन्दिरौधादिकेन साहचर्यात् । यद्यपि तौदादिकेन नुदिनापि साहचर्यम्, तथापि परं साहचर्यमेव व्यवस्थापकम् 'विप्रतिषेधे परम्' इत्यस्यैव वित्तो भोग प्रत्यययोः इति सूत्रेऽपि उपयोगात् ।

'वित्तः' प्रयोगे 'रदाभ्यां निष्ठातो न पूर्वस्य च दः' इत्यनेन नत्वस्य प्राप्तिः । तस्याः निपातानात् नत्वाभावः 'वित्तो भोगप्रत्यययोः' इत्यनेन भवति । ततः चर्त्वे स्वादिकार्ये 'वित्तः' इति रूपं सिद्धं भवति ।

अतः 'नुदविनोन्द'[16] - इति प्राप्तस्य पाठस्थाने 'रदाभ्यां निष्ठातोः नः पूर्वस्य च दः'[17] इति प्राप्तस्य नत्वस्य अभावनिपातनमित्यर्थ इति पाठो युक्तः ।

पृष्ठसंख्या 96, सूत्रसंख्या 3057 निष्ठायां सेटि (6-4-52) 'सेऽसिचि' इति वेट्कत्वात्सिद्धे कृन्तत्यादीनामीदित्त्वेनानित्यत्वज्ञापनाद्वा तेन 'धावितमिभराजधिया' इत्यादि ।

**बालमनोरमा -**

धावितमिति । 'स्वरतिसूति' इति धञो वेट्कत्वाऽपि 'यस्य विभाषा' इति इण्निषेधो नेति भावः ।

**विमर्शः** -

'धावितम्' इति प्रयोगे धावु गतिशुद्धयोः भ्वा. उ. से. धातुर्वर्तते । न तु धाञ् कम्पने क्र्या. उ. से, स्वा उ. अ. । अतः 'स्वरतिसूतिसूयतिधञूदितो वा'[18] इति सूत्रस्य प्रवृत्तिर्न भवति। धावुधातुः उदितो वर्तते । अतः 'उदितो वा'[19] इत्यनेन वेट्कत्वेऽपि 'यस्य विभाषा' इति इण्निषेधो न भवति । ततः धाव् रु इ + त इति स्थिते, स्वादिकार्ये 'धावितम्' इति रूपं सिद्धं भवति ।

अतः स्वरतिसूति इति पाठस्थाने 'उदितो वा' इति पाठो युक्तः ।

पृ. 109 सूत्रसंख्या 3086 गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च ।। (3-4-72) एभ्यः कर्तरि क्तः स्याद्भावकर्मणोश्च । पृ. 110 हरिदिनमुपोषितः ।

**बालमनोरमा** -

'उपान्वध्याङ्वसः' इति हरिदिनं कर्म । व्याख्या-गत्यर्थाकर्मकश्लिषशीङ्स्थासवजन-रुहजीर्यतिभ्यः पञ्चम्यन्तम् । च अव्ययपदम् ।

**बालमनोरमा** -

'हरिदिनमुपोषितः' इत्यत्र हरिदिन इत्यस्य कर्मसंज्ञा 'उपान्वध्याङ्वसः' इत्यनेन भवति ।

हरिदिनमुपोषितः इत्यत्र हरिदिन इत्यस्य कर्मसंज्ञा 'उपान्वध्याङ्वसः'[20] इत्यनेन भवति ।

**विमर्श** -

'हरिदिनमुपोषित इत्यउत्र हरिदिन इत्यंस्यइ कर्मसंज्ञा उपान्वध्याङ्वसः' इत्यनेन न भवितुं शक्नोति । 'अभुक्त्यर्थस्य न'[21] इति वार्त्तिकनिषेधात् । अत्र 'कालाध्वनोरत्यन्तसंयोगे' इत्यनेन कर्मसंज्ञा भवति । अतः 'उपान्वध्याङ्वसः' इति पाठस्थाने 'कालध्वनोरत्यन्तसंयोगे'[22] इति पाठो युक्तः ।

पृष्ठसंख्या 115, सूत्रसंख्या 3097 भाषायां सदवसश्रुवः । (3-2-108) सदादिभ्यो भूतसामान्ये भाषायां लिड् वा स्यात्, तस्य च नित्यं क्वसुः । अध्यूषुस्तामभवञ्जनस्य ।

**बालमनोरमा** -

अध्यूषुष इति। अधिपूर्वाद्वस्धातोर्लिटः क्वसुः यजादित्वाद्धातोर्वस्य संप्रसारणम् । पूर्वरूपम्, उस इत्यस्य द्वित्वम्, हलादिशेषः, सवर्णदीर्घः । शसि वसोः संप्रसारणम्, पूर्वरूपम् ।

**बालमनोरमा** -

अधिपूर्वकवसनिवासे भ्वादिधातोः 'भाषायां सदवसश्रुवः' इत्यनेन लिट्प्रत्ययः, तस्य स्थाने नित्यं क्वसुरादेशः, अनुबन्धलोपे अधि + वस् +वस् इति स्थिते 'वचिस्वपियजादीनां किति' इत्यनेन वस्धातोः वकारस्य, सम्प्रसारणं 'सम्प्रसारणाच्च' इत्यनेन पूर्वरूपं, द्वित्वं, हलादिशेषः,

दोर्घे, अधि + ऊस् + वस् इति स्थिते यणि, षत्वे अध्यूष् + वस् इति स्थिते शस्प्रत्यये, अनुबन्धलोपे अध्यूष + वस् + अस् इति स्थिते श्वसोः सम्प्रसारणम् इत्यनेन सम्प्रसारणं पूर्वरूपम् अध्यूष् + उस् + अस् इति स्थिते संयोगे कृते 'अध्यूषुषः' इति सिद्धं भवति ।

**विमर्शः -**

अध्य्युषुष इति प्रयोगो द्वितीयान्तं न वर्तते । षष्ठ्यन्तं वर्तते । यथा उदाहरणम् - क्षुण्णं यदन्तःकरणेन वृक्षाः फलन्तिकल्पोपपदास्तदेव । अध्यूषुषस्तामभवञ्जनस्य याः सम्पदस्ता मनसोऽ-प्यगम्याः।

(शिशुपालवधं सर्गः 3 श्लोकः 59) अन्वयः - यत् अन्तःकरणेन क्षुण्णं कल्पोपपदा वृक्षाः । तदेव फलन्ति, ताम् अध्यूषुषः (6-1) जनस्य याः सम्पदः अभवन् ताः मनसः अपि अगम्याः ।

अतः शस्पाठस्थाने ड़सि + (ड़स् + इ ) वसोः संप्रसारणं पाठो युक्तः।

पृष्ठसंख्या 133, सूत्रसंख्या 3156 यश्च यङः । (3-2-176)

**बालमनोरमा -**

या इत्यस्य य इति षष्ठ्यन्तम् ।

**बालमनोरमा -**

या इत्यस्य य इति षष्ठ्यन्तम् । या (ङस्) अस् 'आतो धाातोः' इत्यनेन आकारस्य लोपे 'यः' इति सिद्धम् ।

पृष्ठसंख्या 313, सूत्रसंख्या 3186 अकर्तरि च कारके संज्ञायाम् । (3-3-19) कर्तुभिन्ने कारके घञ् स्यात् । संज्ञायाम् इति प्रायिकम् । को भवता लाभो लब्धः।

**बालमनोरमा -**

लाभ इति । भावे घञ् ।

**बालमनोरमा -**

'लाभः' इत्यत्र भावे घञ । लभनं लाभः । 'भावे' इति सूत्रेण घञप्रत्ययो भवति ।

**विमर्शः -**

'लाभः' इति कर्मणि घञप्रत्ययो वर्तते । 'अकर्तरि च कारके संज्ञायाम्' इति सूत्रस्य उदाहरणं वर्तते । लभ्यते असौ 'लाभः' इत्यत्र 'अकर्तरि च कारके संज्ञायाम्' इत्यनेन असंज्ञायां घञ्प्रत्ययो वर्तते ।

अतः 'लाभः' इत्यत्र भावे घञ् पाठस्थाने कर्मणि घञ्[23] पाठो युक्तः।

पृष्ठसंख्या 325 सूत्रसंख्या 3232 ऋदोरप् (3-3-57) ऋवर्णान्तादुवर्णान्तादप् । करः। गरः । शरः । यवः । लवः । स्तवः । पवः ।

**बालमनोरमा -**

पञ्चम्यर्थे षष्ठी ।

**विमर्शः -**

ऋदोः इत्यत्र पञ्चम्यर्थे षष्ठी न वर्तते, पञ्चम्यन्तं वर्तते ।

पृष्ठसंख्या 328, सूत्रसंख्या 3249 ह्वः संप्रसारणं च न्यभ्युपविषु । (3-3-72) एषु किम् प्रह्वायः।

**बालमनोरमा -**

प्रह्वाय इति । घञि वृद्ध्यायादेशौ ।

**बालमनोरमा -**

प्र + ह्वे 'भावे' इति सत्रेण घञ्प्रत्यये अनुबन्धलोपे प्र + ह्वे + अ इति स्थिते । 'अचो ञ्णिति'[24] इति सूत्रेण एकारस्य वृद्धौ 'ऐ' 'एचोऽयवायावः' इत्यनेन आयादेशे स्वादिकार्ये प्रह्वायः इति रूपं सिद्धम् ।

**विमर्शः -**

प्र + ह्वे इति स्थिते 'आदेच उपदेशेऽशिति'[25] इत्यनेन आत्वे प्र + ह्वा इति स्थिते, 'भावे' इत्यनेन घञ्प्रत्ययः, अनुबन्धालोपे प्र + ह्वा + अ इति स्थिते 'आतो युक्चिण्कृतोः'[26] युगागमे, स्वादिकार्ये 'प्रह्वायः' इति रूपं सिद्धम् ।

प्र + ह्वे इति स्थिते 'आदेच उपदेशेऽशिति' इत्यनेन आत्वं भवति । आत्वे सति 'अचो ञ्णिति' इति सूत्रस्य प्राप्तिर्न वर्तते । अतः वृद्ध्यायादेशौ पाठस्थाने आत्वे युगागमे च पाठो युक्तः।

पृष्ठसंख्या 329, सूत्रसंख्या 3253 हनश्च वधः । (3-3-76) अनुपसर्गाद्धन्तेर्भावे अप्स्यात् । वधादेशश्चान्तोदात्तः । वधेन दस्युम् । चाद्घञ् । घातः ।

**बालमनोरमा -**

घात इति । 'हनस्तोऽचिण्णलोः' इति तत्त्वम् । 'चजोः' इति कुत्वम् ।

**बालमनोरमा -**

घात इति । हन्धातोः भावे घञ्प्रत्यये हन् + अ इति स्थिते 'हनस्तोऽचिण्णलोः इत्यनेन नकारस्य तकारः, 'चजोः कु घिण्ण्यतोः'[27] इत्यनेन हकारस्य घकारः 'घातः' इति सिद्धम् ।

**विमर्शः -**

धातोः भावे घञ्प्रत्यये घकारञ्कारयोः अनुबन्धलोपे हन् + अ इति स्थिते 'चजोः कु घिण्ण्यतोः' सूत्रस्य प्राप्तिर्न वर्तते । अत्र 'हो हन्तेञ्णिन्नेषु'[28] इत्यनेन हकारस्य घकारादेशो भवति घन् 'हनस्तोऽचिण्णलोः'[29] इत्यनेन नकारस्य तकारादेशः घत् इति स्थिते 'अत उपधाया'[30] इत्यनेन, दीर्घे, स्वादिकार्ये 'घातः' इति सिद्धम् ।

अतः चजोः कु घिण्ण्यतोः इति पाठस्थाने हो हन्तेञ्णिन्तेषु इति पाठो युक्तः।

पृष्ठसंख्या 330, सूत्रसंख्या 3257 उद्घनोत्याधानम् । (3-3-80) अत्याधानमुपरिस्थापनम् । यस्मिन्काष्ठेऽन्यानि काष्ठानि स्थापयित्वा तक्ष्यन्ते तदुद्घनः । अधिकरणेऽप् ।

**बालमनोरमा -**

उत्पूर्वाद् हन्तेरप् । हस्य घत्वे च उद्घन इति निपात्यते इत्यर्थः ।

**बालमनोरमा -**

उद् + हन् + अप् इति स्थिते हस्यन घत्वं निपातनात् 'उद्घन' इति सिद्धम् ।

**विमशः -**

उद् हन्यते यस्मिन् काष्ठानीति उद्घनः । उद् + हन् इति स्थिते 'उद्घनोत्याधानम्' इति सूत्रेण अधिकरणे अप् प्रत्यये, हनश्च घनादेशो निपात्य 'उद्घनः' इति सिद्धम् । अतः हस्य घत्वे च इति पाठस्थाने हनश्च घनादेशो निपात्यते पाठो युक्तः ।

पृष्ठसंख्या 330, सूत्रसंख्या 3258 अपघनोऽङ्गम् (3-3-81) अङ्गं शरीरावयवः । स चेह न सर्वः किं तु पाणिः पादश्चेत्याहुः । करणेऽप् ।

**बालमनोरमा -**

अपघनोङ्गम् । अङ्गं वाच्यं चेद् अपपूर्वाद्घन्तेप् । हस्य घत्वे चापघन इति निपात्यत इत्यर्थः ।

**बालमनोरमा -**

अपहन्यतेऽनेनेति अपघनः । अपपूर्वाद् हन्धातोः अप् प्रत्ययः, हस्य घत्वं निपातनात् 'अपघनः' इति सिद्धम् ।

**विमर्शः -**

अप + हन् इति स्थिते 'अपघनोऽङ्गम्' इत्यनेन अप्प्रत्ययो हनश्च घनादेशो निपात्यते, स्वादिकार्ये 'अपघनः' इति ।

अतः हस्य घत्वे इति पाठस्थाने हनश्च घनादेशे निपात्यते इति पाठो युक्तः ।

पृष्ठ सं. 360 'अदोऽजग्धिः' (सूत्रसंख्या 3080) 'अन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब्बाधते' जग्धिविधा ल्यब्ग्रहणात् । तेन हित्वदत्त्वात्त्वेत्त्वदीर्घत्वशूठिटो ल्यपि न । विधाय । प्रदाय ।

**बालमनोरमा -**

तथा प्रदायेत्यत्र तादौ किति विहितमित्त्वं ल्यपः प्रागेवान्तरङ्गत्वात् प्राप्नोति ।

**बालमनोरमा-**

प्र + दा धातोः क्त्वाप्रत्यये अनुबन्धलोपे प्र + दा + त्वा इति स्थिते ''घुमास्थागा-पाजहातिसां हलि''[31] इत्यनेन ल्यपः प्रागेवान्तरङ्गत्वात् इत्वं प्राप्नोति ।

विमर्शः -

प्र + दा धातोः क्त्वाप्रत्यये, अनुबन्धलापे प्र + दा + त्वा इति स्थिते 'घुमास्था-गापाजहातिसां हलि' इत्यनेन इत्त्वं प्रबाध्य 'दो दद् घोः'[32] इत्यनेन दत्त्वे प्राप्ते 'अदो जग्धिाल्र्यप्ति किति' इति सूत्रस्य ल्यब्ग्रहणेन ज्ञापितया 'अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधते' इति परिभाषया दत्त्वं प्रबाध्य क्वोर्ल्यपि कृदन्तत्वात् सौ अव्ययत्वात् सुप्लुकि प्रदाय इति सिद्धम् ।

अतः विहितमित्वं पाठस्थाने विहितं दत्त्वं पाठो युक्तः ।

पृष्ठसंख्या 361 सूत्रसंख्या 2509 विभाषा लीयतेः विलाय । विलीय ।

**बालमनोरमा -**

लीङः क्त्वो ल्यपि आत्वविकल्पं स्मारयति । विभाषा लीयतेरिति ।

**बालमनोरमा -**

लीङ्दिवादिधातोः 'समानकर्तृकयोः पूर्वकाले' इत्यनेन क्त्वाप्रत्यये, ली + त्वा । विली + त्वा इति स्थिते 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इत्यनेन ल्यपि विली + य इति स्थिते 'विभाषा लीयते' इत्यनेन विकल्पेन आत्वे विलाय विलीय इति रूपद्वयं सिद्धम् ।

**विमर्शः -**

'विभाषा लीयतेः' इत्यत्र लीङश्लेषणे दि., लीश्लेषणे इति क्र्यादिः, तयोरुभयोरपि यका निर्देशः स्मर्यते ।

यदि दैवादिक एवात्र निर्देष्टुमभीष्टः स्यात् अनुबन्धेन लीङ् निर्देशं कुर्यात् । तस्मात् साधारणेनागन्तुकेन यकायमुभयोनिर्देशः । अतः लीङ् इति पाठस्थाने लीङ श्लेषणे दि., ली श्लेषणे क्र्या. इति उभयोः क्त्वो ल्यपि आत्वविकल्पं स्मारयति विभाषा लीयतेरिति पाठो युक्तः।

पृष्ठसंख्या 368, सूत्रसंख्या 3354 चेले क्नोपेः। (3-4-33)

**बालमनोरमा -**

क्नूयी शब्दे इति भ्वादौ ।

**विमर्शः -**

क्नूयी शब्दे उन्दने च । उन्दनं क्लेदनम् । क्षीरतरङ्ग्गिण्यां पाठो वर्तते न तु क्नूयी शब्दे इति । अतः क्नूयी शब्दे इति पाठस्थाने क्नूयी शब्दे उन्दने च इति पाठो युक्तः।

**तत्त्वबोधिनीविमर्शः**

पृष्ठसंख्या 40, सूत्रसंख्या 2901 ददातिदधात्योर्विभाषा । (3-2-139) शः स्यात् । ददः । दधाः ।

**तत्त्वबोधिनी-**

ददः । दधा इति । श परे जुहोत्यादिभ्यः - इति श्लुः । श्लौ इति द्वित्वम् । अपित्सार्वधातुकस्य शस्य ङित्त्वाद् 'आतो लोपः' इत्यालोपः ।

**तत्त्वबोधिनी -**

ददाति इत्यर्थे दा धातोः 'ददातिदधात्योविभाषा' इत्यनेन शप्रत्यये, अनुबन्धलोपे दा + अ इति स्थिते शित्त्वात्सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति शपि, 'जुहोत्यादिभ्यः श्लुः' इति शपः श्लुः । 'श्लौ' इति धातोर्द्वित्वे 'दा दा अ' इति स्थिते 'पूर्वोभ्यासः' इति अभ्याससंज्ञायां 'ह्रस्वः' इति अभ्यासस्य ह्रस्वे ददा + अ इति जाते 'आतो लोप इटि च'[33] इति च इति आलोपे विभक्तिकार्ये ददः इति सिद्धम्।

**विमर्शः -**

ददा + अ इति स्थिते शप्रत्ययस्य 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकसंज्ञा वर्त्तते । शप्रत्ययस्य आर्धधातुकत्वाभावात् 'आतो लोप इटि च' इत्यनेन आकारस्य लोपा न भवति। अत्र 'श्नाऽभ्यस्तयोरातः'[34] इत्यनेन आतो लोपो भवति ततः 'ददः' इति सिद्धम् ।

अतः 'आतो लोप इटि' च इति पाठस्थाने 'नाभ्यस्तयोरातः इति पाठो युक्तः ।

पृष्ठ 308, सूत्रसंख्या 3173 भीमादयोऽपादाने (3-4-74) । भीमः ।

**तत्त्वबोधिनी -**

भीमः । भीष्म इति । 'भियो हेतुभये षुक्' इति मप्रत्ययसंनियोगेन वैकल्पिकः षुक् ।

**विमर्शः** - बिभेति अस्मात् जनाः इत्यर्थे 'ञिभी भये' धातोः 'भियो हेतुभये षुक्' इत्यनेन षुगागमो न भवति । अत्र 'भियः पुग्वा इति उणादिसूत्रेण विकल्पेन षुगागम', मप्रत्ययश्च भवति । ततः भीमः, भीष्मः इति रूपद्वयं सिद्धं भवति ।

अतः 'भियो हेतुभये षुक्'[35] इति पाठस्थाने 'भियः षुग्वा'[36] पाठो युक्तः ।
पृष्ठसंख्या 334 'ति च' (सूत्र 3037) । चूर्तिः ।

**तत्त्वबोधिनी -**

चूर्तिरिति । 'ति च' इति 'चरफलोरुत्वे' 'र्वोरुपधाया दीर्घः' इति दीर्घः ।

**तत्त्वबोधिनी -**

चरणं चूर्तिः । चर गतिभक्षणयोः भ्वा. प. से. धातोः भावे 'स्त्रियां क्तिन्' इति सूत्रेण क्तिन्, ककारनकारयोरनुबन्धलोपे चर् + ति इति स्थिते 'ति च' इत्यनेन उत्वे चुर् + ति इति स्थिते 'र्वोरुपधाया दीर्घः' इत्यनेन उकारस्य दीर्घे, स्वादिकार्ये 'चूर्तिः' इति सिद्धम् ।

**विमर्शः -**

चर् + ति इति स्थिते 'ति च' इत्यनेन, उत्वे चुर् + ति इति स्थिते 'र्वोरुपधाया दीर्घ इकः' इति सूत्रं प्रबाध्य 'हलि च' इत्यनेन दीर्घो भवति चूर् + ति इति स्थिते, स्वादिकार्ये चूर्तिः।

अतः 'र्वोरुपधाया दीर्घ इकः'[37] इति पाठस्थाने 'हलि च'[38] इति पाठो युक्तः ।
पृष्ठसंख्या 360 तत्त्वबोधनी-प्रदायेति । 'दो दद्धोः' इति दीर्घो न ।

**विमर्शः -**

प्रदाय इत्यत्र 'दो दद्घोः' इति दीर्घो न भवति । दत्त्वं भवति । अतः 'दो दद्घोः'[39] इति दीर्घो न इति पाठस्थाने दत्त्वं न इति पाठो युक्तः ।

**सन्दर्भाः**

1. पुगन्तलघुपधस्य च (7.3.86) ।
   पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्यात् सार्वधातुककार्धधातुकयोः ।
2. क्ङिति व (1.1.5) ।
   गित् कित् ङिन्निमित्ते इग्लक्षणे गुणवृद्धि न स्तः ।
3. मृजेर्वृद्धिः 7.2.114 ।
   मृजेरिको वृद्धिः स्याद् धातुप्रत्यये परे सार्वधातुकार्धधातुकयोः ।
4. खित्यनव्यस्य (6.3.66) खिदनते परे पूर्वपदस्य ह्रस्वः स्यात् ।
5. अरुर्द्विषदजन्तस्य मुम् (6.3.67) अरुषो द्विषतोऽजन्तस्य च मुमागमः स्यात्खिदन्त उत्तरपदे, न त्वव्ययस्य ।
6. आतश्चोपसर्गे (3.1.136) उपसर्गे उपपदे आदन्ताद्धातोः कः स्यात् ।

7. आतो लोप इटि च (6.4.64) अजाद्योरार्धधातुकयोः क्ङिदिटोः परयोरातो लोपः ।
8. सुपि स्थः (3.2.4) सुप्युपपदे स्थाधातोः कः स्यात् ।
9. पतिष्ठत इति प्रष्ठः, 'सुपि स्थः' इति कप्रत्ययः (न्यासः 8.3.92) ।
10. अरुर्द्विषदजन्तस्य मुम् (6.3.67) अरुषो द्विषतोऽजन्तस्य च मुमागमः स्यात्खिदन्त उत्तरपदे, न त्वव्ययस्य ।
11. खचि ह्रस्वः (6.4.94) खचि परे णौ उपधायाः ह्रस्वः स्यात् ।
12. सम्प्रसारणाच्च (6.1.108) सम्प्रसारणादचि पूर्वरूपमेकादेशः ।
13. हलः (6.4.2) अङ्गावयवाद्धलः परं यत्सम्प्रसारणं तदन्तस्य दीर्घः ।
14. आदेच उपदेशेऽशिति (6.1.44) उपदेशे एजन्तस्य धातोरात्त्वं न तु शिति ।
15. 'विद विचारणे' (ध. पा. 1451) इत्यस्य विदेरिह ग्रहणमिष्यते । एवं ग्रहणमिष्यते । एवं ह्युक्तम् - वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते । विन्तेर्विन्नश्च वित्तश्च भोगवित्तश्च च विदन्तेः । इति (काशिका 8.2.56)
16. नुदविद्रुधुन्दत्राघ्राह्रीभ्योऽतरस्याम् (8.2.56) नुद प्रेरणे तु. विद विचारणे रुधा, उन्दी क्लेदने रुधा. त्रैङ् पालने भ्वा. घ्रा गन्धोपादाने भ्वा ह्री लज्जायाम् जुहो. इत्येभ्यो धातुभ्यः परस्य विकल्पेन निष्ठाकारस्य नकारादेशो भवति ।
17. रदाभ्यां निष्ठातो नः पूर्वस्य च दः । (8.2.45) रदाभ्यां परस्य निष्ठातस्य नः स्यात् । निष्ठापेक्षया पूर्वस्य धातोर्दस्य च ।
18. स्वरतिसूतिसूयतिधूञूदितो वा । (7.2.44) स्वृशब्दोपतापयोः भ्या. प. षूङ् प्राणिगर्भविमोचने अदा. आ., षूङ् प्राणिप्रसवे दि. आ. धूञ् कम्पने स्वा. क्र्या. उ. गुपू, गाहू प्रभृतिधातुभ्यः परस्य वलादेरार्धधातुकस्येङ् वा स्यात् ।
19. उदितो वा । (7.2.56) उदितः परस्य क्त्व इड् वा ।
20. उपान्वध्याङ्वसः (1.4.48) उपादिपूर्वस्य वसतेराधारः कर्म स्यात् । उपवसति अनुवसति अधिवसति आवसति वा वैकुण्ठं हरिः ।
21. अभुक्त्यर्थस्य न (वा 1087) भोजननिवृत्तिवाचकस्य वसेराधारस्य कर्मत्वप्रतिषेधो भवति । वने उपवसति ।
22. कालाध्वनोरत्यन्तसंयोगे (2.3.5) इह द्वितीया स्यात् । मासं कल्याणी । मासामधीते । मासं गुडधानाः । क्रोशं कुटिला नदी । क्रोशमधीते नदी । क्रोशं गिरिः ।
23. लाभ इति । कर्मण्येव घञ् । (न्यासः 3.3.19)

24. अचो ञ्णिति । (7.2.115) अजन्ताङ्गस्य वृद्धिर्ञिति णिति च परे । सखायौ ।
25. आदेच उपदेशेऽसिति । (6.1.45) उपदेशे एजन्तस्य धातोरात्वं न तु शिति । जग्लौ ।
26. आतो युक् चिण्कृतोः । (7.3.33) आदन्तानां युगागमः स्याच्चिणि ञ्णिति कृति च । दायिता ।
27. चजोः कु घिण्ण्यतोः । (7.3.52) चजोः कुत्वं स्यात् घिति ण्यति च परे । घिति-पाकः, त्यागः रागः । ण्यति पाक्यम् । वाक्यम् ।
28. हो हन्तेर्ञ्णिन्नेषु । (7.3.54) ञिति णिति प्रत्यये नकारे च परे हन्तेर्हकारस्य कुत्वम् ।
29. हनस्तोऽचिण्णलोः (7.3.32) हनस्तकारादेशो भवति, ञिति णिति च परतः चिण्णलौ वर्जयित्वा ।
30. अत उपाधायाः (7.2.116) उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये परे ।
31. घुमास्थागापाजहातिसां हलि (6.4.66) एषामात ईत् स्यात् हलादौ क्ङित्यार्धधातुके ।
32. दो दद् घोः । (7.4.46) घुसञ्ज्ञकस्य दा इत्यस्य 'दथ्' स्यात् तादौ किति ।
33. आतो लोप इटि च (6.4.64) अजाद्योरार्धातुकयोः क्ङिदिटोः परयोरातो लोपः स्यात् ।
34. श्नाऽभ्यास्तयोरातः (6.4.112) अनयोरातो लोपः क्ङिति सार्वधातुके ।
35. भियो हेतुभये षुक् । (7.3.40) भी इत्येतस्य हेतुभयेंऽर्थे षुगागमो भवति णौ परतः । मुण्डो भीषयते ।
36. भियः षुग्वा । उणादिसूः (1.145) भीधातोः मक् स्यात् धातोः षुगागमश्च वा स्यात् ।
37. र्वोरुपधाया दीर्घ इकः । (8.2.76) रेफवान्तयोर्धात्वोरुपधाया इको दीर्घः पदान्ते । गीः । द्यूः । पूः ।
38. हलि च । (8.2.77) रेफवान्तस्य धातोरुपधाया इको दीर्घो हलि । आस्तीर्णम्, विस्तीर्णम् । दीव्यति । सीव्यति ।
39. दो दद्घोः (7.4.46) द्युसञ्जकस्य दा इत्यस्य 'दथ्' स्यात् तादौ किति ।

**सहायकाचार्यः (व्याकरणम्)**
जगद्गुरुरामानन्दाचार्यसंस्कृतविश्वविद्यालयः,
जयपुरम्

★★★

# व्याकरणमहाभाष्यदृष्ट्या 'वृद्धिरादैच्' सूत्रविमर्शः

✍डॉ.अशोकचन्द्रगौडशास्त्री

**प्रस्तावना**

द्विपदमिदं सूत्रम् । वृद्धिः आदैच् । आच्च ऐच्च इत्यनयोः समाहारः आदैच् । तत्र बालमनोरमाकारः आच्च ऐच्च इति आदेच् इति इतरेतरयोगद्वन्द्वसमासः सौत्रमेकवचनं च स्वीकरोति । सिद्धान्तकौमुदीकारस्तु आदैच् वृद्धि संज्ञः स्याद् इत्येवार्थं विधाय विरमति । किन्तु काशिकाकारः वक्ति यत् वृद्धिः शब्दः संज्ञात्वेन विधीयते प्रत्येकमादैचां तद्भावितानाम् अतद्भावितानाञ्च । अयमेवाऽर्थो न्याय्यः । आश्वलायन, ऐतिकायनः, औपगवः, औपमन्यवः, शालीयः, मालीयः इत्युदाहरणानि ।

व्याकरणमहाभाष्ये भगवता पतञ्जलिना प्रथमाध्याये तृतीयाह्निके 'वृद्धिरादैच'[1] इति सूत्रस्य भाष्ये षड् विषयाः प्रतिपादिताः -

1. वृद्धिरादैच् सूत्रे कुत्वविवेचनम् ।
2. तद्भावित-अतद्भावितानाम् आदैचां संज्ञाविवेचनम् ।
3. संज्ञाधिकारप्रत्याख्यानम् ।
4. 'वृद्धि' शब्दस्य आदौ प्रयोगस्य मङ्लार्थत्वम् इतरेतराश्रयदोषसमाधानञ्च ।
5. प्रत्येकशब्दं विनापि आ ऐ औ वर्णानां प्रत्येकस्य वृद्धिसंज्ञाविधानम् ।
6. आदैच् इत्यत्र तपरकरणविवेचनम् ।

**कुत्वविवेचनम्**

'वृद्धिरादैच्'[2] इति सूत्रे 'चोः कुः'[3] इति सूत्रेण पदान्तस्य चस्य कुत्वं न भवति, 'अयस्मयादीनि छन्दसि'[4] इत्यनेन भसंज्ञाविधानात् । 'छन्दोवत् सूत्राणि भवन्ति' इत्युक्तेः 'उभयसंज्ञान्यपि छन्दसि दृश्यन्ते' इति वचनात् 'वृद्धिरादैजदेङ् गुणः' इति संहितापाठपक्षे 'झलां जशोऽन्ते'[5] इत्यनेन पदान्ते विहितं जश्त्वं तुभवत्येव ।

**तदभावित-अतद्भावितसंज्ञाविवेचनम्**

पुनः भाष्यकारेण प्रश्नोऽयमुत्थापितः यदत्र तद्भावितानामादैचां ग्रहणं भवति । अतद्भावितानां ग्रहणं भवति? आदैज्मात्रस्य वा ग्रहणं भवति? तत्र भाष्यकारेण आदैज्मात्रस्य ग्रहणपक्ष एव समर्थितः ।

अर्थात् तद्भावितानाम् अतद्भावितानाञ्च आदैचां वृद्धिसंज्ञा भवति । तद्भावित-मात्रस्वीकारे शालीयः मालीयः इत्यत्रः वृद्धिसंज्ञाया अभावे 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्'[6] इत्यनेन वृद्धसंज्ञाभावात् 'वृद्धाच्छ[7]' इत्यनेन वृद्धलक्षणः छप्रत्यया न प्राप्नोति । आम्रमयम् इत्यादौ 'नित्यं वृद्धशरादिभ्यः'[8] इत्यनेन वृद्धलक्षणः मयड् न प्राप्नोति । आम्रगुप्तायनिः इत्यादौ 'उदीचां वृद्धादगोत्रात्'[9] इत्यनेन (आम्रगुप्तस्य अपत्यम् आम्रगुप्तायनिः) इति अपत्यार्थे फिञ् न प्राप्नोति ।

आदैज्मात्रस्य वृद्धिसंज्ञेति पक्षस्वीकारे सर्वोभासः सर्वभासः इति कर्मधारयसमासे 'उत्तर-पदवृद्धौसर्वञ्च'[10] इत्यनेन सर्वशब्दस्य अन्तोदात्तत्वप्राप्तिरूपो दोषो नास्ति, उत्तरपदस्य वृद्धिः उत्तरपद्वृद्धिस्तस्याम् उत्तरपदवृद्धौ इत्येष विग्रहो नास्ति, अपितु, 'उत्तरपदस्य'इत्येवं प्रकृत्य सा वृद्धिः तद्वति उत्तरपदे इत्ययमेवार्थो वर्तते । किञ्च तावतीभार्य यस्य तादव्भार्यः इत्यत्र 'वृद्धि-निमित्तस्य च तद्धितस्यारक्तविकारे'[11] इत्यनेन पुंवद्भावप्रतिषेधप्राप्तिरूपः दोषोऽपि नास्ति । यतो हि नैवं विज्ञायते वृद्धर्निमित्तं वृद्धिनिमित्तम् तस्य वृद्धिनिमित्तस्य, अपितु वृद्धेर्निमित्तम् यस्मिन् सोऽयं वृद्धिनिमित्तः तस्य वृद्धिनिमित्तस्येति विज्ञायते । वृद्धेर्निमित्तः ककारः ञकारः णकारो भवति । अथवा कृत्स्नायाः वृद्धिः-आकार-ऐकार-औकाराणाम् यद् निमित्तम् तस्य इत्येष अर्थः स्वीकर्तव्यः । एवं भाष्यकारेण स्वीकृतं यद् आदैज्मात्रस्य वृद्धिसंज्ञा भवति ।

**संज्ञाधिकारप्रत्याख्यानम्** -

संज्ञाधिकारः संज्ञासम्प्रत्ययार्थः इति वचनमुखेन भाष्यकारेण प्रश्न उत्थापितो यत् संज्ञाबोधनाथ संज्ञाधिकारः कर्तव्यः । अथ संज्ञा इत्येव प्रकृत्य वृद्ध्यादयः शब्दाः पठितव्याः । तत्र प्रयोजनमिदमस्ति यद् अक्रियमाणे संज्ञाधिकारे वृद्ध्यादीनांसंज्ञेत्येष सम्प्रत्ययो न स्यात् एवं बहुसूत्रमनर्थकं स्यात् । लोकेऽपि देवदत्त गामभ्याज शुक्लां दण्डेन इत्यादीनि अर्थवन्ति वाक्यानि, दश दाडिमानि षडपूपाः इत्यादीनि अनर्थकानि च वाक्यानि दृश्यन्ते । किञ्च क्रियमाणेऽपि संज्ञाधिकारे संज्ञासंज्ञिनोरसन्देहो वक्तव्यः । कुतो ह्येतत् वद्धिशब्दः संज्ञा, आदैचः संज्ञिनः इति । न पुनरादैचः संज्ञा, वृद्धि शब्दः संज्ञीति ।

अन्तेभाष्यकारः समाधानं करोति यत् संज्ञाधिकारो न कर्तव्यः संज्ञासम्प्रत्ययार्थः । आचार्याचारात् संज्ञासिद्धिर्भविष्यति । लोके तावत् मातापितरौ पुत्रस्य जातस्य संवृतेऽवकाशे नाम कुर्वाते देवदत्तो यज्ञदत्त इति । तयोरुपचारादन्येऽपि जानन्ति इयमस्य संज्ञेति । वेदे याज्ञिकाः यूपश्चालः इति । तत्र भवतामुपचारादन्येऽपि जानन्ति इयमस्य संज्ञेति । एवमिहापि । इहैव केचिद् व्याचक्षाणाआहुः वृद्धि शब्दः संज्ञा, आदैचः संज्ञिन इति । अपरे पुनः 'सिचि[12]वृद्धिः' इत्युक्त्वा आकार-ऐकार औकारानुदाहरन्ति । तेन मन्यामहे यया प्रत्याय्यन्ते सा संज्ञा, ये प्रतीयन्ते ते

संज्ञिनः। तत्र का संज्ञा कः संज्ञीति संशये अनाकृतिः संज्ञा, यो गुरुः सः संज्ञो । आवर्तिन्यः संज्ञाः । पूर्वोच्चारितः संज्ञी, परोच्चारितासंज्ञा इति व्यवस्थापनेन सकलेष्टासिद्धिः ।

**क ) वृद्धिशब्दस्य मङ्गलार्थत्वम्**

ननु 'अदेङ्गुण'[13]इत्यादिवत् आदैज्वृद्धिः इतिकथं न पठितम्, कथम् वृद्धिरादैजिति? इति शङ्कायां भाष्यकारो वदति यद् एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम् । माङ्गलिक आचार्यः महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्त । मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्ति । आयुष्मत्पुरुषकाणि चाध्येतारश्च वृद्धियुक्ताः यथा स्युरिति ।

**ख ) इतरेतराश्रयदोषपरिहारः**

किञ्च सतः संज्ञिनः संज्ञाभावात् तदाश्रये संज्ञिनि वृद्ध्यादिषु इतरेतराश्रयत्वादप्रसिद्धिः । का इतरेतराश्रयता? इति शङ्कायामाहभाष्यकारः सतामादैचां संज्ञया भवितव्यम्, संज्ञया चादैचो भाव्यन्ते । तदितरेतराश्रयं भवति । इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते । तद्यथा नौर्नावि बद्धा नेतरत्राणाय भवति । ननु च भोः इतरेतराश्रयाण्यपि कार्याणि दृश्यन्ते । तद्यथा नौः शकटं वहति, शकटञ्च नावं वहति । तत्रान्यदपि किञ्चिद् भवति-जलं स्थलं वा । स्थले शकटं नावं वहति, जलं नौ शकटं वहति । यथा च त्रिविष्टब्धकम् । तत्राप्यन्ततः सूत्रकं भवति । एवन्तर्हि नित्य-शब्दत्वात् इतरेतराश्रयदोषो नास्ति । नित्याः शब्दाः । नित्येषु शब्देषु सतामादैचां संज्ञाक्रियते, न च संज्ञयाऽऽदैचो भाव्यन्ते । पुनः यदि नित्याः शब्दाः, किमर्थं शास्त्रम् इति शङ्कायामाह-भाष्यकारः-निवर्तकं शास्त्रमिति । मृजिरस्मै अविशेषेणोपदिष्टः । तस्य सर्वत्र मृजि बुद्धिः प्रसक्ता। तत्र 'मृजर्वृद्धिः'[14] इत्यनेन सूत्रेण निवृत्तिः क्रियते यत् कित्ङित्भिन्नेषु प्रत्ययेषु परतः मृजि प्रसङ्गे 'मार्जिः' इति वृद्धियुक्तं रूपं साधु भवति ।

**'प्रत्येक'ग्रहणप्रत्याख्यानम् -**

ननु वृद्धिरादैच अदेङ्गुण इत्यादौ आदैच् अदेङ् इति समुदायस्य वृद्धिगुणसंज्ञे प्राप्नतः, तन्निरासाय प्रत्येकं वृद्धिगुणसंज्ञे भवत इति वक्तव्यम् इति शङ्कायामाहभाष्यकारः - अन्यत्र सहवचनात् समुदाये संज्ञाऽप्रसङ्गः । अन्यत्र सहवचनात् समुदाये वृद्धिगुणसंज्ञयोरप्रसङ्ः । आचार्य यत्रेच्छति सहभूतानां कार्यं तत्र सहग्रहणं करोति । यथा सहगुणा इत्यादिप्रत्यवयवं च वाक्यपरिसमाप्तेः इत्युक्त्वा प्रदर्शिते अन्यस्मिन् दृष्टान्ते प्रतिपादितं यत् प्रत्यवयवञ्च वाक्यस्य परिसमाप्तिर्दृश्यते । यथा -देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्ताम् इत्यत्र नोच्यते प्रत्येकमिति । पत्येकं च भुजिः परिसमाप्यते । तद्वदत्रापि प्रत्येकं वृद्धिगुणसंज्ञे भविष्यतः । किञ्च समुदाये वाक्य-परिसमाप्तिः इति पक्षेऽपि-गर्गाः शतं दण्ड्यन्ताम् इत्यत्र अर्थिनश्च राजानो हिरण्येन भवन्ति, न च

प्रत्येकं दण्डयन्ति । तत्र दृष्टान्ते यदि सहग्रहणं क्रियते तर्हि अत्र प्रत्येकग्रहणं कर्त्तव्यम् । यदि तत्रान्तरेण सहग्रहणेन सहभूतानां कार्यं भवति, तर्हि अत्रापि नार्थः प्रत्येकमिति वचनेन । तस्मात् लक्ष्यानुरोधात् प्रत्येकं वाक्यपरिसमाप्तिरिति न्यायात् समुदायसंज्ञापत्तिदोषः भाष्यकारेण निराकृतः ।

**तपरकरणप्रयोजनम्** -

'वृद्धिरादैच्' इति सूत्रे 'आत्' इत्यत्र तपकरणं क्रियते' 'तपरस्तत्कालस्य' इत्यनेन तत्कालानां सवर्णानाम् उदात्तानुदात्तस्वरितानां ग्रहण यथा स्यात् । किं च कारणं न स्यात्? इति प्रश्ने भाष्यकार आह भेदका उदात्तादयः । दृश्यते लोके यद् उदात्ते कर्तव्ये अनुदात्तं, यदि शिष्यः पठति तर्हि खण्डिकोपाध्यायस्तस्मै चेपटां ददाति, अन्यत् त्वंकरोषीति । किञ्च भेदका गुणाः । यथा जलन्तु एकमेव । किन्तु गुणभेदात् इदं उष्णं जलम्, इदं शीतं जलमिति प्रतीयते । ननु च भोः अभेदका गुणा अपि दृश्यन्ते-देवदत्तः बालः युवा मुण्डीत्यपि स्वामाख्यां न जहाति ।

अत्र भाष्यकारः अभेदका गुणा इति पक्ष समर्थयन्नाह- 'अस्थिदधिक्थ्यक्ष्णामनङुदात्तः[15]' इति सूत्रे यदुदात्तग्रहणं करोति तद् ज्ञापयत्याचार्योऽभेदका गुणा इति । यदि हि भेदका गुणा उदात्तमेवाच्चारयेत् । तेनउदात्त अनङ्वत् अनुच्चारितस्य अनुदात्तस्य अनङो ग्रहणं न भवति । यदि अभेदका गुणाः अनुदात्तादेरन्तोदात्ताच्च यदुच्यते तत् स्वरितादेः स्वरितान्ताच्च प्राप्नोति । नैष दोषः आश्रीयमाणो गुणो भेदको भवति । तद्यथा- शुक्लमालभेत । इति । तत्र यः शुक्ले आलब्धव्ये कृष्णमालभते नहि तेन यथोक्तं कृतं भवति ।

असन्देहार्थस्तर्हि तकारः । ऐच् इत्युच्यमाने सन्देहः स्यात् किम् इमावैचावेव आहोस्विद् आकारोऽप्यत्र निर्दिश्यते । सन्देहमात्रमेतद् भवति । तत्र 'व्याख्यानतो विशेषप्रतिपत्तिर्नहि-सन्देहादलक्षणम्' इति परिभाषया त्रयाणां ग्रहणमितिव्याख्यास्यामः । अत्र आन्तर्यतः त्रिमात्र-चतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशाः न स्युः । एतदर्थं तपरकरणम् 'तपरस्तत्कालस्य'[16] तः परो यस्मात्, तादपि तपर इतिनियमात् त्रिमात्रचतुर्मात्रस्थानिनां त्रिमात्रचर्तुमात्रा आदेशा न भवन्ति । अतः असन्देहार्थस्तकारः मुखसुखार्थकाः इत्येवं रूपेण भाष्यकारेण 'आत्' इत्यत्र तपरकरणं समर्थितम् ।

**सन्दर्भाः**

1. पाणिनि-अष्टाध्यायी 1.1.1 ।
2. तदेव 1.1.1 ।
3. तदेव 8.2.30 ।

4. तदेव 1.4.20 ।
5. तदेव 8.2.39 ।
6. तदेव 1.1.73 ।
7. तदेव 4.2.114 ।
8. तदेव 4.3.144 ।
9. तदेव 4.1.157 ।
10. तदेव 6.2.105 ।
11. तदेव 6.3.39 ।
12. तदेव 7.2.1 ।
13. तदेव 1.1.2 ।
14. तदेव 7.2.114 ।
15. तदेव 7.1.75 ।
16. तदेव 1.1.70 ।

**सन्दर्भग्रन्थः**

1. पतञ्जलि-व्याकरणमहाभाष्यम् (नवाह्निकभागः) प्रदीपोद्योतसहितः राष्ट्रिय संस्कृतसंस्थाानम् नवदेहली ।

**सहायकग्रन्थाः**

1. पाणिनि-अष्टाध्यायीसम्पा. श्रीगोपालदत्तपाण्डेयः चौखम्बासुरभारतीप्रकाशनवाराणसी, 2008 ई.
2. भट्टोजिदीक्षित-वैयाकरणसिद्धान्तकौमुदी-प्रथमभागः बालमनोरमाव्याख्या समलङ्कृता-सम्पा. श्रीगोपालदत्तपाण्डेय चौखम्बासुरभारतीप्रकाशनवाराणसी 2014 ई.
3. वामनजयादित्य-काशिकावृत्तिचौखम्बाविद्याभवनवाराणसी ।

**राष्ट्रियसंस्कृतसंस्थानम**
**वेदव्यासपरिसरः, गरली**
**हिमाचलप्रदेशः**

★★★

# महाभाष्यस्थः 'हलोऽनन्तराः संयोगः' इति सूत्रविचारः

✍प. सुभाषचन्द्रमीणा

योगो नाम सम्बन्धः । संयोगः समान सम्बन्धः । संयोगसंज्ञा सूत्रं पाणिनिविरचिता- दष्टाध्यायीस्थप्रथमाध्याये प्रथमपादे सप्तसंख्याकत्वेन महामुनिना भगवता स्वीकृतम् । इदमेवसूत्रं पतञ्जलिविरचितमहाभाष्ये चतुर्थाह्निके सम्यक् सविस्तृतं विवृतम् । तदेव अहं तेषां विचाराणां कांश्चन बिन्दून् प्रस्तौमि - अस्मिन् सूत्रे त्रीणि पदानि सन्ति - हलः, अनन्तराः, संयोगः इति । विद्यतेऽन्तरं येषां ते अनन्तराः, एकस्मिन् पदे अनेकहल्वर्णानाम् उत एकाधिकहल्वर्णानां मेलनं सम्मेलनं वा यत्र परिलक्ष्यते तत्र संयोगसंज्ञा शाब्दिकैः परिगीयते । यथा - इन्द्रः, राष्ट्रः, क्षत्रिय इत्यादिषु पदेषु अचा रहित हल् वर्णानां एकाधिकानां मेलनं वर्तते, अतः इन्द्र इत्यत्र न् द् र् वर्णानां संयोगसंज्ञा, राष्ट्रम् इत्यत्र ष् त् र् वर्णानां संयोगसंज्ञा, क्षत्रिय क् ष् र् इत्येषां संयोगसंज्ञा । एवं रूपेण वाङ्मये विद्यमानानां पदानां पदेषु वा संयोगसंज्ञा वर्णत्रयस्य संयोगसंज्ञा अथवा पृथक्त्वेन संयोगसंज्ञा एकाधिकानां संज्ञा इति चेत् उच्यते । भिन्नजातीयैरज्भिरव्यवहिताः श्लिष्टोच्चारिता हलः संयोगसंज्ञा भवन्ति । समुदायः संज्ञी । जातौ चेदं बहुवचनम् । तेन द्वयोर् बहूनां च संयोगसंज्ञा सिद्धा भवति । यथा अग्निः इत्यत्र ग्नौ, अश्व इत्यत्र श्वा, कर्ण इत्यत्र र्णौ, इन्द्रः, चन्द्रः, मन्द्रः इत्यत्र नदराः । उष्ट्रः राष्ट्रम्, भ्राष्ट्रम् इत्यत्र षटराः । हल इति किम्? तितौच्छत्रम् संयोगान्तस्य लोपः ।[4] इति लोपः स्यात् । संयोगप्रदेशाः 'संयोगान्तस्य लोपः' इत्येवम् आदयः । 'अन्तर' शब्दोऽत्र व्यवधाने वर्तते । व्यवधानं च विजातीयेनैव । अविद्यमानमन्तरं व्यवधानं येषामिति विग्रहः ।

'नञोऽस्त्यर्थाना[5]मिति विद्यमानपदस्य लोपः तदाह अज्भिरित्यादिना । तत्र हलौ च हलश्च हल इत्येकशेषः । तेन द्वयोरपि संयोगसंज्ञा लभ्यते । ततश्च शिक्षेत्यत्र 'गुरोश्च' हलः इत्यप्रत्ययः सिद्ध्यति । अत्र च समुदायस्यैव संयोगसंज्ञा, महासंज्ञाकरणात् व्याख्यानाच्च । न तु प्रत्येकम् । तथा सति 'सृदृषत्प्रासादः' इत्यत्र पकारसन्निधौ तकारस्य संयोगत्वापत्तौ संयोगान्तलोपापत्तेः । यत्र तु बहवो हलः श्लिष्टास्तत्रापि द्वयोर्द्वयोः संयोगसंज्ञा न तु बहूनामेवैति शब्देन्दुशेखरं स्पष्टम् । गुणवृद्ध्याद्याः संज्ञाः यथा प्रत्येकं वर्णानां, तद्वत् प्रत्येकं हल्वर्णानां संयोगसंज्ञा उत समुदायस्य इति सन्देहः । अत्र समाधानं गगाः शतं दण्डयन्ताम् अर्थिनश्च राजानो हिरण्येन भवन्ति इति

समुदाये वाक्यपरिसमाप्तिन्यायेन संयोगसंज्ञा न तु प्रत्येकं हलः समुदासस्यैव । अपि च 'ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविषाताम्' इति ब्राह्मणभोजनन्यायः अत्र न प्रवर्तते 'अन्तरा' इति हलः विशेषणात् । अतः सृदृषद्भाति इत्यत्र 'संयोगान्तस्य लोपः' इति सूत्रेण लोपः न प्रवर्तते । संयुज्यन्ते वर्णाः यत्र असौ संयोग इति अन्वर्थसंज्ञाबलेन महासंज्ञाकरणाच्च संयोगसंज्ञा न प्रत्येकं किन्तु समुदायस्यैव कैयटाभिमतम् ।

तत्र नागेशमहाशयानां विचारः - संयोग संज्ञा अन्वर्थसंज्ञाबलेन प्रत्येकं संयोगसंज्ञा भवितुं नार्हति इति यदुक्तं तन्न । यतो हि घटपादौ संयुज्येते यत्र इत्यत्र संयुज्यमानपदातिरिक्तान्यपदार्थस्य प्रतीतिः । तद्वत् संयुज्यन्ते यत्र इत्यत्रापि संयुज्यमानातिरिक्तपदस्य वाक्यस्य वा प्रतीत्या तस्य संयोगसंज्ञा स्यात् । व्रीहयः संयुज्यन्ते यत्र राशौ इति यथा व्रीहीणां ग्रहणं भवति तद्वदत्रापि इति चेत् । तत्र व्यपदेशिवद्भावेन भेदप्रतीतिः । एवं च यत्रातिरिक्तान्यपदार्थस्य असम्भवः तत्र व्यपदेशिद्भावेन अदोषः । द्वयोः संयोगसंज्ञा उत बहूनाम् 'हलः' इति बहुवचननिर्देशात् बहूनां हलां संयोगसंज्ञा स्यात् न तु द्वयोः । तदा शिक्षधातोः 'गुरोश्च हलः' इति सूत्रेण अप्रत्ययाभावे 'शिक्षा' इति रूपं न सिध्येत् इति चेत् कौस्तुभकारः - हलः इति । 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्[6]' इति सूत्रेण जातौ बहुवचनम् अतः द्वयोरपि संयोगसंज्ञा तेन 'शिक्षा' इति रूपं च सिध्यति । हलः इति जातौ बहुवचनमिति वक्तुं न शक्यते यतो हि हल्शब्दरूपसंज्ञाशब्दत्वेन जातिवाचित्वाभावात् । हलः इति बहुवचनं सौत्रम् अथवा हलौ च हलश्च 'हलः' इति इत्येकशेषः । अत्र सन्देहः एकशेषः द्वन्द्वापवादः । द्वन्द्वसमासस्तु समानविभक्तावेव भवति । अतः अत्र कथमेकशेषः?

समाधानमत्र - एकशेषः समानविभक्तित्वं नापेक्षितमित्यत्र स्वरितात् संहितायामनुदात्तानाम् इति सूत्रे अनुदात्तस्य च अनुदात्तयोश्च अनुदात्तानाञ्च अनुदात्तानाम् इति भाष्यकारणाम् एकशेषनिर्देशोऽयम् इति वचनं प्रमाणम् अतः एकशेषे समानविभक्तिर्नापेक्ष्यते । तेन द्वयोरपि संयोगसंज्ञा सिध्यति । यत्र बहवः हलः संश्लिष्टाः तत्र द्वयोर्बहूनां वा अविशेषेण इति कैयटः । नागेशोपाध्यायस्तु यत्र बहवः संश्लिष्टाः तत्रापि द्वयोर्द्वयोरेव संयोगसंज्ञा न बहूनामित्याशेते । 'स्कोः संयोगाद्योरन्ते च[7]' इति सूत्रे झलि परे संयोगादिसकारककारयोः लोपविधानात् । तथा च वव्रष्ठ इत्यत्र 'वव्रश् च थ' इत्यवस्थायां श्चुत्वस्यासिद्धत्वात् शकारचकारयोः संयोगसंज्ञायां तयोः आदिसकारस्य लोपो भवति चकारस्य अल्परत्वमाश्रित्य । यदि बहूनां हलां संयोगसंज्ञा तदा शकारचकारथकाराणां संयोगसंज्ञायां सत्यां झल्परकत्वाभावात् शकारस्य लोपो न स्यात् । अतः बहूनां संयोगसंज्ञा चिन्त्या प्रयोजनाभावात् । यत्र दोषाः पवर्तन्ते तत्र भाष्यकारैः दोषाणां

परिहृतत्वाच्च । कौमुदीकारस्तावत् अज्भिरित्यत्र 'चोः कुः[8]' इत्यनेन सूत्रेण कुत्वं प्राप्नोति, यतो हि भाष्यकारैरपि 'हयवरट्' सूत्रे भाष्ये अचोऽक्षु इति प्रयोगो दर्शितः । अतः स्वरैरव्यवहिता हलः इत्यर्थं प्रत्यपादयत् ।

**भाष्यविचारः -**

महाभाष्ये तावत् अनन्तरशब्दस्य अविद्यमानम् अन्तरं येषामिति, अविद्यमाना अन्तरा इति द्विधा विग्रहं प्रदर्श्य अन्तरं कालस्य अन्तरा आधेयस्य वर्णस्य इति । तथा सति अवग्रहे संयोगसंज्ञा स्यात् इति सन्देहमुद्भाष्य नैव दोषो न प्रयोजनम् इत्युक्त्वा विग्रहद्वये दोषाभावः प्रादर्शि। एवं संयागसंज्ञायां सहग्रहणं कर्त्तव्यमन्यथा एकैकस्य संयोगसंज्ञा स्यात् । तदा 'निर्यायात्' इत्यत्र 'वान्यस्यसंयोगादेः[9]' इति सूत्रेण एत्वं प्रवर्तेत इति दोष उदभावि । ततः सहग्रहणं नैव कर्त्तव्यम् इति उक्त्वा संयोगौ आदिः यस्य सः संयोगादिः तस्य संयोगादेः इति विग्रहं प्रदर्श्य सहग्रहणं प्रत्याख्यातम् । एवमेव बहूनां संयोगासंज्ञायां 'निर्ग्लेयात्' इत्यत्र एत्वं न प्रवर्तेत यदि द्वयोः संयोगसंज्ञा । इन्दिद्रियिषति इत्यत्र नन्द्राः सयोगादयः इति सूत्रेण द्वित्वनिषेधः न स्यात् इति प्रतिपाद्य ततः द्वयोर्वा बहूनां संयोगसंज्ञायां कोऽपि न दोषः इत्यवादि भाष्यकारैः इति उक्त्वा विरमामि ।

**सन्दर्भाः -**


1. पा. अष्टाध्यायी 1/1/7 ।
2. महाभाष्ये चतुर्थाह्निके ।
3. वैयाकरणसिद्धान्तकौमुदी (संज्ञाप्रकरणम्) पृ. सं. 58 ।
4. पा. अष्टाध्यायी 8/2/23 ।
5. पा. अष्टाध्यायी 8/2/29 ।
6. पा. सू. 6/4/68 ।
7. वैयाकरणसिद्धान्तकौमुदी (हलन्तपुल्लिङ्गप्रकरणम्), पृ. सं. 453 ।
8. तत्त्वबोधिनी, पृ. सं. 39-40 ।
9. लघुसिद्धान्तकौमुदी (भ्वादिप्रकरणम्), पृ. सं. 333 ।



**सहायकाचार्यः ( व्याकरणविभागः )**

**राष्ट्रियसंस्कृतसंस्थानम्**

**क. जे. सोमैया संस्कृतविद्यापीठम्विद्याविहारः, मुम्बई**

# प्रगृह्यसंज्ञासूत्रविमर्शः

✍डॉ. माधवदत्तपाण्डेयः

**(सप्तानां प्रगृह्यसंज्ञासूत्राणां विमर्शनपरोऽयं निबन्धो महाभाष्याशयं प्रकटयति ।)**

**पाणिनिं सूत्रकारञ्च भाष्यकारं पतञ्जलिम् ।**
**वाक्यकारं वररुचिं प्रणतोऽस्मि मुनित्रयम् ॥**

भगवता पाणिनिना कृताष्टाध्यायीग्रन्थोपरि मुनिना वररुचिना प्रणीतं वार्तिकग्रन्थानुसारं भगवता पञ्जलिना व्याकरणमहाभाष्यं चकार ।

**सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः ।**
**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥**[१]

क्रमेऽस्मिन्नत्र (1) ''ईदूदेद्विवचनं प्रगृह्यम्'' सूत्रेऽस्मिन् तपरसंज्ञाविवेचनम्, द्विवचन-विशेषणताविवेचनम् प्रतिपादितम् (2) ''अदसो मात्'' सूत्रेऽस्मिन् मूत्वमीत्वयोरसिद्धत्वविवेचनम् प्रतिपादितम् (3) 'शे' सूत्रेऽस्मिन् 'शे' शब्दे अनिष्टापत्तिविवेचनम् कृतम् । (4) ''निपात एकाजनाङ्'' अस्मिन् सूत्रे पदकृत्यविवेचनं प्रतिपादितम् । (5) 'ओत्' सूत्रेऽस्मिन् सूत्रवैयर्थ-निराकरणविवेचनम् कृतम् (6) ''ऊञः ऊँ'' अत्र अनिष्टापत्तिनिवारणविवेचनं प्रतिपादितम् (7) ''ईदूतौ च सप्तम्यर्थे'' अत्र अर्थग्रहणप्रयोजनविवेचनम् प्रतिपादितम् । तत्र तपराणामीदूदेतां प्रगृह्यसंज्ञाविधाने किम्फलमितिविविच्य सति तपरत्वे प्लुतानां संज्ञा कथं स्यादिति स्पष्टं प्रतिपादयति ''ईदूदेद् द्विवचनं प्रगृह्यमिति'' सूत्रे । तपरस्तत्कालस्य इति सूत्रबलात् तत्कालानांमुदात्तानुदात्तस्वरितानां प्रगृह्यसंज्ञासिद्धये क्रियमाणे तपरे प्लुतानां प्रगृह्यसंज्ञाऽ प्रसङ्गोऽतत्कालत्वादिति चेन्न प्रगृह्यसंज्ञादृष्ट्या प्लुतस्यासिद्धतया तत्कालत्वात् सञ्ज्ञोपपत्तेः । न च ''प्लुतप्रगृह्या अचि नित्यम्'' इति सूत्रे प्लुतग्रहणेन ''सिद्धः प्लुतः स्वरसन्धिषु'' इति ज्ञापनात् कथं सिद्धत्वम्? अत एव ''अतोरोरप्लुतादप्लुते'' इति सूत्रे अप्लुतादप्लुते इति न वक्तव्यम्भवतीति वाच्यम्, स्वरसन्धिषु प्लुतस्याऽसिद्धत्वाऽभावेऽपि प्रगृह्यसंज्ञादृष्ट्या प्लुतस्याऽसिद्धत्वेन दोषपरि-हारात् ।

न च कार्यकालं संज्ञापरिमाषमिति नियमात् कार्यकालपक्षे 'प्लुतप्रगृह्या अचिनित्यम्' इत्यननैकवाक्यतापन्नप्रगृह्यसंज्ञायाः स्वरसन्धित्वात्तद्दृष्ट्याऽसिद्धत्वाभावेनाऽतत्कालत्वात्, अग्नी + इति, इत्यत्र प्लुताश्रयप्रकृतिभावस्य ''अप्लुतवदुपस्थिते'' इत्यनेन प्रतिषेधात् प्रकृत्याश्रयः प्रकृतिभावो न स्यादिति वाच्यम्, प्लुतस्याऽसिद्धत्वेन तत्कालत्वात् प्रगृह्यत्वोपपत्तेः । 'प्लुतप्रगृह्या अचि नित्यम्' इत्यस्य प्लुतभावी प्रकृत्याइत्यर्थकरणात् 'अतोरोरप्लुतादप्लुते' इति सूत्रे ''अप्लुतादप्लुते'' इति कृत्वाच्च न कश्चिदोषः । न च ''अणोऽप्रगृह्यस्याऽनुनासिकः इत्येक-वाक्यतापन्नप्रगृह्यसंज्ञा दृष्ट्या प्लुतस्याऽसिद्धत्वाऽभावादग्नी+इति'' इत्यादौ अनुनासिकप्रतिषेधो न स्यादिति वाच्यम्, यथोद्देशकालं संज्ञापरिभाषम् इति न्यायात् यथोद्देशकालं संज्ञापरिभाषम् इति न्यायात् यथोद्देशपक्षाश्रयणेन सकलेष्टसिद्धेरिति विषयेऽस्मिन् 'ईदूदेद्विवचनम्प्रगृह्यम्' इत्यत्र 'ईदूदेद्विवचनम्' इत्यस्य कियन्तोऽर्थाः भाष्यकृता प्रदर्शिताः? इति पूर्वपक्षनिराकरणपूर्वकं विमर्शः-

ननु सञ्ज्ञिनामीदादीनां द्विवचनं विशेषणमिति पक्षे इदादयो यत् द्विवचनमित्यर्थे पचेते + इति, इत्यत्र प्रगृह्यसंज्ञा न प्राप्नोति एकारस्य द्विवचनत्वाभावात् । न चारम्भसामर्थ्यात् वाच्यम्, माले+इति, इत्यादौ प्रगृह्यसंज्ञाभविष्यतीति सूत्रस्य चारितार्थ्यादिति चेन्न, संज्ञिनो द्विवचनस्य ईदादिविशेषणम् स्वीकृत्य ईदाद्यन्तं यद् द्विवचनमित्यर्थे न दोषपरिहारात् । न च माले+इति इत्यादौ प्रगृह्यसंज्ञानुपपत्तिः, एकारान्तस्य द्विवचनत्वाऽभावादिति वाच्यम्, 'आद्यन्तवदेकस्मिन्' इत्यने-नान्तवद्भावनेष्टसिद्धेः । न चान्तवद्भावाश्रयणे गौरवान्नायं पक्षो युक्तः, इति वाच्यम्, ईदाद्यन्तं यद्द्विवचनान्तमिति तृतीयपक्षाऽऽश्रयणेन दोषपरिहारात् । कुमार्यगारमित्यादौ प्रत्ययलक्षणेन द्विवच-नान्तत्वात् प्रगृह्यसंज्ञा तु न शङ्कनीया ''ईदूतौ च सप्रम्यर्थे'' इति सूत्रे अर्थग्रहणेन प्रगृह्यसंज्ञायां प्रत्ययलक्षणन्न भवतीति ज्ञापनात् । न चास्मिन् पक्षेऽपि ज्ञापनायार्थग्रहणस्यश्रयणे गौरवं स्यादेवेति वाच्यम्, ईदाद्यन्तं यद् द्विवचनं तदन्तं प्रगृह्यमिति चतुर्थपक्षाश्रयणेन दोषनिरासात् । नन्वेवमिपि अशुक्ले वस्त्रे शुक्ले सम्पद्येताम्, शुक्ली+आस्ताम्=शुक्ल्यास्ताम् वस्त्रे इत्यत्र परत्वात् शी भावे कृते ततो लुकि शी शब्दे ईकारान्तद्विवचनान्तश्च समुदायः प्रत्ययलक्षणेनेति प्रगृह्यसंज्ञापत्तिरिति चेन्न पदसंज्ञायां अन्तवद्वचनम् अन्यत्र संज्ञाविधौ प्रत्यय ग्रहणे तदन्तप्रतिषेधार्थम् इति निषेधेनेष्टसिद्धेः । तथा च 'ईदाद्यन्तं यद् द्विवचनम्' इति पक्षः भाष्यसम्मतः ।

विषयेऽस्मिन भाष्यदृशा विमर्शश्रृंखलाभ्यां द्वितीयं सूत्रम् ''अदसोमात्'' इति सूत्रेण मात् प्रगृह्यसंज्ञायाम् ईत्वस्य, अत्वस्य चाऽसिद्धत्वात् अय्, आव् एकादेशाः प्राप्नुवन्ति (अमी+अत्र, अमू+अत्र, अमू+आसाते) तत्प्रतिषेधः कर्तव्यः इति चेन्न 'अणोऽप्रगृह्यस्यानुनासिक' इत्यत्र अदसोन इत्येकयोगेनैव अमी + अत्रेत्यादौ अनुनासिकनिराससम्भवात् । पृथग्योगकरणेन

प्रगृह्यसंज्ञाम्प्रति मत्वादेरसिद्धत्वान्नेति ज्ञापनात् । ''कार्यकालं संज्ञापरिभाषम्'' इति नियमात् कार्यकालपक्षे प्लुतप्रगृह्याऽचि इति एक वाक्यतापन्नस्यादसो मादिति सूत्रस्य अयादिभ्यः परत्वेन अयादीन् वाधित्वा प्रगह्यसंज्ञा प्रवृत्तेश्च । न च ईत्वस्य ऊत्वस्य च संज्ञादृष्टयाऽसिद्धतया कथं परत्वात् बाधः?

यतोहि विप्रतिषेधो भवतीति सिद्धान्तादिति वाच्यम्, रोरुत्ववत् प्रगृह्यसंज्ञाम्प्रति भत्वादेरसिद्धत्वन्नेति ज्ञापनेन विप्रतिषेधस्य सुलभत्वात् । न च 'रोः सुपि' इति सूत्रान्तरम् 'अत उरति' इति न्यासेनेष्टसिद्धे उत्वविधानसामर्थ्यादुत्वम्प्रति रुत्वस्याऽसिद्धत्वन्नेति कल्पनं व्यर्थमिति वाच्यम्? तथा पाठे 'वृक्षोऽत्र' इत्यत्र उत्वस्याऽसिद्धत्वेन गुणाऽप्रवृत्तेः । किञ्च 'यथोद्देशं संज्ञापरिभाषम्' इति न्यायेन यथोद्देशपक्षे प्रगृह्यसंज्ञावचनसामर्थ्यादयादीनामप्राप्तिः । कार्यकालपक्षे 'अदसः' इत्येको योगः अदसः परे ईदादयः प्रगृह्यसंज्ञाः भवन्ति । ततो 'मात्' माच्च परतः ईदादयः प्रगृह्यसंज्ञाः भवन्तीति योगविभागेन अयादीनां बाधः एकयोगेऽपि मार्थात् ईदाद्यर्थानाम् इत्यर्थकरणेन ''अदस ईत्वोत्वे स्वरे बहिष्पदलक्षणे''[2] सिद्ध वक्तव्ये प्रगृह्यसञ्ज्ञायाञ्चेति वचनेन चाऽसिद्धत्वाऽप्राप्तिः । 'मात्परे ये इदादयः' इत्यर्थे अमुके+अत्र इत्यादौ प्रगृह्यसंज्ञाऽप्राप्तरिष्ट सिद्धिः।

**भाष्यदिशा 'शे' इति सूत्रविमर्शः ।**

ननु काशे, कुशे, वंशे इत्यादौ 'शे'[3] इति सूत्रेण प्रगृह्यसंज्ञा कुतो न भवतीति चेन्न । 'स्वं रूपं शब्दस्याशब्दसंज्ञा' इति सूत्रे 'स्वं शब्दस्य' इति एवान्तरङ्गत्वादहेयत्वादसाधारणत्वाच्च रूपपरिग्रहे सिद्धे रूपवदर्थस्याप्यङ्गीकरणार्थं रूपग्रहणेन बोधित्वात् । अत्र च 'श' शब्दोऽनर्थकः, सप्तम्येकवचनं त्वर्थवत्, तयोः समुदायोऽर्थान्तराप्रादुर्भावादनर्थकः । तदुक्तञ्च पतञ्जलिना 'शेऽर्थ-ग्रहणात्'[4] अथवतः 'शे' शब्दस्य ग्रहणम् । न चैषोऽर्थवान् । इति न चैवमपि मत्वर्थीय शप्रत्ययान्ते हरिणे बभ्रशे इत्यादौ शेशब्दस्यार्थवत्वात् प्रगृह्यसंज्ञा प्राप्तेति वाच्यम्, ''लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्''[5] इति परिभाषया तद्दोषस्य निरस्तत्वात् । अथवा पुनरस्तु 'अर्थवद्ग्रहणेनानर्थकस्य' इत्येव । कथं हरिशे बभ्शे इति? एकोऽत्र विभक्त्यर्थेनार्थवान्, अपरस्तद्धितार्थेन समुदायोऽनर्थकः । अर्थवत्समुदायस्यापि कस्यचिदानर्थक्यम्, यथा-दशदाडिमानि षडपूपा इत्यादिवाक्यस्य पदार्थानां परस्परसमन्वयाभावात् । इहापि हरिश शब्दवाच्याथगतसंख्याधि-करणशक्तिप्रतिपादनाय प्रवृत्ता सप्तमी न शप्रत्ययमात्रप्रतिपाद्येनार्थेनान्वेतीति शेशब्दस्यानर्थक्यम् इति बोध्यम् । 'निपात एकाजनाङ्[6]' इति सूत्रविमर्शे वणग्रहणे जातिग्रहणं भवति न वा इति विविच्य 'आनङ्' इति निषेधप्रयोजनविमर्शः-

ननु सूत्रेऽस्मिन् निपात इति किमर्थम्? चकारात्र जहारात्र इत्यादौ प्रगृह्यसंज्ञा माभ्देतदर्थम्। एकाजिति किमर्थम्? प्र+इदम् = प्रेदं ब्रह्म, पदं क्षत्रम् इत्यादौ प्रगृह्यसंज्ञानिषेधार्थम्। एकाजित्युच्यमानेऽत्रापि प्राप्नोति । एषोप्येकाच् । एकाजिति नायं बहुव्रीहिः। एकोऽच यस्मिन् सोऽयमेकाजिति ।

किं तर्हि? समानाधिकरण तत्पुरुषाऽयं एकः चासौ अच् च = एकाच् एवमस्ति । अतः यः एकाच् रूपनिपातः स एव प्रगृह्य भवति प्र शब्दः एवं नास्ति अतः प्रगृह्यन्नास्ति ।

यदि अयं समानधिकरणतत्पुरुषोऽयमर्थात् कर्मधारयः अस्ति तदा तु नार्थ एक ग्रहणेन।

इह कस्मान्न भवति? प्रेदं ब्रह्म प्रेदं क्षेत्रम् यतोहि अजन्त निपातः वर्तते । अच् रूपी या निपातः तस्यैव प्रगृह्यसंज्ञा भवति एवं विज्ञायते । 'प्र' इत्यत्र अच् हल् द्वौ स्तः अतः अस्य प्रगृह्यसंज्ञा न भविष्यति ।

किमतत् वक्तव्यम्? नहि । कथमनुच्यमानं गंस्यते? अज्ग्रहणसामर्थ्यात् अनुच्यमानं गंस्यते यतोहि तत्र अच् अपि स्यात् एवञ्च हल् अपि स्यात् तर्हि अच् ग्रहणव्यर्थं भवतीति । यतोहि प्रगृह्यसंज्ञायाः फलं तु अचि एव भवति । अज्ग्रहणस्य अन्यत् प्रयोजनम् वर्तते । तद्यथा अजन्तस्य यथा स्यात् हलन्तस्य प्रगृह्यसंज्ञा माभ्त । नैष दोषो न प्रयोजनम् । ननु पुरोऽहिरिति हलन्तस्य प्रकृतिभावाद् रोरुत्वं न स्यात् । नैष दोषः, प्रगृह्यसंज्ञायां रुत्वस्यासिद्धत्वात् । सकारस्य च कार्यान्तराप्रसङ्गात् । उत्वे तु रुत्वमाश्रयात्सिद्धम् ।

पुरस् + अहिः इत्यत्र हलन्तनिपातस्य प्रगृह्यसंज्ञा सति सकारस्य रुत्वं रुकारस्य उत्वं न भविष्यति-एवं नास्ति दोषः यतोहि प्रगृह्यसंज्ञायां रुत्वशास्त्रमसिद्धं भवति । फलतः रुत्वेऽपि तस्य प्रकृतिभावो न भविष्यति । उत्वं प्रति रुत्वन्तु आश्रयणेन सिद्धं भवति । एवं पूर्वसूत्रे ''अदसोमात्''[7] इत्यत्र भाष्ये प्रतिपादितम् । अतः ''पुरोऽहिः'' सिद्धयति ।

एवमपि कुत एतत्-द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः ''आद्यन्तवदेकस्मिन्''[8] ''येन विधिस्तदन्तस्य''[9] इति च इयमिह परिभाषा भविष्यति-''आद्यन्तवदेकस्मिन्'' इति । इयं च न भविष्यति-''येन विधिस्तदन्तस्य'' इति?

अत्र विमर्शः-प्रस्तुतेऽस्मिन् सूत्रे निपातं विशेष्यं मत्वा अचं विशेषणं कृत्वा येन विधिस्तदन्तस्य इत्यनेन तदन्तविधि कृत्वा अजन्त यः निपातः एवमर्थः भवितुमर्हति । अर्थेऽस्मिन् प्र, परा आदीनां प्रगृह्यसंज्ञा भविष्यति । किन्तु अ, उ आदयः एतादृशाः अपि निपाताः सन्ति यत्र 'आद्यन्तवदकस्मिन्' इत्यनेन व्यपदेशिवद्भावद्वारा अजन्तत्वं भविष्यति । आम्याम् अजन्तत्वे सति सम्भवे सूत्रे 'अच्' ग्रहणं निष्फलं भविष्यति । अनेन कारणेन अच् ग्रहणसामर्थ्यात् मुख्यं अच्

ग्रहणत्वात् केवलम् 'अच्' रूपं गौणाजन्तस्य प्रगृह्यसंज्ञा वारणमेव अज्ग्रहणस्य फलमस्ति । अस्य कथनस्य खण्डनं क्रियते ।

अज्ग्रहणस्य फलमेवं वर्तते यत् निपातं विशेषणं मत्वा तदन्तविधेः प्रतिषेधम् । यतोहि निपातं यदि विशेष्यं भविष्यति तर्हि अच् विशेषणं भविष्यति तथा च अस्य तदन्तविधिः भविष्यति। तदा मुख्याजन्तस्यैव प्ररिग्रहणं भविष्यति । अतः आद्यन्तवदेकस्मिन्नित्सस्य निवृत्ति-भविष्यति प्रवृत्तिर्नभविष्यति । अतः द्वयोः परिभाषयोः एकस्याः ग्रहणं भवेत् अपरस्याः न स्यात् अत्र किमपिति कारणन्नदृश्यते ।

आचार्यप्रवृत्तेज्ञापयति-इयमिहपरिभाषा भवति-''आद्यन्तवदेकस्मिन्'' इति इयं च न भवति ''येन विधिस्तदन्तस्य'' इति । यदयम्-'अनाङ्' इति प्रतिषेधं शास्ति । (भाष्य.)

अत्र विमर्शो भाव्यते-यत् अनाङ्=आङ्भिन्नैकाच् निपातस्य प्रगृह्यसंज्ञा स्वीकृतास्ति । यदि 'येन विधिस्तदन्तस्य' इत्यस्य प्रवृत्तिं मत्वा अजन्तेति अर्थः ग्राह्यः तर्हि 'आङ्=आ' निपात् अच् रुपं वर्तते अजन्तं नास्ति, अत्र प्रगृह्यसंज्ञा स्वतः प्राप्ता एव नास्ति तदा निषेधस्तु व्यर्थः । अयमेव निषेधः व्यर्थो मूत्वा ज्ञापकं भवति यत् अत्र तदन्तविधिः न भवति अच्रुपं निपातमेव ग्राह्यम् ।

एवं तर्हि यदज् ग्रहणे सिद्धे सति क्रियमाणे सूत्रे एकग्रहणं कृतं वर्तते, तत्र आचार्यः ज्ञापयति यत् 'अन्यत्र वर्णग्रहणे जातिग्रहणं भवति' इति ।

अस्या परिभाषायाः ज्ञापने किं प्रयोजनम्? ''दम्भेर्हलग्रहणस्य जातिवाचकत्वात् सिद्धम्'' इति यदुक्तं तदुपपन्नं भवति । (भाष्यम्) विमर्शा विधीयतेऽत्र-एकः समीपं यः हल् तदन्तं धातोः परे हलादिसन् कित् भवति-इत्यर्थकं 'हलन्ताच्च'[10] इत्यनेन सूत्रेण दम्भ्+सन् कित् न भविष्यति यतोहि अत्र एकमेव हल् न्नास्ति अपितु हलद्वयं स्तः प्रस्तुतेऽस्मिन् सूत्रे एकग्रहणेन इतः अन्यत्र वर्णग्रहणे जातिग्रहणं ज्ञापित्वेन हलद्वयमपि गृहीतं भविष्यतः । सन् कित् भविष्यति तथा च ''अनिदितां''[11] इत्यनेन 'मलोपे सति' धीप्सति सदृशरूपाणि भविष्यन्ति । अतः अत्र एकग्रहणं सार्थकं वर्तते ।

पुनरत्रोदेति प्रश्नः-अनाङिति किमर्थम्? समाधयति भाष्यकारः - आ + उदकान्ता = ओदकान्ता । अत्र मर्यादार्थस्य प्रतीतौ प्रगृह्यसंज्ञा न भवति । गुणसन्धिः भवति । इह कस्मान्न भवति-'आ एवं नु मन्यसे' 'आ एवं किल तत्' अत्र सूत्रे ङकारानुबन्धस्य आकारस्य ग्रहणम्, यद्यपि अनयोः उदाहरणयाः अननुबन्धकश्चात्र आकारः । आङ्भिन्नत्वेन प्रगृह्यसंज्ञाभावः ।

क्व पुनरयं सानुबन्धकः क्व निरनुबन्धकः इति जिज्ञासायाम्-

**ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।**
**एतमातं ङितं विद्यात् वाक्यस्मरणयोरङित् ॥**[१२]

'ओत्'[13]-सूत्रस्यार्थः क्रियते ओयन्तो निपातो यः प्रगृह्यं संज्ञः स्यात् । अत्रोदाहरति आहो इति उताहो इति नैतदस्ति प्रयोजनम् । निपातसमाहारोऽयम् अनर्थकानामपि निपातानां 'कमीमिदुः' इत्यादीनां दर्शनादर्थभेदाभावऽपि निपातसमाहारत्वमुक्तम् । आह उ आहो इति । उत आह उ उताहो इति । एकाच् उ-इत्यस्य प्रगृह्यसंज्ञा तु 'निपात एकाजानाङ्' अनेन पूर्ववर्तिसूत्रेणैव सिद्ध्यति । एवं तर्हि एकनिपाता इमे समुदायः नास्ति यतोहि 'चादयोऽसत्वे'[14] इति चादिषु तथा पाठादिति भावः । अथवा प्रतिषिद्ध-आङ्-इत्यस्य प्रगृह्यसंज्ञार्थं सूत्रमिदं क्रियते । ओषु यातं मरुतः । आ उ = ओ इत्यत्रान्तवद्भावाद्भवत्ययमाङ् इति आनङिति प्रतिषेधः प्राप्नोति, पर्युदासे तु सति न दोषः । तत्र ह्याङ्सदृशस्योकारस्याङा सहकादेशः आदिवद्भावादुकारग्रहणेन गृह्यत इति सिद्ध्यत्येव प्रगृह्यसंज्ञा । तस्याश्च प्रयोजनं क्वचिच्छाखायाम् - ओ अयातम् - इति पाठे प्रकृतिभावः ।

''ओतश्च्विप्रतिषेधः''[15] ओदन्तो निपात इत्यत्र च्व्यन्तस्य प्रतिषेधो वक्तव्यः । अनदः अदः अभवत् - अदोऽभवत्, अतिरः तिरः अभवत् तिरोऽभवत् । न वक्तव्यः लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं भवति इति एवं न भविष्यति । एवमपि - अगौः गौः समपद्यत - गोऽभवत् - अत्र प्राप्नोति । एवं तर्हि 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः' इति । तद्यथा गोरनुबन्ध्योऽजोऽग्नीषोमीयः इति न बाहिकोऽनुबध्यते ।

अत्र विमर्शः - पदार्थस्य द्वौ प्रकारौ स्तः 1. गौणः, 2. मुख्यः । गुणादागतः गौण । मुखमिव प्रधानात्वान्मुखः । यथा गोशब्दस्य जाड्यादिगुणनिमितोऽर्थो वाहीकः । एवमेव अगौः गौ समपद्यत - गोभवत् आदिष्वपि 'गो' इत्यस्य गोत्वजाड्यादिगुणत्वेन गौणः अस्ति तदर्थं प्रगृह्यसंज्ञा न अर्हति । तद्यथा - 'गोरनुबन्ध्यः, अजः अग्नीषोमीयः अनेन वेद-वचनेन मुख्यत्वेन गौः पशोः अनुबन्धनं क्रियते' न हि मूढतादिगुणत्वेन लक्षणया प्रतीतवाहीकपुरुषस्य । निष्कर्षोऽयं 'गाऽभवत्' आदिषु गोत्वमारोपितमस्ति मुख्यं नास्ति । अतः अस्य प्रगृह्यसंज्ञा न भविष्यति । प्रकृतौ च गोत्वमारोपितं, न तु मुख्यमिति प्रगृह्यत्वाभावः ।

[16]कथं तर्हि वाहीके वृद्ध्यात्वे भवतः - गौस्तिष्ठति, गामानयेति? अर्थाश्रय एतदेवं भवति । यदि शब्दाश्रयम्, शब्दमात्रे तद्भवति । शब्दाश्रये च वृद्ध्यात्वे ।

अत्रविमर्शः - कानिचित् कार्याणि शब्दत्वेन क्रियन्ते शब्दाश्रिता: भवन्ति । अतः प्रयोगार्हपदत्वफलितार्थं प्राक्प्रयोगो विधेयः तन्निष्पन्नं प्रयोगार्हं पदस्य अपरपदेन प्रयोगो भवति

तदा तेषामर्थानामन्वयः लक्ष्यते । तादृगवस्थायां मुख्यशब्दस्य अथवा उपचरितं गौणशब्दार्थस्य निर्णयो भवति । अतः प्रथमं 'गा' 'गाम्' पदं विधीयते अत्र णिद्वभ्दावः वृद्धिः तथा आत्वरूपं कार्यं निष्पन्नं भवति । तदा वक्तुः प्रयोगभावनानुसारं 'तिष्ठति' वा 'आनय' इत्यमुं परिलक्ष्य 'गो' शब्दस्य वाहीकः अर्थः लक्षणया प्रतीयते । अतः अभिधाश्रितं कार्यं प्राक् प्रातिपदिके सति पदं भवति । अथ अथाश्रितं गौणमुख्याभावः प्रतीयते । अतः निष्पन्नरूपस्य परिवर्तनं निराधारमस्ति ।

[17]अत्र ऊँ – तद्यथा भाष्यदिशा ननु आहो + इति उताहो + इति इत्यादौ प्रगृह्यसंज्ञा कुतो न भवति? उञः इत्युच्यते न चात्र उञं पश्यामः । उञोऽयमन्येन सहैकादेशः उञ्ग्रहणेन गृह्यते । इति । यदयं 'ओत्' इत्योदन्तस्य निपातस्य प्रगृह्यसंज्ञां शास्ति । नैतदस्ति ज्ञापकम् उक्तमेतत् 'प्रतिषिद्धार्थोऽयमारम्भः' इति । दोषः खल्वपि स्यात् । यदि उञेकादेशः उञ्ग्रहणेन न गृह्येत जानु + उ + अस्य रुजति । जानू + अस्य रुजति । जन्वस्य रुजति। 'मय उञो वो वा' इति वत्वन्न स्यात् । एवं तर्हि एकनिपाता इमे । अथवा द्वौ उकारौ इमौ । एकोऽननुबन्धकः । अपरः सानुबन्धकः । तद् योऽननुबन्धकस्तस्यैष एकादेशः ।

उञ् इति योगविभागः – उञ् इति योगविभागः कर्त्तव्यः । 'उञः' शाकल्यस्याचार्यस्य मतेन प्रगृह्यसंज्ञा भवति । उ इति, विति । ततः ऊँ, उञः, ऊँ इत्ययमादेशो भवति शाकल्य-स्याचार्यस्य मतेन दीर्घोऽनुनासिकः प्रगृह्यसंज्ञकश्च – ऊँ इति । किमर्थो योगविभागः – ऊँ वा शाकल्यस्य शाकल्याचार्यस्य मतेन ऊं विभाषा यथा स्यात् । ऊँ इति उ इति अन्येषामाचार्याणां मतेन विति । इति भाष्ये ।

अत्र विमर्शः – इतः प्राक् सम्बुद्धौ शाकल्यस्येतावनार्षे[18] इदं सूत्रं वर्तते अस्य सूत्रस्योपरि भाष्यं नास्ति । प्रस्तुतसूत्रस्यार्थ ज्ञातुं पूर्वस्यापि सूत्रस्य अर्थमावश्यकम् । तदर्थम् – सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्यौऽवैदिके इतौ परे । इति शाकल्ये मते । 'अनार्षो इतौ' तथा 'शाकल्यस्य' अनयोः अनुवृत्तिः प्रस्तुते सूत्रे जाते सति अस्यार्थो भवति उञः प्रगृह्यसंज्ञा भवति लौकिकः इति शब्दः परे शाकल्याचार्यस्य मते । अत्र अपरः योगः क्रियते – ऊँ अनेन सह उक्त इति तथा शाकल्यस्य इत्यस्य सम्बन्धो भवति । अतः अस्य द्वितीययोगस्यार्थः भवति – ञकयरत्संज्ञकः उ निपातस्य इति शब्दे परे ऊँ एवमादेशः शाकल्यस्य मते भवति । एवं उञः एवञ्च ऊँ इमे द्वे सूत्रे बोध्यम् । अस्यैव विवेचनमत्रभाष्ये वर्तते ।

अन्यच्च – 'ओत्[19]' सूत्रस्य भाष्ये उक्तमेतत् 'प्रतिषिद्धार्थोऽयमारम्भः' अर्थात् प्रगृह्यसंज्ञानिषेधवारयितुमिदमोत् सूत्रं कृतम् । अतः इदं व्यर्थं न शक्यत तदा ज्ञापकमपि नैव शक्यते । एतदतिरिक्तं यदि 'उञः' एकादेशः उञ्ग्रहणेन ग्रहीतं न भविष्यति तर्हि जानू अस्य

इत्यत्र मय 'उञो वो वा'[20] इत्यनेन 'उ' इत्यस्य 'व्' आदेशो न भविष्यति फलतः 'जात्वस्य' इति रूपं न सम्भविष्यति । अथ आहो इति, उताहो इति अत्रापि 'उञ्' जाते सति 'उञः' 'ॐ' प्राप्तमेव भविष्यति ।

अपरञ्च-प्रयोगे त्रीणि रूपाणि मिलन्ति येषामुपपत्तिः योगविभागं विना न सभाव्यते । यदा 'उञः' तथा 'ॐ' इमे द्वे सूत्रे जायेते तदा एकं रूपं प्रगृह्यसंज्ञा एवं प्रकृतिभाव कृतेसति भवति (1) उ इति । अपरः 'ऊँ' आदेशे सति । (2) 'ऊँ' इति । तृतीयञ्च रूपं मय उञो वो वा[21] । अनेन सूत्रेण 'उ' इत्यस्य 'व्' आदेशे सति (3) व् इति = विति । यदि योगविभागो न शक्यते तर्हि प्रथमं रूपं '3' इति न भविष्यति । एतदथञ्चोक्तं शाकल्यस्य मते द्वे रूपे 'ऊँ' इति 'उ इति' । अन्याचार्याणां मते = विति । यद्यपि 'उञ्' अस्यानुनासिकस्य 'व' आदेशोऽपि अनुनासिकमेव स्यात्, विधीयमाने सति सवर्णग्राहकं न भवति एतदर्थं शुद्धं निरनुनासिकं 'व' एव स्यात् ।

'ईदूतौ च' सप्तम्यर्थे[22] ननु 'इदूतौ सप्तमी' इति सूत्रोपन्यासेनैवार्थसिद्धेः किमर्थम् अर्थग्रहणमिति चेन्न । 'सोमो गौरी अधिश्रितः[23]' इत्यादावपि सप्तम्यालुकि प्रगृह्यसंज्ञा साधनार्थं तस्यावश्यकत्वात् । न चात्र न सप्तम्या लुक् अपितु पूर्वसवर्ण इति वाच्यम् । पूर्वसवर्णत्वे आडाम्भावप्रसङ्गात् । न चादृतिं न शुष्कं सरसी शयानम्[24] इत्यत्र सरःशब्दात् परस्य ङिशब्दस्य इयडियाजिकाराणामुपसंख्यानम्' इतीकारे कृते सूत्रस्य चारितार्थ्यमिति वाच्यम् । दक्षिणापथे महान्ति सरांसि सरस्य इत्युच्यन्ते तेन ङीषन्तान्ङेर्लुकि सूत्रस्य चारितार्थ्याभावात् । एवञ्च सर्वत्र लुप्तायामपि सप्तम्यां प्रगृह्यसंज्ञा भविष्यतीति चेन्न प्रगृह्यसंज्ञायां प्रत्ययलक्षणं न भवतीति ज्ञापनार्थमर्थग्रहणस्याऽऽवश्यकत्वात् । तेन कुमार्योरगारं=कुमार्यगारम्, वध्वोरगारं=वध्वगारम् इत्यादौ न प्रगृह्यसंज्ञा । न च संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति इत्यनेन इदाद्यन्तं यद् द्विवचना-प्तमित्यर्थासम्भवात् प्रगृह्यसंज्ञायाः प्राप्तिरेव नेति व्यर्थमर्थग्रहणमिति वाच्यम् । पूर्वपदस्य माभ्दिति ज्ञापनार्थं तस्यावश्यकत्वात् । तेन वाप्यामश्वः वाप्यश्वः, नद्यामातिः नद्यातिः इत्यादौ जहत्स्वार्था-वृत्तिरिति पक्षे पूर्वोत्तरपदयो - रानर्थक्यान्न प्रगृह्यसंज्ञा । अजहत्स्वार्थायामपि वृत्तौ स्वार्थसंसृष्ट-प्रधानार्थस्याभिधानात् पांसूदकवत्स्वार्थस्य विवेकानवगमान्न भवति प्रगृह्यसंज्ञा । तस्माज्ज्ञापनार्थ-मर्थग्रहणमावश्यकम् । तदत्र संग्रहः कृतो भाष्यकारेण-

**इदूतौ सप्तमीत्येव लुप्तेर्थग्रहणाद्भवेत् ।**
**पूर्वस्य चेत् सवर्णोऽसावाडाम्भावः प्रसज्यते ॥१॥**
**वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि ।**[२५]

**ज्ञापकं स्यात् तदन्तत्वे मा वा पूर्वपदस्य भूत् ॥२॥**

अत्र विमर्शः - एवमस्ति यत् 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति ।' अतः तदन्तस्य निषेधो भविष्यति । फलतः ईद् अद् रूपं सप्तम्याः प्रगृह्यसंज्ञा कर्त्तव्या तथा च इयं सप्तमी अत्र लुप्ता जातास्ति । अविद्यमानास्ति, अविद्यमानस्य कार्यं न भवति ।

पत्ययनिमित्तं कार्यं यत्र प्रत्ययात् भिन्नस्य कार्यं क्रियते तत्रैव प्रत्ययलक्षणं भवति । 'गौरी' इत्यत्र एतादृशी स्थितिः नास्ति अतः प्रगृह्यसंज्ञा न भविष्यति । किन्तु अर्थग्रहणत्वेनात्र अर्थनिमित्तिका संज्ञा भवति न च प्रत्ययश्रवणनिमित्तिका । अतएव लुप्तेऽपि संज्ञा भवति यण् सन्धिन हि । अतः 'अर्थे' इत्यस्य ग्रहणमस्ति ।

अपरञ्च-समासवृत्तीनां भेदद्वयं मन्यते 1) जहत्स्वार्था 2) अजहत्स्वार्था । जहति स्वार्थं पदानि यस्यां सा जहत्स्वार्था । न जहत्स्वार्था अजहत्स्वार्था वैयाकरणैः एवमेव स्वीक्रियते । अजहत्स्वार्थापक्षेऽपि समासे विशिष्टशक्तेः समर्थनं कुवन्ति । अतएव वाप्यामश्वः इत्यादिषु समासे सति पृथक् पदानां निरर्थकत्वेन वाप्यादिसप्तम्यर्थे सप्तमीसहचरितं न मन्यते । अत एव पूर्वपदस्य प्रगृह्यसंज्ञा वारणार्थम् अर्थे ग्रहणस्यावश्यकता वर्तते । 'अर्थे' इत्यस्य अग्रहणे सति 'वापि' इत्यादेः प्रगृह्यसंज्ञा वारणमसम्भवम स्त्यलमितिविमर्शेण शिवम् ।

**सन्दर्भाः**

1. महा मा. छाया व्याख्याप्रारम्भे ।
2. व्या. म. मा.-पृष्ठ-582-जयशंकर लाला त्रिपाठी-चौखम्भा कृष्णदास अकादमी, वाराणसी ।
3. पा. सू.-1/1/13 ।
4. वार्तिक-सूत्र.शे.व्या.भ.मा. पञ्चामाहिक ।
5. परिभाषा-परिभाषेन्दुशेखर ।
6. पा. सू.-1/1/14 ।
7. 1/1/13-पा. सू. ।
8. पा. सू. 1/1/21 ।
9. व्या. महा. 5/आहिक सू-निपातेका ।
10. पा. सू.-1/2/10 ।
11. पा. सू.-6/4/24 ।

12. व्या. महा. आहिक ।
13. पा. सू. 1/1/15 ।
14. पा. सू. ।
15. व्या. म. भा.-आहि 5 ।
16. व्या. म. भा. 5 आहिक ।
17. पा. सू. 1/1/17 ।
18. पा. सू.1/1/16 ।
19. पा. सू. 1/1/15 ।
20. पा. सू. 8/3/33 ।
21. पा. सू. 1/1/18 ।
22. ऋ. वे. 9/12/2 ।
23. ऋ. वे. 7/103/3 ।
24. व्या. महा. 5 आन्हिक ।

**संविदाध्यापकः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैयासंस्कृतविद्यापीठम् ।**
**विद्याविहारः, मुम्बई ।**

★★★

# भाष्योक्तदिशा 'दाधा घ्वदाप्' सूत्रविचारः

✍डॉ.नवीनकुमारमिश्रः

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।**
**प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः॥ वा.प.-११**
**तद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।**
**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ॥ वा.प.-१४**

समस्तमुनिमनुजवृन्दवृन्दारकवन्दनीयपादारविन्दस्य भगवतः शिवस्य विश्वव्यापिव्यापार-वश्याद् संसारचक्रे अवतीर्णस्य क्रतुक्रियाकाण्डशौण्डस्य शलङ्कनाम्नः महर्षेः वंशे उपावर्षाचार्य-नाम्नः विद्यावंशे चोत्पन्नः वाणीसूनुः विद्वन्मञ्चलब्धप्रतिष्ठः धीमान् अनुचानः शुचिः सुकृती सत्यवादो विरञ्चिवर्चस्वानर्चनीयचरः ब्रह्मविद्ब्राह्मणः आचार्यपाणिनिः स्वाष्टाध्याय्यां प्रथमाध्यायस्य प्रथमपादे विंशतिसंख्यात्वेन दाधाघ्वदाबिति सूत्रम् अपाठीत् । दाधा प्रथमाबहुवचनम्, घुरिति प्रथमैकवचनम्, अदाप् प्रथमैकवचनमिति च्छेदः। दाश्च धाश्च इति दाधाः इतरेतरद्वन्द्वः, न दाप् (दाप् दैप् च) अदाप् नञ्तत्पुरुषः । दारूपाश्चत्वारः डुदाञ् दाने, दाण् दाने, दोऽवखण्डने, देङ् रक्षणे धारूपाश्च डुधाञ् धारणपोषणयोः, धट् पाने धातवः दाप्दैपौ वर्जयित्वा घुसञ्ज्ञकाः भवन्ति। यथा डुदाञ् दाने प्रणिददाति, दाण् दाने प्रणियच्छति, दोऽवखण्डने प्रणिद्यति, देङ् रक्षणे प्रणिदयते, डुधाञ् धारणपोषणयोः प्रणिदधाति, धेट् पाने प्रणिधयते इति । अदापिति किम् ? घुसंज्ञा अभावे दोदद्घोरित्यनेन ददादेशो न । घुसंज्ञाराहित्ये अच उपसर्गात्तरित्यनेन दाध्धातोः आकारस्य स्थाने तादेशो न । दाप् लवने दातं बर्हि लूनमित्यर्थः, दैप् शोधने अवदातं मुखं ? शुद्धमित्यर्थः । अथेदानीं दाधासूत्रे प्रकृतिग्रहणं कर्त्तव्यम् ।

**घुसंज्ञायां प्रकृतिग्रहणं शिदर्थम्**

घुसंज्ञासूत्रे प्रकृतिग्रहणं कर्त्तव्यम् । दाधाप्रकृतयोः (दाश्च धौ च प्रकृतयः द्वन्द्वसमासः) घुसंज्ञा भवन्तीति वक्तव्यम् । संज्ञेयम् स्वतः आत्वभूतानामेव न तु अनात्वभूतानाम् । भूयिष्ठानि घुसंज्ञाकार्याणि आर्धधातुके परे तत्र एते आत्वभूताः धातवः दृश्यन्ते । तद्यथा डुदाञ् दाने, दाण् दाने, डुधाञ् धारणपोषणयोः । शिदर्थं प्रकृतसूत्रे प्रकृतिग्रहणं कर्त्तव्यम् । शिति आदेच उपदेशेऽशिति 6.1.45 इति सूत्रेण शिति आत्वं प्रतिषिद्ध्यते । तत्र लटि भ्वादौ शप्, दिवादौ श्यन्

प्रत्ययविहिते । प्रणिदयते प्रणिद्यति प्रणिधायतीति । तर्ह्यत्र शिति परे नात्वम्, अनात्वे आत्वरहिते दोदेङधोटां दाधारूपहीने घुसंज्ञाविरहात् नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्साति-वपतिवहतिशाम्यतिचिनोतिदेग्धिषु च 8.4.17 इत्यनेन लक्षणेन उपसर्गनस्य णत्वप्रवृत्तिरभावः। तर्हीदं भारद्वाजशिष्याः पठन्ति - **घुसंज्ञायां प्रकृतिग्रहणं शिद्विकृतार्थम्**

दाधासूत्रे घुसंज्ञायां प्रकृतिग्रहणं कर्त्तव्यम् । शिदर्थं विकृतार्थञ्च । पूर्वस्मिन्वार्त्तिके शिदर्थमुदाहृतम् । अधुना विकृतार्थं दोदेङ्धोटां तृचि आदेच उपदेशेऽशिति इति सूत्रेण कृतात्वे प्रणिदाता प्रणिधाता । इह कृतात्वरूपविकृतार्थं प्रकृतसूत्रे प्रकृतिग्रहणप्रयोजनम् । तदभावे दोदेङ्धोटां न घुसंज्ञा नैव नेर्गदनद. इति सूत्रेण नीत्यस्य णत्वं भवति ।

किञ्च लक्षणेन ये आत्वभूतास्तेषां घुसंज्ञाप्रतिषिध्यते । तत्कथम् ? लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् । परि.114

लक्षणं लाक्षणिकप्रयोगे, तत्तद्विभक्तिविशेषाद्यनुवादेन विहित समासादि प्रतिपदोक्तः सूत्रकृतः लाक्षणिकः तयोः प्रतिपदोक्तस्यैव ग्रहणम् । न तु दोदेङ्धोटां आत्वभूतानाम् । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् इति परिभाषास्वीकारे दाधासूत्रे प्रकृतिग्रहणेन द्वयोः शिदर्थविक्ततार्थयोः कथं घुत्वं भवेत् ?

यदि ज्ञायते दाधाः प्रकृतयः कर्मधारयसमासे स्वतः आत्वभूताः दाण् दाने, डुदाञ् दाने, डुधाञ् धारणपोषणयोः एतेषामेव धातूनां घुसंज्ञा स्युरिति । इदानीमपि सा शङ्का तदवस्थापन्ना एव । तर्हि दाधां प्रकृतयः षष्ठीतत्पुरुषसमासे अनात्वभूतानामेव घुसंज्ञा स्युः । स्वतः आत्वभूतानां धातूनां दाण् दाने, डुदाञ् दान, डुधाञ् धारणपोषणयोः न । एवम्तर्हि नैवं विज्ञायते दाधाः प्रकृतयः, नापि दाधां प्रकृतय इति । द्वयोः आत्वानात्वभूतयो कथं घुत्वमिति चेत् दाधा घुसंज्ञा भवन्ति प्रकृतयश्चौषामिति । तत्तर्हि सामान्येन उभयोः घुसंज्ञाविधानार्थं प्रकृतिग्रहणं कर्त्तव्यम् । न कर्त्तव्यम् । प्रकृतिग्रहणरहितेऽपि घुसंज्ञा भवति । तत्कथमिति चेदुच्यते ईदूतौ च सप्तम्यर्थे (सप्तम्यर्थे पर्यवसन्नमीदूदन्तं प्रगृह्यं स्यात् । सोमो गौरी अधिश्रितः, अध्यस्यां मामकी तनू (मामक्यम्, तन्वाम् इत्यादौ सुपां सुलगितिशास्त्रेण लोंप))। इत्यस्माच्छुत्रत् दाधाघ्वदाप्सूत्रे अर्थग्रहणमनुवर्त्तते । ततः दाधा घ्वदाप् अर्थे इति । प्रकृतसूत्रे अर्थग्रहणात् वाक्यद्वयलाभः- दाधाघुसंज्ञकौस्तः, दाधार्थे दोदेङ्धोटां घूसंज्ञा स्यात् । एवं कर्त्तुमशक्यम् । दाधार्थग्रहणे राति, साति रासति दासति महति प्रीणातिप्रभृतीनां ददातिना समानार्थकत्वात् एतेष्वपि घुसंज्ञापत्तिः प्रकृतिग्रहणापत्तेश्च । अस्तु तावत् मार्थं नेर्गदनदपतपदघुमास्यति. सूत्रे प्रकृतिग्रहणं कर्त्तव्यम् । प्रणिमयते प्रण्यमयतेत्येवमर्थम् इत्यादौ नस्य णत्वविधातुम् । घुमा अमू अन्तरा प्रख्नतिग्रहणम्

उभयान्वयी स्यात् । यथा मेँ प्रणिदाने इति स्थाने माधतोर्ग्रहणं स्यात् । प्रकृतिग्रहणफलेन उभयोः आत्वानात्वयोः घुसंज्ञा स्यात् । एवमकृतेपि प्रनिमीनोति प्रनिमीनाति (मिञ् मीञ्) इत्यादौ मिनोतिदीङां ल्यपि च इति सूत्रेण आत्वे कृते नेर्गदनदपतपद. इत्यादिना णत्वप्राप्तिः । नेर्गदनद-पतपदेति सूत्रे प्रकृति ग्रहणाभावेऽपि प्रनिमाता प्रनिमातुम् प्रनिमातव्यम् इत्यादौ नेर्णत्वं कुता न ? माङः ङितत्वात् । प्रनिमाता प्रनिमातुम् प्रनिमातव्यम् इत्यादौ माङः मादेशो न, मिञ् मीञ् धातुपरत्वात् णत्वमपि न भवति । प्रनिमिनोति प्रनिमीनाति इत्यादावपि मेङ् प्रणिदाने कृतात्वे माङनिष्पन्ने माङ्धातुभिन्नत्वात् णत्वप्रतिषेधः । विकृतार्थमपि प्रकृतिग्रहणं न कर्त्तव्यम् । प्रणिदाता प्रणिधाता इत्यादौ लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तौ । गामादाग्रहणेष्वविशेषः परि.115 यत्र गामादाधातूनां ग्रहणं विद्यते तत्र लक्षणप्रतिपदोक्तयोः कस्यपि सामान्यरूपेण ग्रहणं भवति । अदाप् प्रतिषेधाार्थं दैपः पित्वमत्र ज्ञापकम् । इति अविशेषात् ।

विशेषः कृ अनुदात्तौ सुप्पितौ 3.1.4 सुपः पितश्च प्रत्यया: अनुदात्ताः । दृषदोषौ इति । इह पित्प्रत्ययस्यानुदात्तस्वरविधानम् करोति । न तु दैपः पित्करणप्रयोजनम् । प्रकृतौ अदाबित्यनेन दैपः प्रतिषिध्यते घुसंज्ञामपि न प्राप्यते । दादैपोः नास्ति घुसंज्ञा । पित्करणं व्यर्थम् । गामादाग्रहणेष्वविशेषः परि.115 यत्र गामादाधातूनां ग्रहणं विद्यते तत्र लक्षणप्रतिपदोक्तयोः कस्यपि सामान्यरूपेण ग्रहणं भवति । अदाप् प्रतिषेधार्थं दैपः पित्वमत्र ज्ञापकम् । पित्वज्ञापनादत्र दाधा-घ्वदाप्सूत्रप्रसङ्गे घुसंज्ञायां लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् परि.114 लक्षणं लाक्षणिकप्रयोगे, तत्तद्विभक्तिविशेषाद्यनुवादेन विहित समासादि प्रतिपदोक्तः सूत्रकृतः लाक्षणिकः तयोः प्तिपदोक्तस्यैव ग्रहणम् । निरनुबन्धकग्रहणे न सानुबन्धकस्य ग्रहणम् परि. 82 इति उभे द्वे परिभाषे नानुष्ठीयेते । तेन धोट्धा सानुबन्धकानां ग्रहणम् आहोस्विद् दोदद्घोरिति सूत्रे 7.4.46 दः इत्यस्यग्रहणं धोटः घुसंज्ञायाः ज्ञापको भवति । यतोहि दाधेत्यत्र दामात्रस्य घुसंज्ञा न तु धा इत्यस्य।

**समानशब्दप्रतिषेधाः** -

प्रनिदारयति प्रनिधारयतीत्यादौ दृङधृङ आदरेऽवस्थाने च । दृङ् णिच्वृद्धौ रपरत्वे दारि धारि दाधारूपावितौ अर्थवन्तौ, समानशब्दानां प्रतिषेधो वक्तव्यः । अतः प्राप्तघुसंज्ञायाः प्रतिषेधः ।

**समानशब्दप्रतिषेधोऽर्थवद्ग्रहणात्**

न च समानशब्दानामप्रतिषेधः अर्थवत्वात् प्रनिदारयति प्रनिधारयतीत्यादौ घुसंज्ञावक्तव्यम् । अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् परि.14 - अर्थवच्छब्दस्वरूपस्य ग्रहणसंभवे अनर्थकशब्दस्य ग्रहणं नोचितम् । इति परिभाषाज्ञापनात् । उरण् रपरः पा.अ.1.1.51 अण्विषये सूत्रमिदं विधीयमान

एव रपरत्वे कृते वृद्धौ (दृङधृङ) दारि धारि समुदास्यार्थवत्त्वं नत्वेकदेशावयवदाधामात्रस्य । दाधारूपावर्थवत्त्वाभावेन घुसंज्ञायां नास्ति विनिगमकत्वम् । अतः वार्त्तिकमिदं व्यर्थम् ।

**अनुपसर्गाद्वा**

उपायान्तरम् उपसर्गरहिते घुसंज्ञाणत्वमुभयमपि न भवति । प्र परा इत्यादि सोपसर्गक्रियावचकाद्धातुना सह ये ते उपसर्गसंज्ञकाः भवन्ति । प्रनिदारयति प्रनिधारयतीत्यादौ प्र नि धा धातुना क्रियावाचकेन सह अयोगात् नेर्गदनदपत्पद इत्यादिना न णत्वं नैव घुसंज्ञाविधानम् । दारि दापि धारि धापि इत्यत्र णिचि अर्तिह्रीब्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ पा.अ.7.3.36 इत्यनेन पुकि उपसर्गरहिते समुदायस्यार्थवत्त्वे दामात्रस्य अनर्थवत्त्वे दाधाघ्वदाबिति सूत्रेण न घुसंज्ञा स्यात्।

**न वार्थतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते**

अर्थवत आगमस्तद्गुणीभतोऽर्थवद्ग्रहणेन गृह्यते । यथान्यत्र दारि, धारि इत्यादौ यदागमस्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते परि.11 यमुद्दिश्यागमो विहितः तद्गुणीभूतः शास्त्रेण तद-वयवत्वेन बोधितोऽतद्ग्रहणेन ग्राहकेन बोधकेन गृह्यते बोध्यते आगमविशिष्टः । तेन दारि धारि दापि धापीत्यादौ रफेपकारविशिष्टानां ग्रहणे न दोषः।

लविता चिकीर्षितेत्यादौ (लू इ तृच्) आर्धधातुकस्येड्वलादेः 7.2.35 इतीडागमे इह तृचः इडावयवे तृजा इड्ग्रहणं न तस्य बाधकम् । एवमेव प्रणिदारयति, प्रणिदापयति, प्रणिधारयति, प्रणिधापयति । फलतः दाप् धाप् दारि धारि धातूनां दाधरूपं मत्वा घुसंज्ञा स्यात् । युक्तं पुनर्यन्नित्येषु नाम शब्देष्वागमशासनंस्यात्? तन्न । नित्येषु नाम नित्यशब्देषुवागमविधानं नोचितम्, शब्दानां नित्यत्वे वर्णानां कूटस्थाविचाल्पायोपजन तथा विकाररहितः स्यात् । किंतु आगमस्तु अपूर्वः (उपजन वृद्धिभूतः) शब्दोपजनः। नित्येषु शब्देषु आदेशः युक्तः स्यात् । आदेशे तु एकस्य स्थाने अपरस्य ज्ञानमुचितमेव । आदेशास्तर्हीमे भविष्यन्ति अनागमकानां स्थाने सागमकाः स्युः । इह उच्यते-

**सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।**
**एकदेशविकारे हि नित्यत्वं नोपपद्यते ॥**

अत्र विशेषः-

**नित्याशब्दार्थ सम्बन्धास्तत्रम्नाता महर्षिभिः ।**
**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ॥ वा.प.२३**
**पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।**
**वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ॥ वा.प.७३**

**अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः ।**
**जन्मादयो विकाराः षड् भावभेदस्य योनयः ॥ वा.प.३**

**वैय्याकरणमते शब्दो नित्यः नित्यत्वञ्च -**

कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्ययययोगि यत्तन्नित्यम्। भावबोधिनीटीका अपायश्च उपजनश्च इति अपायोपजनौ तौ च विकारौ इति अपायोपजनविकारौ कर्मधारसमासे तौ अस्य नित्यस्य स्तः मत्वर्थे इनिः अनपायोपजनविकारि तद्भिन्नम् नित्यम् । वृद्धिविकार - अस्ति अनुत्पत्ति, जन्म सत्ता विकार उपचयविकार परिणामरूपविकार अपचयविकार अव्यययोगिविकारः। यदि एकेन सह अपरस्य वर्णागमः मनुते तर्हि नित्यत्वं न भवति । अतः शब्दरूपस्य वृद्धिकृतं परिवर्तनं प्रकृति प्रत्ययकल्पना शास्त्रप्रक्रियानिर्वहणमात्रमेव दास्थाने दाब्बुद्धिः । सर्वपदादेशकार्यवत्तया प्रतीयमानं प्रकृत्यादिः अनेन सर्वेषां नित्यत्वम् ।

**दीङः प्रतिषेधो स्थाघ्वोरित्वे-**

स्थाघ्वोरिच्च 1.217 इति सूत्रेण स्थाघ्वोः इत्वे दीङः प्रतिषेधो कर्त्तव्यः । उपँ आँ र्दीं सिच् मीनातिमिनोतिदीङा ल्यपि च 6.1.50 इति सूत्रण दीङः इकारस्यात्वे दारूपप्राप्ते दाधाघ्वदाबित्यनेन घुसंज्ञा पुनः स्थाघ्वोरिच्च इत्यनेन आकारस्य इत्वे घुसंज्ञायाः प्रतिषेधः वक्तव्यः ।

उपादास्त उपा दी स् त इति दशायां सिचः अकित्वे मीनातिमिनोतिदीङ ल्यपि च 6.1. 50 इति सूत्रेण दीत्यस्यात्वे दा कृते । यदि तत्र घुसंज्ञा भवति तर्हि पुनः आकारस्य इत्वे कित्वं स्यात् । किञ्च सन्निपातविरोधान्न कर्त्तव्यं सूत्रे प्रकृतिग्रहणम् सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य परि. 86

सन्निपातो नाम द्वयोः सम्बन्धः। लक्षणं निमित्तम् । परस्परं सम्बन्धं निमित्तं मत्वा विहितं कर्म, तस्य सम्बन्धस्य विघातस्य निमित्तं न भवति अर्थात् विघातकः न । स्वोत्पत्तौ निमित्तरूपसम्बन्धिनः स्वोत्पत्यूत्तरं यः नैमित्तिकः उत्पन्नः निमित्तरूपसम्बन्धिनः विघातको न भवतीत्यर्थः । तत्र इत्वविधाने कथं दोषापत्तिः? तत्र समाधानम् कृदाधारूपौ इत्यादौ रूपग्रहणात् घुसंज्ञा इत्वप्राप्तिश्च ।

किञ्च उपदिदीषते इत्यत्र प्रकृतिग्गहणात् घुसंज्ञाप्राप्तिरूपदोषः । तत्र दीङः दाप्रकृतिरूपे सनिमीमाधुरमलभः 7.4.54 इत्यने अभ्यासलोपः आ इत्यस्य इसादेशः, सनि इको झल् इत्यनेन कित्वात् गुणो न दीङ्मात्रमेव नतु एज्विषयः । तदा दाप्रकृतिः दी इत्यस्य घुसंज्ञकत्वे सनिमीमा इत्यादिना अभ्यालोपे इसादेशप्राप्तिः । नास्ति दोषोऽयं दारूपप्रकृते घुसंज्ञा भवति । दीङ्स्तु दा प्रकृतिर्न । येषां धातूनाम् आत्वं विहितं तेषां दाप्रकृतिर्नास्ति किंतु ते एजन्तधातवः। एवम्हि प्रकृते

प्रकृति तस्य प्रकृतिर्ग्रहणात् ग्रहणं नेष्यते । उपदिदीषतीत्यादौ दीङ् सन्, दी दी इत्यस्य प्रकृतिर्नास्ति किंतु दीङ् दे-दाक्रमेण प्रकृतिरेजन्तस्य । अतः दीङ्ः नास्ति घुसंज्ञा । सन्निपात-विरोधान्न दीङ्ः घुसंज्ञा स्यात्तर्हि निषेधोऽत्र व्यर्थः।

**दाप्प्रतिषेधो न दैपनेजनतत्वात्**

सूत्रे अदाबिति ग्रहणेन दैपः इत्यस्य प्रतिषेधो न । तेन दैप् शोधने इत्यस्यै घुसंज्ञा न तु दाप् लवने इत्यस्य । कृप्रत्यय परे अवदात्तं मुखमित्यत्र दैपः आत्वे दापि कृते घसंज्ञा किन्तु अनात्वस्य दैप्धातोः नास्ति ।

आदेच उपदेशेऽशिति 6.1.45 इत्यनेन दपः कृतात्वे प्राप्तघुसंज्ञायाः प्रतिषेधो आवश्यकः । अनेजन्तत्वात् दैप आत्वन्न । अतः दैपः दाप्त्वन्न स्यात् । अतएव अदाबिति प्रतेधा दाप् धाातुमात्रस्यैव । तेन दैपः घुसंज्ञा अच उपसर्गात्तः 7.4.47 इत्यनेन त प्रत्ययः ।

**सिद्धमनुबन्धस्याऽनेकान्तत्वात्**

अनुबन्धस्यानेकान्तत्वात् । अनेकान्ता अनुबन्धाः परि. 4 अनेकान्ताः अनवयवाः इत्संज्ञा-योग्या, अनुबन्धाः बोधकानवयवो न भवन्ति । ततः दैपः अनेकान्तत्वात् अनवयवत्वात् आदेच उपदेशेऽशिति इति सूत्रेण कृतात्वे दाबरूपे घुसंज्ञासत्रे अदाबिति प्रतिषेधः चरितार्थः ।

**पित्प्रतिषेधाद्वा-**

प्रकारान्तरेण पित्प्रतिषेधेन दैपोऽपि प्रतिषिद्धः स्यात् । तर्हि दाधा घ्वपित् एवं ब्रूयात् । अदाबित्यनेन प्रणिदापयतीत्यादावपि घुसंज्ञाप्रतिषेधः प्रसक्तः । तदभावे नेर्गदनदपतपद इत्यादिना णत्वन्न । शक्यम हि अदाप् स्थाने बान्त अदाब् इति । तेन प्रणिदापयतीत्यत्र घुसंज्ञाप्रतिषेधाभावे णत्वं स्यात् । दाधाघ्वदाब आद्यन्तवदेकस्मिन् एवं सूत्रपाठः स्यात् । तथा कृते सूत्ररूपभेदात् अदाप् इत्येव साधुः । अदाप् प्रतिषेधे दैपः न प्रतिषेधः । न तथा -

**अनेकान्ता अनुबन्धाः परि ४**

अनेकान्ताः अनवयवाः इत्संज्ञायोग्या, अनुबन्धाः बोधकानवयवो न भवन्ति । एजन्तत्वात् आदेच उपदेशेऽशिति इति सूत्रेण कृते आत्वे दाप् रूपे न घुसंज्ञा । दैप् इत्यत्र पकारस्य न अवयवत्त्वम् । एकान्ताः परि.5

एकान्ताः अनवयवाः, अनुबन्धाः बोधकावयवाः भवन्ति । एकान्तपक्षे तु दैप् इत्यत्र पकारस्यावयवे अनेजन्तत्वात् आदेच उपदेशेऽशिति आत्वस्य प्राप्तिरेव नास्ति । पलोपे एजन्तत्वस्य आत्वे दामात्ररूपे भूतपूर्वगत्या दाबितिस्वीकारे अदाबित्यनेन प्रतिषेधाः चरितार्थः । ततः दैपः कृतात्वे न घुसंज्ञा ।

ननु सानुबन्धकग्रहणे भूतपूर्वगतिर्जआयते अनुबन्धालोपस्तु निमित्ताभावे इत्संज्ञा अनुबन्ध-लोपश्च । अनुबन्धविषये सर्वत्र भूतपूर्वगतित्वात् इहापि दैप इत्यत्र पित्त्वं भवति ।

**नानुबन्धाकृतमनेजन्तत्वम् परि.७**

अनुबन्धकारणेन एजन्तत्वस्य न त्यागः । यथा अवदात्तमित्यत्र दैप् शोधने दैप् क्त पकारानुबन्धासत्वेऽनेजन्तत्वात् आदेचः उपदेशेऽशिति इत्यनेन ऐकारस्य आत्वन्न पानुबन्ध लोपोत्तरम् आत्वं भवति । एवमेव अवदत्तमित्यत्र अदाप् प्रतिषेधेन पलोपानन्तरमेव दाप् रूपरहिते घुसंज्ञालाभे अच उपसर्गात्तः 7.4.47 अजन्दुपसर्गात्परस्य दा इत्यस्य घोरचस्तः स्यात्तादौ किति । प्रत्तः - इति तादेशः । अतएव उदीचां माङो व्यतीहारे 3.4.19 इत्यत्र कारानुबन्धसहित कृतात्व-देशस्य माङ्धातोर्ग्रहणं विहितम् । प्रकारान्तरेणाप्याह-

अथवा दैपोऽपि दाबेव तत्कथम् अवदायतीत्यत्र एचोऽयवायावः इति सूत्रेण आयादेशे कृते सिद्धम् । यदि दैप् इत्येव स्यात्तर्हि आत्वे अवदातीति अनिष्टरूपापत्तिः । दैप् शोधने दाप् लवणे इति उभयमपि दिवादिगणे पठित्वा दिवादिभ्यः श्यन् इति श्यनि अवदार्ष्य अवदायति इति; जुमार्गः ।

**विमर्शः**

मेङ् प्रणिदाने इत्यत्रनुबन्धसत्वेऽपि न तस्य एजन्तत्त्वस्य बाधकम् । नानुबन्धाकृत-मनेजन्तत्वम् परि.7 उदीचां माङो व्यतीहारे 3.4.19 सूत्रेऽस्मिन् मेङः स्थाने आत्वभूत माङः पाणिना पठितः । इदमेव नानुबन्भमनेझन्तपरिभाषायाः ज्ञापकम् । नोचेत् ङिदनबन्धसत्वे कथं तत्र मेङः आत्वं सम्भवति । तद्वदेव दैप् शोधने इत्यत्रपि पित्वेऽपि एजन्तत्वात् आदेच उपदेशेऽशिति इत्यनेन आत्वे कृते दापि अदाप् विधानात् घुसंज्ञायाः प्रतिषेधः । सूत्रे अदाप् कथनेन दाप्दैपो उभयोः घुसंज्ञा नास्ति ।

**घुसंज्ञाफलम्** -

1. घुमास्थासागापाजहातिसां हलि 6.4.66 एषामात इत्स्याद्धलादौ क्ङित्यार्धधातुके । दीयते धीयते ।
2. घ्वसोरेद्धावभ्यासलोपश्च 6.4.119 घोरस्तेश्च एत्वं स्याद्धौ परे अभ्यासलोपश्च । देहि धेहि ।
3. एर्लिङि 6.4.67 घुसंज्ञाकानां मास्थादीनाञ्च एत्वं स्यादार्धधातुके किति लिङि - देयात् धोयात् ।
4. गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु 2.4.77 एभ्यः सिचोर्लुक्स्यात् । अदात् अधात्

5. नेर्गदनदपतपदघुमास्यतिहन्तीयातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च 8.4.17 उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णत्वंस्यात् समासेऽसमासेऽपि । प्रणिददाति । प्रणिदधाति
6. स्थाघ्वोरिच्च 1.2.17 अनयोरिदादेशः स्यात् सिच्च कित्स्यात्तङि । अदात, अदित, अधात, अधित ।
7. ई हल्यघोः 6.4.113 श्नाभ्यस्तयोरात इत्स्यात्सार्वधातुके क्ङिति हलि न तु घुसंज्ञकस्य जहीतः अघोः किम् । दत्तः, धत्तः (घुसंज्ञायाम् इत्वन्न भवतीत्यर्थः)

**सन्दर्भाः**

1. वैयाकरणसिद्धान्तलघुमञ्जूषायाः भूमिकातः ।
2. वैयाकरणसिद्धान्तदिग्दर्शनम्, पं.बोधकुमारझाः ।
3. वैयाकरणसिद्धान्तकौमुदी (मूलम्) ।
4. प्रौढनिबन्धसौरभम् पृष्ठ सं. ।
5. अष्टाध्यायी 1.1.20 ।
6. विद्यारश्मिः पत्रिका ।
7. सद्विद्या पत्रिका ।
8. हरिप्रभा पत्रिका ।
9. सांख्यकारिका ।
10. वैयाकरणसिद्धान्तकौमुदी (दशगणीप्रकरणम्) ।
11. वाक्यपदीयम् पदकाण्डम् ।
12. नागेशगूढार्थदीपिका ।
13. काशिकावृत्तिः ।
14. परिभाषेन्दुशेखरः (दुर्गाटीकासहितः) ।
15. वैयाकरणसिद्धान्तकौमुदी, लक्ष्मीटीकासहितः ।
16. अद्भूतधातुरूपावली (पं.बोधाकुमारझाः) ।
17. परिभाषाचन्द्रिका ।
18. ज्ञापकसङ्ग्रहः ।
19. पं.श्रीनारायणमिश्रकृतपरिभाषाप्रकाशः ।

20. धातुरूपनन्दिनी-जनार्दन हेगडे ।

21. वाचस्पत्यम्-एँण्ड्रायड मोबाईल अप्लीकेशन-प्रो.मदनमोहनझाः ।

**संविदाध्यापकः**
**( व्याकरणविभागः )**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैया संस्कृतविद्यापीठम्**
**विद्याविहारः, मुम्बई - ७७**

★★★

# भाष्यानुसारी 'वृद्धिरादैच्' सूत्रविमर्शः

✍सुश्रीविदुषीबोल्ला

अस्मिन् नामरूपात्मके जगति सर्वे व्यवहाराः शब्दैरेव जायन्ते । वाग्व्यवहारस्य व्यवस्थित्यै तेषां शब्दानामनुशासनमपेक्षितम्, तदर्थं महर्षिपाणिनिना कृत्स्नं व्याकरणं अष्टाध्यायी-रूपेण व्यलेखि । अष्टाध्याय्यां प्रायः-चतुःसहस्रसूत्राणि सन्ति । सूत्रत्वं च तावत् -

अल्पाक्षरत्वे सति असन्दिग्धत्वे सति सारवत्त्वे सति व्यापकार्थप्रकाशकत्वे सति अर्थविहोनशब्दराहित्ये सति विशुद्धसंरचनत्वञ्चेति ।

अष्टाध्याय्या आद्यं 'वृद्धिरादैच्'[1] इति सञ्ज्ञासूत्रमत्र विमर्ष्टव्यमस्ति । आधुनिक-शक्तिग्राहकत्वं सञ्ज्ञासञ्ज्ञिसम्बन्धबोधकत्वं वा सञ्ज्ञासूत्रत्वम् । सञ्ज्ञासूत्रणि विधिशास्त्रा-पकारकाणि भवन्ति । एतेषां विधिशास्त्रोपकारकत्वविषये शब्दशास्त्र पक्षद्वयम् - यथोद्देशपक्षः, कार्य्यकालपक्षश्चेति ।

**यथोद्देशपक्षः** -

सञ्ज्ञासूत्राणां पक्षममुमश्रित्य परिभाषेन्दुशेखरकृता भट्टनागेशेन 'यथोद्देशं सञ्ज्ञा-परिभाषमि[2]ति परिभाषा पर्य्यभाषि । उद्देशश्चात्राधिकरणघञन्तत्वाद् उपदेशदेशः । तथा च यत्र देशे उपदिश्यते, तद्देश एव वाक्यार्थबोधेन गृहीतशक्त्या सर्वत्र शास्त्रे व्यवहारो यस्मिन् भवति स यथोद्देशपक्षः ।

**कार्य्यकालपक्षः** -

सञ्ज्ञासूत्राणां कार्य्यकालपक्षोपस्थापिका भवति 'कार्य्यकालं सञ्ज्ञापरिभाषमि'[3]ति परिभाषा। कार्य्येण = तद्विधायकशास्त्रेण काल्यते = स्वसन्निधिं प्राप्यते अर्थात् कार्य्येण स्वसंस्काराय स्ववृत्तिलिङ्गचिह्नितपरिभाषाविधेयानाम्, आक्षेपः = स्मरणं जायते यस्मिन् सः कार्य्यकालपक्षः।

लक्ष्यानुसारं द्वयोरन्यतरस्योभयस्य वाऽत्र शास्त्रे उपयोगो दृश्यते । तथा च सञ्ज्ञासूत्राणि यथोद्देशेऽपि त्रिपाद्यां प्रवर्त्तन्ते । अत एव 'पूर्वत्रासिद्धम्'[4] इति भाष्ये केवलं परिभाषाणां सम्बन्ध एव अप्रवृत्तिशङ्का कृता । सञ्ज्ञासूत्राणां विधिशास्त्रैः सह एकवाक्यतया वाक्यार्थः सम्पद्यते । सा च एकवाक्यता त्रिधा - पदैकवाक्यता, अर्थैकवाक्यता, वाक्यैकवाक्यता चेति ।

**पदैकवाक्यता -**

'वृद्धिरादैजि'ति शास्त्रस्य पदोपस्थापकत्वपक्षे 'वृद्धिरेची'[5]त्यादिवृद्धिपदघटितशास्त्रैः सह स्वघटकपदप्रयोज्यविषयतानिरूपितविषयताप्रयोजकपदघटितत्वरूपेति ।

**अर्थैकवाक्यता -**

विधिशास्त्रीयवृद्धीत्यादिपदानां लक्षणया वृद्धिपदाभिन्नादैजित्याद्यर्थतात्पर्य्यकत्वरूपे स्वोप-स्थाप्यार्थनिष्ठविषयतानिरूपितविषयताप्रयोजकपदघटितत्वरूपेति ।

**वाक्यैकवाक्यता -**

उपजीव्योपजीवकभावापन्नबोधप्रयोजकत्वरूपेति ।

प्राचीनवैयाकरणानां मते सञ्ज्ञासूत्राणां विधिशास्त्रैः सह यथोद्देशपक्षे वाक्यैकवाक्यता, कार्य्यकाले च पदैकवाक्यता भवति । नव्यनये तूभयत्र पदैकवाक्यता एव गृह्यते । उभयत्र पदैकवाक्यतेत्यत्र प्रमाणन्तु 'षष्ठी स्थानेयोगे'[6] ति सूत्रस्थभाष्यमेव - 'कश्चिदककदेशस्थः सर्वं शास्त्रमभिज्वलयति यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयतीति'[7] । दीपो यथा स्वावयव-प्रभासम्बद्धपदार्थप्रकाशकस्तथा सञ्ज्ञाशास्त्रमपि स्वावयवविधेयसम्बद्धमेव विधिशास्त्रमभि-ज्वलयतीत्यर्थः । अनेन दीपदृष्टान्तन्यायेन स्पष्टतया पदैकवाक्यता लभ्यते, वाक्यैकवाक्यतायान्त् अवयवसम्बन्धाभावात् भाष्यदृष्टान्ताऽसङ्गतिः स्यात् ।

सूत्रस्य विवेचनीयांशाः सन्ति -

1. सूत्राणां छन्दोवत्त्वम् ।
2. सूत्रस्थपदविचारः ।
3. तद्भाविताद्भावितानां स्वीकरणम् ।
4. पाणिनीयसूत्राणां वैशिष्ट्यम् ।
5. वृद्धिशब्दस्य मङ्गलार्थत्वम् ।
6. इतरेतराश्रयदोषनिवारणम् ।
7. समुदितसञ्ज्ञानिराकरणम् ।
8. तपरकरणविचारः ।
9. प्रकृतसूत्रवाक्यार्थः ।

एतेषां क्रमशः विवेचनमधः क्रियते -

**१. सूत्रणां छन्दोवत्त्वम् -**

'वृद्धिरादैच्'[8] इति सूत्रस्य आदैजित्यत्र चकारस्य 'चोः कुः'[9] इत्यनेन कुत्वं तु 'अयस्मयादीनि छन्दसि'[10] इति सूत्रेण 'छन्दोवत्सूत्राणि भवन्तीति'[11] भाष्यकृतः इष्टिवचनेन भसञ्ज्ञत्वान्न भवति । इष्टिघटकसूत्रपदेन वेदस्याङ्गत्वात् पदपदार्थबोधनद्वारा वेदोपकारकत्वाच्च व्याकरणसूत्राणामेव ग्रहणं क्रियते न तु वैशेषिकादिसूत्राणाम् । वेदाङ्गत्वे प्रमाणन्तु पस्पशायां निरूपितम् - 'प्रधानञ्च षट्स्वङ्गेषु व्याकरणमिति', 'मुखं व्याकरणं स्मृतमि'त्यादि । तथा च 'छन्दोवत्सूत्राणि भवन्ती'ति भाष्यकारीयातिदेशात् सूत्रेष्वपि छन्दःकार्य्यप्रवृत्तिर्जायते । अत एव संहितापाठे 'वृद्धिरादैजदेङ्गुणः' इत्यत्र चकारस्य जश्त्वं पदसञ्ज्ञया विधीयते, यतो हि छन्दसि भपदसञ्ज्ञाद्वयनिमित्तकार्य्याणि एकत्रैव भवन्ति यथा 'स सुष्ठुभास ऋक्वता गणेन' इत्यत्र पदत्वा-त्कुत्वम्, भत्वाज्जश्त्वाभावो विधीयते । तथैव प्रकतेऽपि पदत्वाज्जश्त्वम्, भत्वात्कुत्वाभावः । न चात्र पदत्वात् कुत्वं भत्वाज्जश्त्वाभावश्चेति व्यत्यासः कर्त्तुं शक्यते छन्दसि दृष्टानुविधित्वात् । एवं रीत्या सूत्रस्यासाधुत्वं पतञ्जलिना निराकृतम् ।

**२. सूत्रस्थपदविचारः**

वाक्यार्थज्ञानं प्रति पदार्थज्ञानं कारणमतः 'वृद्धिरादैच्' इति वाक्यार्थज्ञानाय सूत्रघटक-पदानां विचारः क्रियते । सूत्रेऽस्मिन् पदत्रयं पदद्वयमिति पक्षद्वयं वर्त्तते ।

**क. पदत्रयपक्षः -**

प्रकृतसूत्रे वृद्धिः, आत्, ऐच् इति पदत्रयं शेखरकृता स्वीकृतम् । आदैजिति समाहारद्वन्द्वेन पदद्वयस्वीकारे 'द्वन्द्वाच्चुदषहान्तात् समाहारे'[12] इति समासान्तटजापत्तिः स्यात्। किञ्च 'द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहौ'[13] इत्यत्र 'द्वित्रिभ्यां ष मूर्ध्नः'[14] इत्यनेन षे मूर्द्धेषु इति वक्तव्ये मूर्द्धसु इति निर्देशात् समासान्तविधिरनित्य इति ज्ञाप्यते, तस्यानित्यत्वात् समासान्तटच्प्रत्ययाभावन पदद्वये दोषाभावः इति न वक्तव्यम्, अनित्यस्य अगतिकगतित्वात् । न चात्र आच्च ऐच्चेति इतरेतरद्वन्द्वः स्वीकर्त्तुं शक्यः तेन द्विवचना-पत्तिर्जायते । तथा चास्मिन् पक्षे वृद्धिपदस्य तन्त्रेण आवृत्त्या वा आत् ऐच् इति उद्देश्यद्वयेन सह अन्वयो विधीयते ।

**ख. पदद्वयपक्षः -**

सूत्रघटकादैच्पदे समाहारद्वन्द्वे आच्च ऐच्च तयोः समाहारः इति आदैजिति, समासेऽस्मिन् न टजापत्तिः, समासान्तविधेरनित्यत्वात् । एवञ्च आदैच्पदे इतरेतरद्वन्द्वे आच्च ऐच्चेति आदैजिति द्वितीयविभक्त्याः 'सुपां सुलुक्पूर्वसवर्णाऽऽच्छेयाडाड्याया-

जालः'[15] इति सूत्रेण लुग्भवति । तथा च पक्षेऽस्मिन् उद्देश्यविधयपदयोः समानत्वात् तन्त्रवृत्त्योः अनाश्रयणाल्लाघवादयमेव पक्षो न्याय्यः।

**३. तद्भावितातद्भावितानां स्वीकरणम् –**

तद्भावितमित्यनेन वृद्धिशब्दमुच्चार्य्य ये आकारैकारौकाराः भाव्यन्ते तेषां ग्रहणं भवति । अतद्भावितेन आदैज्मात्रस्य ग्रहणं क्रियते । उभयथा शास्त्रे दर्शनात् पक्षद्वयेऽपि दोषसम्भवेन प्रश्नोऽयमुदितः । अत्र तद्भावितस्यादैचामेव ग्रहणं क्रियते चेत् शालीयः मालीयः इत्यत्र वृद्ध-लक्षणश्छप्रत्ययः 'वृद्धाच्छः'[16] इत्यनेन, आग्रमयम्, शालमयम् इत्यादौ 'नित्यं वृद्धशरादिभ्यः'[17] इत्यनेन मयड्प्रत्ययः, आम्रगुप्तायनिः, शालगुप्तायनिः इत्यादिषु 'उदीचां वद्धादगोत्रात्'[18] इति सूत्रेण फिञ्प्रत्ययो न भवन्ति । अतद्भावितपक्षस्वीकारे तु दोषद्वयमापद्यते, तौ भाष्यकृता एवं पर्य्यहा-रिषाताम् – तत्र प्रथमदोषस्तु 'सर्वो भासः सर्वभासः' इत्यत्र 'उत्तरपदवृद्धौ सर्वञ्च'[19] इत्यनेन पूर्वपदान्तोदात्तत्वं प्राप्नोतीति दोषः। अत्र समादधात्याचार्य्याः उत्तरपदवृद्धौ इति पदघटकोत्तरपदस्य 'उत्तरपदस्य'[20] इत्यधिकारविहिता वृद्धिर्यस्मिन्निति बहुव्रीहिसमासात् भासशब्दे अतथात्वेन नास्य सूत्रस्य प्रसक्तिरिति दोषपरिहारः कृतः। द्वितीयदोषस्तु – 'तावती भार्य्या यस्य तावद्भार्य्यः', 'यावद्भार्य्यः' इत्यत्र 'वद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे'[21] इत्यनेन सूत्रेण पुंवद्भावप्रतिषेधः प्राप्नोतीति । दोषोऽयं व्यधिकरणबहुव्रीहिसमासेन 'वृद्धेर्निमित्तं यस्मिन् सोऽयं वृद्धिनिमित्तः तस्य वृद्धिनिमित्तस्ये'त्यनेन निवार्य्यते । तथा चातद्भावितपक्षस्य निर्दुष्टत्वं प्रतिपाद्य भाष्यकारेण तद्भावितातद्भावितानामुभयविधानामपि ग्रहणं प्रकृतसूत्रे सिद्धान्तरूपेण स्वीकृतम् ।

**४. पाणिनीयसूत्राणां वैशिष्ट्यम् –**

सञ्ज्ञासूत्रेषु सञ्ज्ञाशब्दानां सम्प्रत्ययार्थं, सञ्ज्ञासञ्ज्ञयोः सन्देहनिवृत्त्यर्थञ्च न्यासान्तरं कर्त्तव्यमिति पूर्वपक्षाक्षेपः । अस्याक्षेपस्य निवृत्तिस्तु भाष्ये एवं कृता – आचार्य्याणां व्यवहारेण जायते यथा लोके पितरौ स्वपुत्रस्य नामकरणं देवदत्त इति कुरुतः, तथा चान्ये तयोः व्यवहारादेव इयमस्य सञ्ज्ञेति जानन्ति । तथा च वेदेऽपि स्फ्यो, यूषः, चषालः इत्यादीनां शक्तिनिर्णयः शक्तिग्राहकशिरोमणेर्व्यवहाराज्ज्ञायते । तथैव प्रकृतेऽपि आचार्य्याः 'सिचि वृद्धिः परस्मैपदम्'[22] इति सूत्रस्थवृद्धिशब्दस्य आकारैकारौकारान् अकार्षीत्, अक्षैषीत्, अश्रौषीत् इत्युदाहरन्ति तेन ज्ञायते 'यया पत्याय्यन्ते सा सञ्ज्ञा', 'ये प्रतीयन्ते ते सञ्ज्ञिन' इति । तस्मात् न्यासान्तरस्यावश्यकता नास्ति । एवं प्रकारेण सञ्ज्ञासञ्ज्ञयोः व्यवहारादेव सन्देहनिवृत्तिपुरस्सरं सम्प्रत्ययो भवति । एवञ्च लोक इव आकृत्यभाविका सञ्ज्ञा, आकृतिमान् सञ्ज्ञीति, वृद्धिशब्दस्य एकत्वात् सञ्ज्ञा आदैचां बहुत्वात् सञ्ज्ञिनः इति सञ्ज्ञाकरणस्य लघ्वर्थत्वाद्बुद्ध्यते । किञ्च लिङ्गकरणेनाऽपि साधयितुं

शक्यं, तथाऽपि पाणिनीयत्वं नश्यतीति यथान्यासमेवालम् । तथा च प्रकृते 'सञ्ज्ञाधिकारः सञ्ज्ञासम्प्रत्ययार्थम् इतरथा ह्यसम्प्रत्ययो यथा लोके' इति वार्त्तिकमुत्तरति – न च यथा लोके तथा व्यकरणे । यतो हि 'प्रमाणभूत आचार्य्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण'[23] ।। इति । अत्रागतशब्दाः श्रीमत्कैयटेन महाभाष्यस्य प्रसिद्धटीकायां व्याख्याताः – प्रमाणभूतः = प्रकृते प्रमाणशब्दः प्रामाण्ये वर्त्तते तथा च प्रामाण्यं प्राप्त इत्यर्थः । दर्भपवित्रपाणिः इति पदं प्रमादाभावं दर्शयति, अत्र प्रमादो नाम पिशाचादिसम्बन्ध इति उद्योतकृता प्रत्यपादि । प्राङ्मुख इति पदं प्राच्याः अभ्युदयहेतुत्वेनोल्लेखि । महता इति शब्देन मनः प्रणिधानं बुध्यते । अत्र अनर्थकेनेत्यस्य बोध्यार्थरहितेनेत्यर्थः । तथाच प्रामाणिकाचार्य्यः दर्भैः पूतपाणिकः ब्रह्ममुहूर्त्ते प्राच्यां दिशि अभिमुखीभूय महता साधनेन सूत्रान् विरचयति स्म, अतो न शक्योऽबोधकेन एकेनाऽपि पदेन । अत एव यथान्यासमेव सञ्ज्ञासञ्ज्ञ्योरसन्देहे शक्तम् ।

**५. वृद्धिशब्दस्य मङ्गलार्थत्वम्** –

'यच्छब्दयोगः प्राथम्यं स्यादुद्देश्यस्य लक्षणमि'ति अभियुक्त्यनुसारमुद्देश्यस्य पूर्वप्रयोगः न्याय्यः । अत एव सर्वेषु सञ्ज्ञासूत्रेषु प्रायः सञ्ज्ञिपदानन्तरमेव सञ्ज्ञापदं भवति, यथा 'अदेङ् गुणः'[24] इत्यादिषु अदेङिति सञ्ज्ञी, गुणः इति सञ्ज्ञा । किन्तु 'वृद्धिरादैच्' इत्यत्र तु सञ्ज्ञासञ्ज्ञिशब्दयोः व्यत्यासो दृश्यते इति दोषः आपद्यते । दोषनिवारणन्तु भाष्ये एवं विहितम् – ग्रन्थादौ मङ्गलमाचरेदिति परम्परां निर्वहन् प्रकृतसूत्रे वृद्धिशब्दस्य मङ्गलार्थत्वादादौ प्रायुज्यत । शब्देन्दुशेखरे नागेशभट्टस्तु उद्देश्यस्य पूर्वप्रयोगः उचितः किन्तु विधेयस्य पूर्वप्रयोगोऽपि न दोषाय अत एव 'अपृक्त एकाल्प्रत्ययः'[25] इति सूत्रे विधेयस्य अपृक्तपदस्य पूर्वप्रयोगो दृश्यते इति जगाद।

**६. इतरेतराश्रयदोषनिवारणम्** –

भाष्यकारेण प्रकृतसूत्रे इतरेतराश्रयः प्रदर्शितः । तत्स्वरूपन्तु – 'सतामादैचां सञ्ज्ञया भवितव्यम्, सञ्ज्ञया चादैचो भाव्यन्ते' इति । एवञ्च 'इतरेतराश्रयाणि कार्य्याणि न प्रकल्पन्ते' यथा – नौर्नाविबद्धा नेतरत्रणाय भवति । अस्यतरेतराश्रयस्य परिहारस्तु शब्दानां नित्यत्वेन अकारि। किञ्च नित्येषु शब्देषु सतामादैचां वृद्धिसञ्ज्ञा क्रियते, न च सञ्ज्ञया आदैचो जायन्ते ।

**७. समुदितसञ्ज्ञानिराकरणम्** –

'वृद्धिरादैजि'त्यत्र आदैचां समुदितसञ्ज्ञा प्राप्नोति, सूत्रे प्रत्येकमिति पदाभावाच्चेत्तन्न । 'देवदत्तयज्ञदत्तविष्णुमित्राः भोज्यन्तामि'ति दृष्टान्ते प्रत्येकमित्यन्तरेणाऽपि प्रत्येकस्मिन् कार्य्यं जायते तथैव प्रकृतसूत्रेऽपि प्रत्येकशब्दान्तरेणाऽपि आ ए औ इति प्रत्येकं वृद्धिसञ्ज्ञा भवत्येव।

**८. तपरकरणविचारः -**

प्रकृतसूत्रघटक-आदैजित्यत्र 'तः परो यस्मादि'ति बहुव्रीहिसमासः, 'तादपि तपरः' इति पञ्चमीतत्पुरुषसमासश्चेति समासद्वयं वर्त्तते । शाब्दिशास्त्रे 'गुणाः भेदकाः', 'गुणाः अभेदकाः' इति पक्षद्वयमपि दरीदृश्यते । भाष्यकारेण 'अस्थिदधिसक्थ्यक्ष्णामनुदात्तः'[26] इत्यत्र उदात्तग्रहणेन 'गुणाः अभेदकाः'[27] इति पक्षं सिद्धान्तत्वेन समुपस्थाप्य उदात्तादिसमकालिकानां तपरकरणेन ग्रहणाभावादादैचामनण्त्वेन सवर्णग्रहणायोग्यत्वाच्च बहुव्रीहिसमासपक्षे आत् इत्यत्र 'असन्देहार्थं तपरकरणमि'ति भाष्ये स्पष्टीकृतम् । एवञ्च 'तात्परः तपरः' इति पञ्चमीतत्पुरुषसमासे ऐजित्यत्र 'आन्तरतम्यात् त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रादेशाः मा भूदित्यर्थं तपरकरणं' स्वीकृतम्। अत एव खट्वा एलका इत्यत्र द्विमात्रिकाकारस्य द्विमात्रिकैकारस्य च स्थाने द्विमात्रिकैकार एव जायते । एवमेव खट्वोदकम्, खट्वौपगवः इत्यत्राऽपि बोध्यम् ।

**९. प्रकृतसूत्रवाक्यार्थः -**

तत्र सञ्ज्ञाशास्त्रं नाम आधुनिकशक्तिग्राहकम्, तच्च 'वृद्धिरादैच्' इत्यादि । शाब्दिकमते शब्दार्थयोस्तादात्म्याभ्युपगमेन यस्मिन् शब्दे यस्यार्थस्य तादात्म्यम्, तस्य तदर्थवाचकत्वम् इति व्यवस्थासत्त्वाद् 'वृद्धिरादैजि'ति सूत्रेण वृद्धिशब्दे आदैच्तादात्म्यग्रहद्वारा तस्य आदैज्वाचकता सिद्ध्यति । वृद्ध्यादेरादैच्तादात्म्यव्यवहारस्याधुनिकत्वात् शक्तिराधुनिकी ।

तार्किकमते तु सञ्ज्ञासूत्रेषु वृद्ध्यादिसञ्ज्ञापदं वृद्ध्यादिशब्दवाच्यपरम् । तेनादैच् वृद्धिपद-वाच्य इत्यर्थः । शब्दार्थयोस्तादात्म्यस्य बाधितत्वेन यथाश्रुतार्थपरत्वासम्भवात् । अथवा आदैजादि-पदमेव आदैजादिवाचकपरम् । तथा च वृद्ध्यादिशब्द आदैचां वाचक इत्यर्थः। 'अणुदित्सवर्णस्यचाप्रत्ययस्य'[28], 'येन विधिस्तदन्तस्ये'[29]त्युभयत्र तु वाचक इत्यस्याध्याहारो वैयाकरणैरपि कर्त्तव्य एवेति ।

अस्तु । शेखरे भट्टनागेशेन वृद्धिरादैजित्यस्य वाक्यार्थं प्रदर्शयता उच्यते - 'वृद्धिपदा-भिन्ना आदैचः' पदपदार्थयोः तादात्म्यसम्बन्धस्य स्वीकृतत्वादिति । तत्र श्रीराघवेन्द्राचार्य्याः नागेशोक्तवाक्यार्थमसहमानाः विषमपदविवृतिकृतः ऊचुः - अभेदस्य सम्बन्धत्वाभावः[30] मञ्जूषायां नागेशेन प्रतिपादितस्तथा चात्र अभेदसम्बन्धेनान्वयस्वीकारे वदतो व्याघातः स्यात् । एवञ्च 'आदैचो वृद्धिपदाभिन्ना' इति वाक्यार्थे शक्तिग्राहकत्वानापत्तिरित्यपि दोषः । अत एव प्रकृतसूत्रभाष्ये सञ्ज्ञासञ्ज्ञिभावस्य स्वीकारात्, संसर्गमर्य्यादया वाच्यवाचकभावसम्बन्धे सति 'आदैचो वृद्धिपदवाच्याः', 'आदैज्वाचकं वृद्धिपदमि'ति वाक्यार्थो जायते । 'वृद्धिरादैजि'त्यत्र उद्देश्यविधेययोः समानविभक्तिकत्वेन 'समानविभक्तिकनामार्थयोरभेदेनैवान्वयः' इति व्युत्पत्तेः

विरोधापत्तिस्तु न, 'प्रतीतपदार्थकतदर्थयोरभेदान्वयः', 'अप्रतीतपदार्थकतदर्थयोस्तु वाच्यवाचकभावे-नान्वयः' इति व्युत्पत्त्यनुसारं प्रसिद्धपदार्थयोरेवाभेदान्वयो जायते । तत्रैव चिदस्थिमालाकारः श्रीवैद्यनाथपायगुण्डे तु 'आदैचो वृद्धिपदाभिन्ना इत्येव शाब्दबोधः', सञ्ज्ञासञ्ज्ञिभावेनान्वयस्तु फलितार्थ एवेति नागेशमते न दोष इति स्पष्टीचकार ।

वस्तुतस्तु वैयाकरणानां सिद्धान्ते सञ्ज्ञासूत्राणां शक्तिग्राहकत्वं प्रसिद्धम् । तदनुसारं सञ्ज्ञासूत्रार्थबोधे शक्तेः एव बोधनं समुचितम् । शक्तिश्चात्र तन्त्रे तादात्म्यरूपा । तादात्म्य-ञ्चात्राभेदः। नागेशोक्तेन आदैचो वृद्धिपदाभिन्ना इति वाक्यार्थेन तादात्म्यरूपोऽभेदः प्रदर्शितः, यतश्च 'एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमि'तिरीत्या सम्बन्धिनोः शब्दार्थयोः ज्ञानं सुशकम् । अपि च समानविभक्तिकयोः नामार्थयोः अभेदान्वयः इति अभियुक्तोक्त्या नागेशोक्तः वाक्यार्थः एव समीचीन इति मे प्रतिभाति ।

**निष्कर्षः** -

शब्दानुशासनस्य आद्यसूत्रे वृद्धिरादैजित्यत्र सञ्ज्ञापदस्याद्योपादानन्तु मङ्गलार्थम् विहितम्। सूत्रेऽस्मिन् कुत्वाभावः 'छन्दोवत्सूत्राणि भवन्ती'ति इष्ट्या 'अयस्मयादीनि छन्दसो'त्यनेन भसञ्ज्ञया सिध्यति । तथा च वृद्धिशब्दः प्रत्येकमादैचां वर्णानां सामान्येन तद्भावितानामतद्भाविताना़ञ्च सञ्ज्ञात्वेन विधीयते । आचार्य्यव्यवहारेणैव सञ्ज्ञासञ्ज्ञिनोः सन्देहनिवृत्तिः, सञ्ज्ञाधिकारस्य प्रत्ययो भवति तदर्थं पृथङ्न्यासोऽनपेक्षितः। एवञ्च शब्दानां नित्यत्वात् सतामादैचां सञ्ज्ञया भवितव्यम्, सञ्ज्ञया चादैचो भाव्यन्ते इति अन्योन्याश्रयदोषोऽपि न जायते । अस्य वाक्यार्थस्तु - वृद्धिपदाभिन्नाः आदैचः इत्येव पदपदार्थयोः तादात्म्यसम्बन्धेनान्वयस्य स्वीकारात्, तादात्म्य-स्याभेदरूपत्वाच्च ।

**सन्दर्भाः**

1. अष्टाध्याय्याम् 1.1.1 ।
2. परिभाषेन्दुशेखरे 2 ।
3. परिभाषेन्दुशेखरे 3 ।
4. अष्टाध्याय्याम् 8.2.1 ।
5. अष्टाध्याय्याम् 6.1.88 ।
6. अष्टाध्याय्याम् 1.1.49 ।
7. व्याकरणमहाभाष्ये पृ. सं. 121 ।
8. अष्टाध्याय्याम् 1.1.1 ।

9. अष्टाध्याय्याम् 8.2.30 ।
10. अष्टाध्याय्याम् 1.4.20 ।
11. व्याकरणमहाभाष्ये पृ. सं. 121 ।
12. अष्टाध्याय्याम् 5.4.106 ।
13. अष्टाध्याय्याम् 6.2.197 ।
14. अष्टाध्याय्याम् 5.4.115 ।
15. अष्टाध्याय्याम् 7.1.39 ।
16. अष्टाध्याय्याम् 4.2.14 ।
17. अष्टाध्याय्याम् 4.3.114 ।
18. अष्टाध्याय्याम् 4.1.15 ।
19. अष्टाध्याय्याम् 6.2.105 ।
20. अष्टाध्याय्याम् 7.3.10 ।
21. अष्टाध्याय्याम् 6.3.39 ।
22. अष्टाध्याय्याम् 7.2.1 ।
23. व्याकरणमहाभाष्ये पृ. सं. 127 ।
24. अष्टाध्याय्याम् 1.1.2 ।
25. अष्टाध्याय्याम् 1.2.41 ।
26. अष्टाध्याय्याम् 7.1.75 ।
27. परिभाषेन्दुशेखरे परि. स. 118 ।
28. अष्टाध्याय्यां 1.1.69 ।
29. अष्टाध्याय्याम् 1.1.72 ।
30. सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः, परमलघूमञ्जूषायां शक्तिनिरूपणे, पृ. सं. 59 ।

**सहायकग्रन्थसूची**

1. पाणिनीयः अष्टाध्यायीसूत्रपाठः - सम्पादकः - श्रीब्रह्मदत्तजिज्ञासुः, राधाप्रेस दिल्ली, प्रकाशनवर्षम् - 2005, सप्तदशं संस्करणम् ।

2. परमलघुमञ्जूषा – 'भावप्रकाशिका' 'बालबोधिनी' संस्कृतहिन्दीव्याख्योपेता, व्याख्याकारः सम्पादकश्च – डॉ जयशङ्करलालत्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी, प्रकाशनवर्षम् – 2011, चतुर्थसंस्करणम् ।
3. परिभाषेन्दुशेखरः – 'सुबोधिनी'-हिन्दीव्याख्योपेतः, व्याख्याकारः – आचार्य्य-विश्वनाथमिश्रः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, प्रकाशनवर्षम् – 2011, पुनर्मुद्रितसंस्करणम् ।
4. लघुशब्देन्दुशेखरः – षट्टीकापेतः, सम्पादकः – प्रो. बालशास्त्री, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, प्रकाशनवर्षम् – 2013 ।
5. लघुशब्देन्दुशेखरः – हिन्दीदीपिकाटीकाञ्चितः, टीकाप्रणेता – पं. श्रीताराकान्तझाः, कामेश्वरसिंहदरभङ्गासंस्कृत-विश्वविद्यालयः, दरभङ्गा, प्रकाशनवर्षम् – 1985, प्रथमसंस्करणम् ।
6. वैयाकरणसिद्धान्तकौमुदी – बालमनोरमातत्त्वबोधिनीसहिता, मोतीलाल बनारसीदास, दिल्ली, प्रकाशनवर्षम् – 2010, प्रथमसंस्करणम् ।
7. वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीसहिता ।
8. वैयाकरणसिद्धान्तदिग्दर्शनम् – दिग्दर्शकः – प्रो. बोधकुमारझाः, रचनाप्रकाशनम्, जयपुरम्, प्रकाशनवर्षम् – 2006, प्रथमसंस्करणम् ।
9. व्याकरणमहाभाष्यम् – संस्कर्त्ता – श्रीगुरुप्रसादशास्त्री, सम्पादकः – पण्डिकनन्द-किशोरशास्त्री, प्रतिभा प्रकाशनम्, दिल्ली, प्रकाशनवर्षम् – 1999, पुनर्मुद्रणम्।
10. व्याकरणमहाभाष्यम् – 'सप्रदीप' भावबोधिनीहिन्दीव्याख्योपेतम्, व्याख्याकारः – प्रो. जयशङ्करलालत्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी, वि.सं. 2055, प्रथमसंस्करणम् ।
11. व्याकरणमहाभाष्यम् – अनुवादकः विवरणकारश्च – श्रीचारुदेवशास्त्री, मोतीलाल बनारसीदास, दिल्ली, प्रकाशनवर्षम् – 2011, प्रथमसंस्करणम् ।

**शोधच्छात्रा (व्याकरणम्)**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैया संस्कृतविद्यापीठम्**
**विद्याविहारः, मुम्बई – ७७**

★★★

# भाषाविज्ञानदृष्ट्या प्रयत्नविमर्शः

✍श्रीचेमटेसुरेशः

**भाषाविज्ञानम्**

यस्मिन् शास्त्रे भाषोत्पत्तेः, तस्याः संरचनायाः, तस्याः विकासस्य, तस्याः ह्रासस्य चाध्ययनं क्रियते, तद् भाषाविज्ञानमित्यभिधीयते - डा. श्यामसुन्दरदासः । भाषाविज्ञानस्यार्थोऽस्ति भाषायाः विज्ञानम् । विज्ञानञ्च विशिष्टं ज्ञानम् इत्थं भाषायाः विशिष्टं ज्ञानं भाषाविज्ञान-मित्युच्यते - डा. देवेन्द्रनाथशर्मा । ऐतिहासिकतुलनात्मकाध्ययनमाध्यमेन भाषाणां प्रकृतेः विकासपरम्परायाः, भाषिकसंरचनायाश्च विधिपूर्वकं विशिष्टाध्ययनं सिद्धान्तनिर्धारणं च भाषाविज्ञानमित्युच्यते- डा. भोलानाथतिवारी।

**ज्ञानविज्ञानसंश्लिष्टं विश्वभाषाविभूतिमत् ।**
**ध्वनि-वाक्य-पद-ज्ञानं भाषाविज्ञानमिष्यते ॥**
**भाषाया यत्तु विज्ञानं,सर्वाङ्गं व्याकृतात्मकम् ।**
**विज्ञानादृष्टिमूलं तद्, भाषाविज्ञानमुच्यते ॥**

- कपिलदेवद्विवेदी।

प्रयत्नः नाम - प्रकृष्टयत्नः, प्रयतनं (स्पृष्टादिर्ध्वनिगुणः), वर्णोच्चारणप्रयास एव, ध्वनयः मुखतस्तत्तत्स्थानेभ्यः श्वासोदीरणेनोत्पद्यते तत्र श्वासोदीरणार्थमास्थितः प्रयास एव वा । स चाभ्यन्तरो बाह्यश्चेति द्विधा । यत्र प्रश्वासपूर्वको गत्यभावः स बाह्यः, यत्र श्वासपूर्वको गत्यभावः स आभ्यन्तरः । यथा वाकाकलकादधस्तनेषु उच्चारणावयवेषु जायमानाः व्यापाराः बाह्यप्रयत्नाः, काकलकादुपरितनेषु उच्चारणविषयेषु जायमानाः व्यापाराः आभ्यन्तरप्रयत्नाः । शिक्षाशास्त्रेषु बलमिति पदेन वर्णोच्चारणे साधकौ बाह्याभ्यन्तरप्रयत्नौ उच्येते । बलं स्थानप्रयत्नौ, बलम् अल्पप्राणत्वमहाप्राणत्वादिलक्षणम् । अत्र यथामति भाषाविज्ञानदृष्ट्या प्रयत्नविमर्शः इति शोधपत्रमुपस्थाप्यते ।

**वाक् तथा प्रयत्नः**

आधारस्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञाभिधानि चक्राणि पायूपस्थनाभिहृद्कण्ठभ्रूमध्येषु तत्स्थानानि, तत्तु सुषुम्नाधिकृतानि । नागेशादिभिर्मते- तत्रस्थानां चतुर्णां चक्राणामुल्लेखः, वाक् सम्बन्धिनी । तत्र -

1. परावाक् मूलचक्रस्था, मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी, चैकन्याभासविशिष्टतया प्रकाशिका माया निष्पन्दा, शब्दब्रह्म वा । अर्थात् मूलाधारचक्रस्थवाय्वाभिव्यङ्ग्योऽतिसूक्ष्मात्माऽस्मदादेरप्रत्यक्षः शब्दः ।
2. पश्यन्तीवाक् नाभिदेशगा लोकव्यवहारातीता, सामान्यस्पन्दप्रकाशरूपिणी नादतत्त्वात्मिका आध्यात्ममूलाधारादिभ्यन्तम् अभिव्यज्यमाना, ग्राह्यभेदक्रमादिरहिता स्वप्रकाशा संविद्रूपा, मूलाधारतः नाभिपर्यन्तमागच्छता तेन वायुनाभिव्यक्तं मनोविषयो वा । अर्थात् नाभि-चक्रस्थवाय्वभिव्यङ्ग्यो योगिप्रत्यक्षगोचरः शब्दः ।
3. मध्यमावाक् हृदिस्था । मध्यमा मानसिकोच्चारणस्वरूपा । मानसजपः जिह्वोष्ठादि-व्यापाररहितं शब्दार्थयोश्चिन्तनम् । हृदयदेशस्था, बाह्यान्तःकरणाद्यात्मिका हिरण्यगर्भ-रूपिणी बिन्दुतत्त्वमयी, अन्तः सङ्कल्प्यमाना क्रमवती श्रोत्रग्राह्यवर्णरूपाभिव्यक्तिरहिता, अन्तर्मुखपरयोगिभिः दृश्या, हृदयपर्यन्तमागच्छता तेन वायुना हृदयदेशेऽभिव्यक्ततत्तदर्थ-विशेषतत्तच्छब्दविशेषोल्लेखन्या बुद्ध्या विषयीकृता वा ।
4. वैखरीवाक् कण्ठगा, आभ्यन्तरबाह्यप्रयत्नाभ्यां सम्बद्धा च । मौखिकवाय्वभिव्यङ्ग्यः सर्वश्रुतिगोचरः स्थूलः शब्दः । यथा वा विखरे देहेन्द्रियसङ्घाते भवा, विखरे शरीरे भवा तत्पर्यन्तचेष्टासंपादिका, प्राणवायुसंचारविशिष्टः वर्णोच्चारः तेनाभिव्यक्ता, कारणव्यापारानु-ग्रहाश्रोत्रज्ञानविषया शब्दबुद्धिः, विराडरूपिणी बीजात्मिका हृदयादास्यान्तमभिव्यज्यमाना शब्दसामान्यात्मिका वा । इति वचनक्रियासाधनानि । तेषां सुष्ठु ज्ञानार्थं चित्रम् ।



**वाग्यन्त्रं ( Vocal Organs/Organs of Speech/Mechanism of Speech ) तथा प्रयत्नः।**

उच्चारणं कण्ठताल्वाद्यभिघातेन शब्दजनकव्यापारः । शब्दे उच्चारिते येन अर्थस्य प्रतीतिः सञ्जायते तत् ध्वनिः (शब्दः) । ध्वन्युच्चारणे उपयुज्यमानो भागविशेषस्य इमे घटकाः ओष्ठौ (Lips), दन्ताः (Tooth), वर्स्वः वर्त्स्यः वर्स्व्यः (Gingival/Alveolus), मूर्धा (Cerebrum), तालु (Palate), नासिकाविवरम् (Nasal cavity) गलबिलम् (Pharynñ), काकलः (Glottis), स्वरतन्त्री (Vocal cords) श्वासनलिका (Wind pipe) नासिका (Nose), सृक्कम् (Corner of the lips), दन्तमूलम् (Teeth roots/Root of the teeth/Fang), हनुमूलम् (Root of the Jaw), उरस्यम् (Pulmonic), जिह्वा (Tongue), जिह्वाग्रम् (Tip of the tongue/Apical), जिह्वामूलम् (Root of the tongue@Dorsum), नासिकामूलम् (Root of the nose), भोजननालिका (Gullet/Oesophagus), अधिजिह्वा (Uvula)जिह्वामध्यम् (Middle of the tongue) इत्यादि । तत्र ओष्ठात् प्रभृति प्राक्काकलकात् आभ्यन्तरप्रयत्नः । ततोऽन्यत्र बाह्यप्रयत्नः। तेषामवबोधनार्थं चित्रम् ।



**आभ्यन्तरप्रयत्नः -**

तत्र प्रथममाभ्यन्तरो वर्ण्यते । आभ्यन्तरप्रयत्नः भाषाध्वनीनामुच्चारणार्थम् आस्यविवरे वाग्यन्त्रे वा जिह्वातालुदन्तादिकेन भविष्यमाणः क्रियमाणः वा प्रयत्नः, मुखविवरस्यान्तः यः प्रयत्नो भवति स आभ्यन्तरः वा । तथा प्रोक्तं नागेशेन - तत्र ये तत्तत्स्थानाभिघातका यत्नास्ते आस्यान्तर्गततत्तत्कार्यकारित्वादाभ्यन्तरा इत्युच्यन्ते । क्वचन द्वौ (याज्ञवल्क्यशिक्षायां स्पृष्टम् अस्पृष्टञ्चेति द्वौ भेदौ), क्वचन त्रयः (ऋक्प्रातिशाख्ये स्पृष्टं, दुःस्पृष्टं, (ईषत्स्पृष्टः) अस्पृष्टम् इति त्रिधा आभ्यन्तरप्रयत्नो दर्शितः।), क्वचन चत्वारः (माण्डूकशिक्षादौ ईषत्स्पृष्टम्, विवृतम्, स्पृष्टम्, संवृतम् इति चत्वारः), क्वचन पञ्च, क्वचन षड्,

**संवृतं विवृतं तद्वदस्पृष्टं स्पृष्टमेव च ।**
**ईषत्स्पृष्टं चार्धस्पृष्टमास्यप्रयत्नस्तु षड्विधः ॥**

तथा च पाणिनीयशिक्षायां स्पृष्टम्, अस्पृष्टम्, ईषत्स्पृष्टम्, अर्धस्पृष्टम्, विवृतम्, संवृतञ्चेति षडाभ्यन्तरप्रयत्नाः । तत्र स्पर्शध्वनीनां स्पृष्टप्रयत्नः अन्तःस्थध्वनीनाम् ईषत्स्पृष्टप्रयत्नः ऊष्मध्वनीनामर्धस्पृष्टप्रयत्नः स्वराणामस्पृष्टप्रयत्नः ह्रस्वाकारस्य संवृतप्रयत्नः इति प्रयत्नविवेकः । क्वचन सप्त, क्वचन अष्टौ वा आभ्यन्तरप्रयत्नस्य भेदाः प्रतिपादिताः ।

1. स्पृष्टम् - स्पृष्टकरणाः स्पर्शाः । कवर्णाद् आरभ्य मवर्णं यावत् पञ्चविंशतिः वर्णाः । क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म स्पृष्टाभ्यन्तरप्रयत्नकाः । ककारादारभ्य मकारपर्यन्तं पञ्चविंशतेः स्पर्शध्वनीनां स्पृष्टनामकः आभ्यन्तरप्रयत्नः भवति । तथा चोक्तं भट्टोजिदोक्षितेन स्पृष्टं प्रयत्नं स्पर्शानाम् । वर्णोच्चारणे तत्तत्स्थाने तत्तत्करणेन स्पर्शनं स्पृष्टं नाम । स्पर्शानां कादिमपर्यन्तानां पञ्चवर्गाणां स्पृष्टः प्रयत्नः तत्तत्स्थानेषु श्वासस्य बलवद्घट्टनादुत्पद्यन्त इति स्पर्शानां स्पृष्टः प्रयत्नः ।
2. ईषत्स्पृष्टम् ईषत्स्पृष्टकरणाः अन्तस्थाः । यवरल इति चत्वारः । अन्तःस्थानां यवरलानामीषत्स्पृष्टः प्रयत्नः । अन्तःस्थानां भूयानंशो विवृत इति ईषत्स्पृष्टः प्रयत्नः ।
3. विवृतम् - विवृतकरणाः स्वराः स्वरवर्णाः । विवृतप्रयत्नः ध्वनिजनकमांसानां स्वरतन्त्रीघटितानां सरलतयावस्थितिः । स्वराणामकाराद्यौकारान्तानां विवृत एव ।
4. ईषद्विवृतम् - ईषद्विवृतकरणाः ऊष्माणः । शषसह इति चत्वारः । ऊष्माणां शषसहानामीषद्विवृतः प्रयत्नः । ऊष्माणामुच्चारणे किञ्चिदिव श्वासो विवृत इति तेषां ईषद्विवृतप्रयत्नः ।

5. संवृतम् – ह्रस्वस्य अकारस्य प्रयोगेऽकारः संवृतो भवति । संवृतप्रयत्नः ध्वनिजनकमांसानां स्वरतन्त्रीघटितानां वायुनिःसरणकाले कठिनतयावस्थितिः । ह्रस्वस्यावर्णस्य प्रयोगे (साधनिकादशायाम्) संवृतप्रयतनं भवति शास्त्रीयप्रक्रियाभिः परिनिष्ठितानां रामः कृष्णः इत्यादिशब्दानां प्रयोगे क्रियमाणे एव ह्रस्वस्यावर्णस्य संवृतसंज्ञा भवति । संवृतं विवृतस्य विपरीतार्थकम् । विवृतस्यार्थो भवति उद्घाटितः तथा संवृतस्यार्थो भवति सङ्कुचितः । समीपावस्थानमात्रे संवृतता, सामीप्येन यदा स्पृशन्ति सा संवृतता वा । विवृतप्रयत्नवानपि ह्रस्व अकार औत्तराहैर्व्यञ्जनवत् (श्वासस्य) संवारेणोच्चार्यत इति तस्य प्रयत्नः संवृतः ।

**बाह्यप्रयत्नाः** –

बाह्यप्रयत्ना मुख्यतः स्वरतन्त्रीषु भवन्ति । मुखे ओष्ठात् काकलकसीमतो बहिः क्रियमाणः प्रयत्नो बाह्यप्रयत्नः तथा चोक्तम् – उद्योते गलविवरविकासादिकश्चास्यबहिर्भूते देशे कार्यकरत्वाद् बाह्याः। यदा स्वरतन्त्र्यः पूर्णतो विवृता भवन्ति तदा विवारप्रयत्नः । यदा स्वरतन्त्र्यः संवृताः अवरुद्धास्तिष्ठन्ति तदा संवारप्रयत्नः । यदा श्वासनिःश्वासक्रिया निर्बाधरूपेण चलति तदा श्वास उच्यते । स्वरतन्त्रीभिर्बाधितेन निःश्वासेन नाद उत्पद्यते । श्वासप्रयत्ने घर्षणाभाव एवाघोषः नादप्रयत्ने स्वरतन्त्रीषु घर्षणं घोषः । क्वचन द्वौ (घाषः अघोषश्च), क्वचन चत्वारः (संवारः, विवारः, घोषः, अघोषश्च), क्वचन षड् (संवारः, विवारः, नादः, श्वासः, घोषः, अघोषश्च), क्वचनाष्टौ (संवारः, विवारः, नादः, श्वासः, अल्पप्राणः महाप्राणः घोषः, अघोषश्च), क्वचन नव (संवारः, विवारः, नादः, श्वासः, घोषः, अघोषः, अल्पप्राणः महाप्राणः श्वासनादोभयात्मिका), क्वचन एकादशधा (विवारः संवारः श्वासः नादः घोषः अघोषः अल्पप्राणः महाप्राणः उदात्तः अनुदात्तः स्वरितश्च), परम्परायां पञ्चदशधा (विवारः संवारः श्वासः नादः घोषः अघोषः अल्पप्राणः महाप्राणः उदात्तः अनुदात्तः स्वरितः, ह्रस्वः, दीर्घः, प्लुतः, अनुनासिकः च ।)

1. विवारः – कण्ठबिलस्य विकासः, कण्ठस्य विस्तरणं वा । विवारस्यार्थो भवति उद्घाटितः । यदा कण्ठोद्घाटितो भूत्वा ध्वनिं करोति तत्समयजन्याः ये ध्वनयः ते विवराः । तद्यथा ख फ छ ठ थ घ ह त क य श स ष इति ।
2. संवारः – संकोचः कण्ठबिलस्य, ध्वन्युच्चारणार्थे गलबिलसंकोचात्मको वा । प्राणो नाम वायुरूर्ध्वमाक्रामन् मूर्ध्नि प्रतिहतो निवृत्तो यदा कोष्ठमभिहन्ति तदा कोष्ठेऽभिहन्यमाने गलबिलस्य संवृतत्वात् संवारो नाम ध्वनिधर्म उपजायते । संवारध्वनयः यदा स्वरतन्त्र्यः

नोद्घाटिताः तदवसरोत्पादितध्वनयः संवाराः । तद्यथा ह य व र ल ञ म ण न ङ झ भ ढ घ ज ब ग ड द इति ।

3. श्वासः - वायुव्यापारविशेषः, बाह्यस्य वायोरन्तरानयनम्, ध्वन्युच्चारणार्थे बाह्यप्रयत्नभेदः (बाह्यप्रयत्नविशेषः), विवृते कण्ठे यः शब्दः क्रियते सः वा । निश्वासस्य निर्बाधरूपेण प्रचलनं श्वासप्रयत्नस्यान्तर्गतमेव । श्वासस्यापरं नाम अघोष इति केचन । प्रत्येकवर्गस्य प्रथमद्वितीयध्वनिः अघोषध्वनिः अघोषोऽर्थात् घोषरहितो ध्वनिः । अघोषध्वनीनां श्वासः प्रकृतिर्भवति ।
4. नादः - ध्वनिर्विशेषव्यञ्जकः बाह्यप्रयत्नभेदः, वर्णोत्पत्त्यन्तरभावी अनुरणनरूपः ध्वनिः, अल्पे सङ्कुचिते कण्ठे यः ध्वनिः क्रियते स, स्वरतन्त्रीणां परस्परं सम्मेलनन यः विक्षोभः भवति तद्विक्षोभजन्यध्वनिः (तत्कम्पनजन्यध्वनिः), नादप्रयत्नः कठिनं स्थितेभ्यो मांसेभ्यो जायमानः श्रोत्रपेयः ध्वनिः वा । तस्मिन् सङ्कुचिते मार्गे प्रवहन् वायुः स्वरतन्त्रीराहत्य कम्पनं सृजति, कम्पनेन श्वासः विकृतः सन् नादरूपं धत्ते ॥ ध्वन्युपादानवायौ नादमिश्रणेन जातः ध्वनिविशेषः । अस्यापरं नाम घोष इति केचन । वर्गाणां तृतीयचतुर्थपञ्चमध्वनयः घोषध्वनयः स्वराणां घोषवतां च नादः प्रकृतिर्भवति ।
5. घोषः - वर्णोच्चारणबाह्यप्रयत्नभेदः । संवारे  कण्ठस्य सङ्कोचो भवति, तस्मिन् जाते नादो भवति, नादध्वनिसंसर्गाद् व्यञ्जनेषु घोषो बाह्यः प्रयत्नो जायते । यथा वा नादध्वनिसङ्गाद् घोषो जायते नादवायुना घोषध्वनिः सृज्यते वा । संवृतो घोषवान् । घोषाः - ह य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द इति एकविंशतिः। येषामुच्चारणकाले गलास्यविवरस्य सङ्कोचः क्रियते, येन नादविशेषो जन्यते, ततश्च घोष उत्पद्यते ।
6. अघोषः - अल्पः घोषः शब्दो यत्र, अल्पध्वनियुक्तः वा । विवारे कण्ठस्य विस्तरणं भवति, तस्मिन् सति श्वासो बाह्यः प्रयत्नः जायते, श्वासध्वनिसंसर्गादघोषो बाह्यः प्रयत्नः भवति। यथा यदा श्वासोऽनुप्रदीयते, तदा श्वासध्वनिसङ्गादघोषो नाम बाह्यप्रयत्नो जायते। अर्थात् यदा कण्ठस्य संवरणं, तदाघोषः (विवृतोऽघोषः)। अघोषा वर्णाः -  ख फ छ ठ थ च ट त क प श ष स एते त्रयोदश । येषामुच्चारणे गलास्यविवरं विवृतं क्रियते (ते विवारप्रयत्नेनोच्चार्यन्ते) येन श्वासविशेषो जन्यते ततश्चाघोष इति ।
7. अल्पप्राणः - अल्पवायौ । अल्पः प्राणो यस्योच्चारणे स अल्पप्राणो ध्वनिः । अर्थात् यस्य ध्वनेरुत्पादने अल्पवायुप्रयोगो भवति स । यथा - क ग ङ च ज ञ ट ड ण त

द न प ब म य र ल व एते एकोनविंशतिः । प्राणशब्दस्यार्थो वायुः, अल्पस्यार्थश्च किञ्चित्, यत्र किञ्चिद् वायोः प्रयोगो भवति स प्रयत्नः अल्पप्राणः ।

8. महाप्राणः - महान् प्राणो यस्योच्चारणे स ध्वनिविशेषः महाप्राणः । अर्थात् यस्य ध्वनेरुच्चारणे अत्यधिकवायुप्रयोगो भवति स महाप्राणध्वनिः । प्रत्येकवर्गस्य द्वितीयचतुर्थध्वनिः महाप्राणसंज्ञकः । यथा - ख घ छ झ ठ ढ थ ध फ भ श ष स ह एते चतुर्दश । तेषामुच्चारणे हि प्राणवायोर्भूयान् प्रयास इति । अतः महाप्राण इति संज्ञा । यत्र वायोः प्रयोगोऽधिको भवति तत्र महाप्राणप्रयत्नः ।

9. उदात्तः - उच्चः स्वरः, आरोही स्वर एव, वायोरूर्ध्वं गच्छतः शरीरस्य वक्षःस्थलस्य, कण्ठस्य, भ्रूमध्यस्य च आयामो भवति तेनोत्पन्नः स्वरः, आयामो नाम वायुनिमित्त-मूर्ध्वगमनं गात्राणाम्, तेन य उच्यते स वा । समानस्थाने मूर्ध्नि आसन्ने उपरिभागजातेन प्रयत्नेन उच्चार्यमाणस्वरः उदात्तगुणकत्वात् उदात्तसंज्ञो भवति । यथा वा कण्ठः, तालु, मूर्धा, दन्ताः, नासिका च ध्वनीनाम् उच्चारणस्थानानि तेषु ऊर्ध्वभागे निष्पन्नः (उच्चार्यमाणः) अच् (स्वरवर्णः) उदात्तसंज्ञकः भवति यथा वा आयामेनोर्ध्वगमनेन गात्राणां यः स्वरो निष्पद्यते स उदात्तसंज्ञो भवति । यदा सर्वाङ्गानुसारी प्रयत्नस्तीव्रो भवति तदा गात्रस्य निग्रहः, कण्ठबिलस्य चाणुत्वं स्वरस्य च वायोस्तीव्रगतित्वात् रौक्ष्यं भवति, तमुदात्तमाचक्षते ।

10. अनुदात्तः - नीचः, अवरोही स्वरः, वायोरधः गच्छतः वक्षस्थलादीनां मार्दवं भवति तेनोत्पन्नः स्वरः वा । इकारस्य उच्चारणस्थानं तालु तर्हि तालुनः अधोभागे इकारः उच्चार्यते तर्हि स अनुदात्तसंज्ञकः भवति नीचैर्मार्दवेणाधोगमनेन गात्राणां यः स्वरो निष्पद्यते सोऽनुदात्तसंज्ञको भवति । यदा तु मन्दः प्रयत्नो भवति तदा गात्रस्य स्रंसनं, कण्ठबिलस्य महत्त्वं, स्वरस्य च वायोर्मन्दगतित्वात् स्निग्धता भवति, तमनुदात्तमाचक्षते विश्रम्भो नामाधोगमनं गात्राणां वायुनिमित्तम्, तेन य उच्यते सोऽनुदात्तः । ऋग्वेदमन्त्रेषु अक्षराणाम् अधस्तात् प्रदत्ता रेखा अनुदात्तस्वरस्य सूचिका। तद्यथा- अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातम् ॥

11. स्वरितः - उच्चनीचमिश्रितः, समाहारः (स्वरित उदात्तस्य अनुदात्तस्य च समाहारः (समन्वयः) भवति), समस्वरः, उदात्तानुदात्तस्वरसन्निकर्षात्, उदात्तानुदात्तस्वरसन्निपातात् स्वरितः, उदात्तः अनुदात्तः च यं स्वरम् आश्रयतः स, आक्षेपो नाम तिर्यग्गमनं गात्राणां वायुनिमित्तम, तेन य उच्यते सः, उदात्तानुदात्तत्वे ध्वनिर्धर्मौ समाह्रियेते यस्मिन् सोऽच्

वा। ऋग्वेदमन्त्रेषु अक्षराणाम् उपरि दण्डायमाना रेखा स्वरितस्वरस्य सूचिका तद्यथा - अग्निमीळे ।

**आधुनिकभाषाविज्ञानदृष्ट्या**

अ) तत्र स्वराणां संवृताऽर्धसंवृताऽर्धविवृतविवृतभेदाः।

१. **संवृतः** -

आस्यद्वारसङ्कुचनेन यः स्वरः उत्पादितो भवति स संवृतः। यथा इ ई उ ऊ।

२. **अर्धसंवृतः** -

आस्यद्वारम् अर्धसङ्कुचितो भवति यस्य उच्चारणे स स्वरः। यथा ए ओ ।

३. **अर्धविवृतः** -

यस्य स्वरस्य उच्चारणे आस्यद्वारः अर्धोद्घाटितो भवति स स्वरः। यथा ऐ औ ।

४. **विवृतः**-

यस्य उच्चारणे आस्यद्वारं पूर्णरूपेणोद्घाटितो भवति स स्वरः। यथा अ आ ।

आ) व्यञ्जनानामपि अष्टभेदाः, स्पर्शः, स्पर्शसंघर्षी, संघर्षी, अनुनासिकः, पार्श्विकः, लुण्ठितः, उत्क्षिप्तः, अर्द्धस्वरश्च ।

१. **स्पर्शः। ( Stops/Plosive )**

यस्मिन् काले आस्यद्वारं पिधाय पुनरुद्घाट्यते तस्मिन् काले तस्य परिणामस्वरूपवायु उच्चारणस्थानानां स्पर्शमात्रं करोति तदा आस्यनिःसृतानां व्यञ्जनध्वनीनां स्पर्शः इति नाम । यथा क च ट त प इति । यथा वा स्पर्शः येषां ध्वनीनामुच्चारणे जिह्वामूलमध्योपाग्राहिकं करणं तत्तद्ध्वनिसम्बद्धे स्थाने सम्यग् लग्नं भवति ते कादयो ध्वनयः स्पर्शाः, स्पृष्टप्रयत्नजन्यत्वात् स्पर्शाः, जिह्वामूलतालुमूर्ध-दन्तोष्ठादिभिः परस्परं स्पर्शैरभिनिष्पत्याविर्भवन्तीति स्पर्शाः वा ।

२. **स्पर्शसंघर्षी ( Affricates )**

आस्यद्वारं पिधानानन्तरमुद्घाटने यदा वायुः उच्चारणस्थानेषु घर्षणं कृत्वा बहिर्गच्छति तदा या व्यञ्जनध्वनिः उच्चारितः भवति तस्याः स्पर्शसंघर्षी इति नाम यथा च छ ज झ इति ।

**३. संघर्षी ( Spirants )**

आस्यद्वारस्याधिकसङ्कुचनकाले वायुः घर्षणं कृत्वा चोत्कारध्वनिमुत्पाद्य च निर्गच्छति तदा उत्पद्यमाना व्यञ्जनध्वनिः सङ्घर्षी यथा श स व थ ख फ ज इति, तथा च जिह्वामूलीयः उपध्मानीयः च ।

**४. अनुनासिकः/ नासिक्यः। ( Nasals )**

यदा आस्यद्वारं पिधायानन्तरमुद्घाट्यते तदा नासिकाविवरमपि उद्घाटितो भवति तत्र व्यञ्जनध्वनिः नासिकया सहयोगेन उच्चारितः भवति स, मुखसहितनासिकया यः वर्णः उच्चार्यते स, नासिकयानुगतः नासिकामभिहत्य वायुनाभिव्यञ्जितः, मुखेन नासिकया च सम्भूयोच्चार्यो ध्वनिः मुखयुक्तनासिकयोच्चार्यमाणो ध्वनिः वा । यथा ङ ञ ण म न इति । ङञणनमा नित्यमनुनासिकाः, यँ वँ लँ अपि निरनुनासिका अनुनासिकाश्च भवन्ति । वर्गाणामन्त्यो ध्वन्यनुनासिको भवति ते ङञणनमाः । ञमङणनानां ध्वनीनां ताल्वोष्ठकण्ठमूर्धदन्ताः उच्चारणस्थानानि क्रमानुसारं, परन्तु एतैः स्थानैः सह नासिकाऽपि उच्चारणस्थानं विद्यते एतेषाम् ।

**५. पार्श्विकः ( Laterals )**

आस्यद्वारस्य मध्ये एव पिधाने तथा वायोरपि आस्यद्वारात् निष्क्रमणावसरे उच्चारितः व्यञ्जनध्वनिः यथा ल इति । अस्य उच्चारणे प्राय जिह्वाग्रभागस्य दन्तमूलोपरि स्पर्शे सति जिह्वाया वामदक्षिणभागाभ्यां वायोर्निःसारणं भवति ।

**६. लुण्ठितः ( Trills )**

यदा मुखविवरो जिह्वाग्रद्वारा द्वित्रिवारं शीघ्रमेव उद्घाटितो पिधाति च तदा उच्चरितध्वनिः यथा र इति । अस्य उच्चारणे जिह्वाग्रभागः कम्पमानः सन् वर्त्स्यभागं त्रिः स्पृशति लुण्ठितः ।

**७. अर्धस्वरः। ( Semivowel)**

अर्धस्वरः येषां ध्वन्युच्चारणकाले मुखद्वारः बहुसङ्कुचितो भवति तस्मादपि वायुः स्वरसादृश्येन मध्यतो निःसरति तदा उत्पन्नध्वनिः यथा य व इति ।

य व नूतनध्वनिशास्त्रिणो यकारं वकारञ्च अर्धस्वरौ मन्यन्ते । वस्तुतस्तु प्रातिशाख्येऽपीमौ ध्वनी अधस्वरसंज्ञकौ प्रोक्तौ । अर्धस्वरसंज्ञकयकारस्योच्चारणे जिह्वा-ग्रभागः किञ्चिदेव तालुस्थानं स्पशति ए अ सदृशञ्च तस्योच्चारणं क्रियते । तद्यथा यम नियम अय इत्यादिशब्देषु एवं वकारस्याप्युच्चारणे ओष्ठद्वयं किञ्चिदेव परस्परं स्पृश्यते

जिह्वया, पश्चाद्भागश्च समुपस्थितो भवति । यथा स्वाद स्वर इत्यादिशब्देषु अत्र वकारस्य उच्चारणम् ओ अ सदृशं क्रियते । डा.सरयूप्रसादाग्रवालमते कदाचित् य व ध्वनीनामुच्चारणं मध्यमरूपेण भवति, तदा तौ न पूर्णतया स्वरौ भवतः न पूर्णतया व्यञ्जने अत्र तादृशोः ध्वन्योः अर्धस्वर इति संज्ञा ।

८. **उत्क्षिप्तः। ( Flapped )**

यदा जिह्वाग्रो परिवर्त्य तालु स्पर्श्य मुखद्वारं सम्प्रेष्य शीघ्रमुद्घाटयति तदा उत्पन्नध्वनिः यथा ड ढ इति । अस्योच्चारणे जिह्वाग्रभागः उत्क्षिप्य त्वरापूर्वकं कठोरतालुनः स्पर्शं करोतीति उत्क्षिप्तः ।

**अत्र विशेषः-**

1. मनमोहनघोषमतेन उपरिवर्णितेषु श्वासाघोषयोर्मध्ये तथा घोषनादयोर्मध्ये न कोऽपि भेदः ।
2. डा. धीरेन्द्रवर्ममहोदयः बाह्यप्रयत्नेषु केवलं घोषाघोषार्थं कृतप्रयत्नानां स्थानं ददाति । अर्थात् तन्मते बाह्यप्रयत्नभाषाध्वनीनां केवलं घोषाघोषरूपेण भेदद्वयम् ।
3. एलेनमहोदयः बाह्यप्रयत्नभाषाध्वनीनां भेदषट्कं स्वीकरोति घोषाघोषमहाप्राणाल्पप्राणा-नुनासिकनिरनुनासिकभेदात् ।

**निष्कर्षः**

सर्वोऽयं ध्वनिविभागः प्रयत्नमुपाधिमवलम्ब्य भाषाविज्ञानदृष्ट्या दर्शितः । ह्रस्वः अकारः संवृतप्रयत्नविशिष्टो भवति, तत्र ध्वनावुत्पद्यमाने यदा कण्ठादिस्थानं जिह्वाग्रोपाग्रमध्यमूलानि करणानि प्रयत्नेन परस्परं स्पृशन्ति तदा स्पृष्टता, ईषद् यदा स्पृशन्ति सा ईषत्स्पृष्टता, सामीप्येन यदा स्पृशन्ति सा संवृतता, दूरेण यदा स्पृशन्ति सा विवृतता । वायुर्यदा मूर्द्धिन्प्रतिहतो निवृत्तः कोष्ठमभिहन्ति तत्र यदा गलबिलस्य संवृतत्वं तदा संवारो नाम ध्वनिर्जायते । यदा विवृतत्वं तदा विवारः । संवृते गलबिले अव्यक्तशब्दो नादः विवृते श्वासः । यदा स्थानाभिघातजे ध्वनौ नादोऽ-नुप्रमीयते तदा नादध्वनिसंसर्गाद् घोषो जायते । यदा श्वासोऽनुप्रमीयते तदा श्वासध्वनि-संसर्गादघोषः। महति वायौ महाप्राणः । अल्पे अल्पप्राणः । कण्ठस्य विस्तरणं स एव विवारः । अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमानां बाह्यप्रयत्नः । आभ्यन्तरप्रयत्नाः बाह्यप्रयत्नाश्च ध्व-न्युत्पत्तेः पूर्वस्मिन् काले एव भवन्ति । एवमत्र विविधदृष्ट्या विश्लेषणं विवेचनञ्च कृतं दृश्यते । तथा च प्राचीननवीनभाषावैज्ञानिकानां मध्ये प्रायेण साम्यं कुत्रचित् किञ्चित् वैषम्यं दृश्यते ।

**सन्दर्भाः**


1. भाषाविज्ञान एवं भाषाशास्त्र, पृ. सं. 6 ।
2. भाषाविज्ञान एवं भाषाशास्त्र, पृ. सं. 127-142 ।
3. क. भाषाविज्ञानकोश, पृ. सं. 317, ख. वाग्विज्ञान (भाषाशास्त्र), पृ. सं. 103-104 ।
4. वैदिक साहित्य, पृ. सं. 365 ।
5. वर्णरत्नप्रदीपिकाशिक्षा ।
6. वैदिक-ध्वनि-विज्ञान, पृ. सं. 75, भाषाशास्त्र का परिभाषिक शब्दकोश, पृ. सं. 241।
7. क. भाषाशास्त्र का परिभाषिक शब्दकोष, पृ. सं. 41, ख. वैदिक ध्वनि-विज्ञान, पृ. सं. 76-77 ।
8. क. भाषाविज्ञानकोश, पृ. सं. 608, ख. वैदिक ध्वनि-विज्ञान, पृ. सं. 77, भाषा-विज्ञान-सार, पृ. सं. 119, भाषाशास्त्र का पारिभाषिक शब्दकोश, पृ. सं. 241 ।
9. भाषाशास्त्र का पारिभाषिक शब्दकोश, पृ. सं. 41, भाषा-विज्ञान-सार, पृ. सं. 120 ।
10. क. भाषाविज्ञानकोश, पृ. सं. 679-680, ख. वैदिक ध्वनि-विज्ञान, पृ. सं. 77, भाषा-विज्ञान-सार, पृ. सं. 119 ।
11. वाग्विज्ञान (भाषाशास्त्र), पृ. सं. 104-105 ।
12. वैदिक साहित्य पृ. सं. 365 ।
13. भाषाविज्ञानकोश, पृ. सं. 608, भाषाविज्ञान सिद्धान्त और स्वरूप, पृ. सं. 145, भाषाशास्त्र का पारिभाषिक शब्दकोश, पृ. सं. 241 ।
14. भाषाविज्ञानकोश, पृ. सं. 679, भाषाविज्ञान सिद्धान्त और स्वरूप, पृ. सं. 145 ।
15. भाषाविज्ञानकोश, पृ. सं. 669, भाषाशास्त्र का पारिभाषिक शब्दकोश, पृ. सं. 264 ।
16. भाषाविज्ञानकोश, पृ. सं. 336 ।
17. भाषाविज्ञानकोश, पृ. सं. 203, भाषाविज्ञान सिद्धान्त और स्वरूप, पृ. सं. 145, भाषाशास्त्र का पारिभाषिक शब्दकोश, पृ. सं. 84-85 ।
18. भाषाविज्ञानकोश, पृ. सं. 14, भाषाविज्ञान सिद्धान्त और स्वरूप, पृ. सं. 145, भाषाशास्त्र का पारिभाषिक शब्दकोश, पृ. सं. 5 ।
19. भाषाविज्ञानकोश, पृ. सं. 58, ख. भाषाशास्त्र का पारिभाषिक शब्दकोश, पृ. सं. 26-27, भाषाविज्ञान सिद्धान्त और स्वरूप, पृ. सं. 145, ।

20. भाषाविज्ञानकोश, पृ. सं. 510, भाषाविज्ञान सिद्धान्त और स्वरूप, पृ. सं. 145-146, भाषाशास्त्र का पारिभाषिक शब्दकोश, पृ. सं. 206-207 ।
21. भाषाविज्ञानकोश, पृ. सं. 112, भाषाविज्ञान सिद्धान्त और स्वरूप, पृ. सं. 146, भाषाशास्त्र का पारिभाषिक शब्दकोश, पृ. सं. 43 ।
22. भाषाविज्ञानकोश, पृ. सं. 19, भाषाविज्ञान सिद्धान्त और स्वरूप, पृ. सं. 146, भाषाशास्त्र का पारिभाषिक शब्दकोश, पृ. सं. 6 ।
23. ऋग्वेदः 1/1/1 ।
24. भाषाविज्ञान सिद्धान्त और स्वरूप, पृ. सं. 146, भाषाशास्त्र का पारिभाषिक शब्दकोश, पृ. सं. 228 ।
25. भाषाविज्ञान एवं भाषाशास्त्र पृ. सं. 168, 170-175 ।
26. भाषाविज्ञान एवं भाषाशास्त्र पृ. सं. 175 ।
27. भाषाविज्ञान एवं भाषाशास्त्र पृ. सं. 168, 176-178 ।
28. भाषाविज्ञान एवं भाषाशास्त्र पृ. सं. 168, 179-182 । भाषाशास्त्र का पारिभाषिक शब्दकोश, पृ. सं. 6 ।
29. भाषाविज्ञान एवं भाषाशास्त्र पृ. सं. 168, 182-183 ।
30. भाषाविज्ञान एवं भाषाशास्त्र पृ. सं. 168, 183-184 ।
31. भाषाविज्ञान एवं भाषाशास्त्र पृ. सं. 179 ।
32. भाषाविज्ञान एवं भाषाशास्त्र पृ. सं. 184 ।
33. भाषाविज्ञानकोश पृ. सं. 318 ।
34. भाषाविज्ञानकोश पृ. सं. 318 ।
35. भाषाविज्ञानकोश पृ. सं. 318 ।

**सन्दर्भग्रन्थसूची**


1. भाषाविज्ञानकोश - डा. भोलानाथ तिवारी, ज्ञानमण्डल लिमिटेड, वाराणसी 1 प्रथम संस्करण संवत् 20204 ।
2. भाषाविज्ञान एवं भाषाशास्त्र - डॉ. कपिलदेव द्विवेदी, विश्वविद्यालयः प्रकाशन, वाराणसी, 12 संस्करण-2010 ।

3. शुक्लयजुर्वेदप्रातिशाख्यम् - डा. वीरेन्द्रकुमार वर्मा, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली ११०००७ पुनर्मुद्रित संस्करण १९८७ ।
4. परमलघुमञ्जूषा - नागेशभट्ट डा जयशङ्करलाल त्रिपाठी, कृष्णदास अकादमी वाराणसी प्रथम संस्करण, सन् १९८५ ।
5. वैदिक व्याकरण (छात्र संस्करण) - मूल लेखक - आर्थर एन्थोनी मैकडानल, अनुवादक - डॉ. सत्यव्रत शास्त्री, मोतीलाल बनारसीदास, दिल्ली, प्रथम संस्करण, 1971 ।
6. संस्कृत व्याकरण (Sanskrit Grammar) - मूल लेखक - डब्ल्यू. डी. ह्विटने, अनुवादक - डॉ. मुनीश्वर झा, उत्तरप्रदेश हिन्दी ग्रंथ अकादमी लखनऊ, प्रथम संस्करण, 1971 ।
7. भारतीय भाषाशास्त्रीय चिन्तन - संपादक, डॉ. विद्यानिवास मिश्र, अनिल विद्यालंकार, डॉ. माणिकलाल चतुर्वेदी, राजस्थान हिन्दी ग्रन्थ अकादमी जयपुर, प्रथम संस्करण, 1976 ।
8. भाषावैज्ञानिक निबन्ध - हेचन्द्र जोशी, राधाप्रकाशन, नजीराबाद, लखनऊ प्र.सं.1977 ।
9. वैदिक ध्वनि - विज्ञान - डॉ. विजय शङ्कर पाण्डेय, अक्षयवट प्रकाशन, इलाहाबाद-2, प्रकाशन वर्ष 1987 ।
10. वैदिक-स्वर-समीक्षा - श्रीअमरनाथ शास्त्री, प्रकाशक - चन्द्रशेखर शास्त्री, सन् 1964।
11. भाषाशास्त्र का पारिभाषिक शब्दकोश - राजेन्द्र द्विवेदी, आत्माराम एण्ड संस, काश्मीरी गेट, दिल्ली-6, प्रथम संस्करण, 1963 ।
12. भारतीय भाषाविज्ञान की भूमिका - संपादक (डॉ.भोलानाथ तिवारी, डॉ. माणिकलाल चतुर्वेदी, डॉ. भगतसिंह), नेशनल पब्लिशिंग हाउस, दरियागंज, दिल्ली, प्रथम संस्करण, 1972 ई. ।
13. वाग्विज्ञान (भाषाशास्त्र) - आचार्य सीताराम चतुर्वेदी, चौखम्बा विद्याभवन वाराणसी, 1 संस्करण - वि. सं. 2025 ।
14. ऋग्वेदप्रातिशाख्यम् (श्रीशौनकीसम्) श्रीमङ्गलदेव शास्त्री, K. Mittra at The Indian press, Ltd, Allahabad, सन् १९३१ ।
15. पाणिनीयशिक्षा - शिवराज आचार्य कौण्डिन्न्यायन, चौखम्बा विद्याभवन, वाराणसी २२१००१, प्रथम संस्करण, सन् २०१२ ।

16. Indian Traditions in Linguistics भारतीयभाषाशास्त्रकीपरम्परा - सम्पादक डा. राधावल्लभ त्रिपाठी तथा अच्युतानन्द दाश, प्रतिभा प्रकाशन, २९/५, शक्ति नगर, दिल्ली ११०००७ ।
17. वैदिकस्वर मीमांसा - युधिष्ठिर मीमांसक, श्रीरामलाल कपूर ट्रस्ट, गुरुबाजार, अमृतसर, द्वितीय संस्करण ।
18. भाषाविज्ञान सिद्धान्त और स्वरूप - डॉ. जितराम पाठक, अनुपम प्रकाशन, पटना-4 प्र. सं.1991 ।
19. भाषाविज्ञान (पुष्पलता दीक्षित एवं त्रिभुवन शंकर मिश्र) चाखम्बासुरभारती प्रकाशन, वाराणसी, संस्करण 2011-12 ई. ।
20. भाषा-दर्शन (प्रथम भाग) - डॉ. रामलाल सिंह, रामजी वाजपेयी, ब्रह्मनाल, वाराणसी - 1, सन् 1963 ई. ।

**अन्तर्जालकानि**(websites)

1. www.sanskritdoucuments.org
2. www.archive.org
3. www.sanskrit.nic.in
4. www.sambhashanasandesha.in
5. www.shodhganga.inflibnet.ac.in

**शोधच्छात्रः (व्याकरण)**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैयासंस्कृतविद्यापीठम् ।**
**विद्याविहार, मुम्बई ।**

★★★

# 'इको गुणवृद्धी' इत्यत्र इग्ग्रहणविचारः ।

श्रीमतीऋतम्भरापाण्डेयः

महाभाष्ये तृतीये आह्निके सूत्रद्वयं वर्त्तते । तयोः 'इको गुणवृद्धी' इति विशिष्टं सूत्रमस्ति। अस्मिन् सूत्रे भाष्यकारेण इग्ग्रहणस्य प्रयोजनमिति, 'गुणवृद्धी'ति पदस्य ग्रहणं स्थानिनियमार्थमिति, 'अलोऽन्त्यस्य' इति सूत्रस्य शेषोऽपवादो वेति पक्षयोः पदोपस्थितिपक्षस्य स्थापनम्, 'गुणवृद्धी' इत्यत्र वृद्धीति पदस्य प्रयोजनमिति च निरूप्यते ।

'इको गुणवृद्धी'इति परिभाषासत्रमस्ति । इदं पदद्वयात्मकं सूत्रम् । इकः, गुणवृद्धी इति पदविभागः । गुणश्च वृद्धिश्च, गुणवृद्धी इति इतरेतरयोगद्वन्द्वसमासः । इकः इति षष्ठ्यन्तशब्दः स्वरूपपरः, नपुंसकलिङ्गः, प्रथमैकवचनान्तः । इकस् इति शब्दात् सुप्रत्यये तस्य 'स्वमो-र्नपुंसकात्'[1] इति सूत्रेण लुकि सकारस्य रुत्वविसर्गयोः कृतयोः 'इकः' इति रूपं भवति । ननु सकारान्तशब्दानां पुँल्लिङ्गे प्रथमैकवचने 'अत्वसन्तस्य चाधातोः'[2] इति सूत्रेण दीर्घः प्राप्नोति । यथा वेधस् शब्दस्य वेधाः, सुमनस् शब्दस्य सुमनाः, तद्वदत्रापि दीर्घः कर्त्तव्य इति चेन्न । अत्र सुप्प्रत्ययस्य 'स्वमोर्नपुंसकात्' इति लुका लुप्तत्वात् सुप्प्रत्ययपरकत्वं नास्ति । 'प्रत्ययलोपे प्रत्ययलक्षणम्'[3] इति सूत्रेण प्रत्ययलक्षणमाश्रयितुं न शक्यते, 'न लुमताङ्गस्य'[4] इति सूत्रेण तन्निषेधात् । अस्मिन् सूत्रे 'वृद्धिरादैच्'[5] इति सूत्रतः वृद्धिरिति, 'अदेङ्गुणः'[6] इति सूत्रात् गुण इति चानुवर्त्तते । यत्र, विधीयते, तत्र, इति, उपतिष्ठते इत्यादिपदानामध्याहारः कर्त्तव्यः । एवञ्च 'गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते, तत्र 'इकः' इति षष्ठ्यन्तं पदमुपतिष्ठते' इति सूत्रार्थः।

यत्र साक्षात् स्थानी न निर्दिष्टः 'सार्वधातुकार्धधातुकयोः'[7], सिचि वृद्धिरि'त्यादौ तत्रैवेयं परिभाषा प्रवर्त्तते, न तु 'अचोञ्णिति'[8] इत्यादौ तत्र स्थानिनिर्देशात् । यत्र विधीयते इति युक्त्या 'वृद्धिर्यस्याचामादिः' इत्याद्यनुवादे 'इकः' इति नोपतिष्ठते, अनुवादे परिभाषाणामनुपस्थितेः । अनुवादे परिभाषाणामित्यस्य अनूद्यमानविशेषणेष्वित्यर्थः । 'त्यदादीनामः'[9] 'दिव औत्'[10] इत्यादा-वपि नेदमुपतिष्ठत, तत्र गुणवृद्धिशब्दयोरश्रवणात् । अनेन सूत्रेणोपस्थापितम् 'इकः' इति पदञ्च सम्भवति सामानाधिकरण्ये (वैयधिकरण्यस्यान्याय्यत्वात्) 'सार्वधातुकार्धधातुकयो' रित्यादौ 'इग-न्तस्याङ्गस्य' इत्यादिक्रमेण सम्बद्ध्यते । 'मिदेर्गुणः', 'मृजेर्वृद्धिः' इत्यादौ तु सामानाधिकरण्या-ऽसम्भवात् मिदिमृज्योरवयवस्येक इत्यादिक्रमेण वैय्यधिकरण्येनापि सम्भवति ।

भाष्येऽस्मिन् सूत्रे एवं विचारः कृतोऽस्ति - आदौ 'इग्ग्रहणं किमर्थम् ?' इति प्रश्नमाशङ्क्तमस्यायमभिप्रायः - वक्ष्यमाणज्ञापकादिना आकारादिनिरासात् इक एव गुणवृद्धी भविष्यत इति किमपि विशिष्टं प्रयोजनमस्ति वेति । अथवा गुणवृद्धिग्रहणस्य उत्तरत्र निषेध्यसमर्पणायावश्यकत्वेऽपि, इक्पदस्य इकः स्थाने इत्यर्थार्थमावश्यकत्वेऽपि योगविभागः विषयकोऽयं प्रश्न इति[11] । अस्य समाधानम् 'इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननिवृत्त्यर्थम्'[12] इति वार्त्तिकेन कृतम् । सूत्रे इग्ग्रहणम् आकारनिवृत्त्यर्थं सन्ध्यक्षरनिवृत्त्यर्थं व्यञ्जननिवृत्त्यर्थं च क्रियते इति ज्ञायते । तत् कथमिति सोदाहरणतया अग्रे क्रमेणोपस्थापितम् । आदौ केन प्रकारेण आकारस्य गुणनिवृत्यर्थमिति निरूपितम् -

**आकारनिवृत्त्यर्थम् -**

'इको गुणवृद्धी'ति सूत्रे 'इकः' ग्रहणमाकारादीनां स्थानित्वस्य गुणनिवृत्त्यर्थमस्ति । यथा - याता, वाता । 'या' प्रापणे इति धातोः कर्त्रर्थे 'ण्वुल्तृचौ'[13] इति सूत्रेण तृच्प्रत्यये, 'या + तृ' इति स्थिते, तृ प्रत्ययस्य 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसञ्ज्ञायां, 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणः प्राप्नोति । प्रकृते 'इको गुणवृद्धी' इति सूत्रे 'इकः' इति पदस्याभावात् स च गुणः अविशेषेणाकारस्यापि प्राप्नोति । आकारस्य गुणोऽकारः स्थानसाम्येन । तथा च याता इति रूपं न सिद्ध्यति, एवमेव वाता इत्यत्राऽपि । एवमनिष्टरूपवारणार्थम् 'इक्' ग्रहणमावश्यकम् ।

**सन्ध्यक्षरनिवृत्त्यर्थम् -**

ए, ओ, ऐ, औ इति सन्ध्यक्षराणि सन्ति । एषां सन्ध्यक्षराणां गुणनिवृत्त्यर्थमिग्ग्रहणमावश्यकम् । यथा - ग्लायति, म्लायति । 'ग्लै, म्लै' हर्षक्षये इति धातुः । तत्र ग्लै धातोः लटि तिपि, शपि, ग्लै अति इति स्थिते, शपः सार्वधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणः प्राप्नोति । नन्वैकारोच्चारणसामर्थ्यात् गुणो न भवतीति चन्न । एचां द्विमात्रत्वाविशेषात्, प्रयत्नाधिक्याभावात् एकारोपदेशेपि एकारो गुणः स्यात्[14] । अतः तादृशगुणवारणार्थम् इग्ग्रहणमावश्यकम् एकारस्य इक्त्वाभावात् गुणो न भवति । एकारस्य 'एचोऽयवायावः'[15] इत्ययादेशे ग्लायति, म्लायतीत्यादिरूपाणि सिद्ध्यन्ति ।

**व्यञ्जननिवृत्त्यर्थम् -**

व्यञ्जनस्य गुणनिवृत्त्यर्थं यथा - उम्भिता, उम्भितुम्, उम्भितव्यम् । 'उम्भ' पूरणे इति धातुः तौदादिकः । तस्मात् कर्त्रर्थे 'ण्वुल् तृचौ' इति तृचि, तचः आर्धधातुकत्वात् इडागमे, 'उम्भ + इ + तृ' इति स्थिते ,इट्सहितस्य तृचः यदागमपरिभाषया आर्धाधातुकत्वात्, 'सार्वधातुकार्ध-

धातुकयोः' इति सूत्रेण गुणः प्राप्नोति । स च गुणः अविशेषात् भकारसस्य प्रवर्त्तमानः भकारस्यौष्ठ्यत्वात् ओकारः स्यात् । तद्वारणार्थम् इग्ग्रहणमावश्यकम् । कृते इग्ग्रहणे भकार-स्येक्त्वाभावात्गुणाभावे, मेलने उम्भिता, उम्भितुम् इत्यादिरूपाणि सिद्ध्यन्ति । एवं प्रकारेण इग्ग्रहणमाकारस्य गुणवारणार्थम्, सन्ध्यक्षरस्य गुणवारणार्थम्, व्यञ्जनस्य गुणवारणार्थमावश्यकमिति निरूपितम् । परन्तु अग्रे एतानि इग्ग्रहणस्य प्रयोजनानि खण्डितानि । उक्तञ्च भाष्ये 'आकारनिवृत्त्यर्थेन तावन्नार्थः । आचार्यप्रवृत्तिर्ज्ञापयति नाकारस्य गुणो भवतीति । यदयम् 'आतोऽनुपसर्गे कः' इति ककारमनुबन्धं करोती'ति । **अत्रेदं बोद्धयम्** - आकारस्य गुणनिवृत्त्यर्थमिग्ग्रहणं नास्तीति । आचार्यपाणिनेः प्रवत्तिः ज्ञापयति यदाकारस्य गुणो न भवतीति । यथा 'आतोऽनुपसर्गे कः' इति सूत्रेण उपसर्गभिन्ने सुबन्ते उपपद आदन्तात्धातोः कप्रत्ययो विधीयते। कप्रत्यये 'क्' अनुबन्धोऽस्ति । अतः एषः कित्करणमस्य ज्ञापकम् । तत् कथमिति चेदग्र गोदः कम्बलद इत्युदाहरणद्वयं प्रस्तूयते । गा ददातीत्यर्थे गो शब्दे उपपदे 'दा' धातोः कप्रत्यये अनुबन्धलोपे 'गो + दा + अ' इति स्थिते कप्रत्ययस्य कित्वात् 'आतो लोप इटि च' इति सूत्रेण अजाद्योरार्धधातुकयोः किदिटोः परयोः आतो लोपो विधीयते । आचार्यपाणिनिः 'गोदः' इति रूपं साधनार्थं कप्रत्यये कित्वं विधाय कित्वादाकारलोपं विदधाति । आकारस्य गुणेन अकारे गोद इति जाते 'अतो गुणे' इति द्वयोः अकारयोः पररूपे 'गोदः' इति रूपं सिद्ध्यत्येव । तर्हि कप्रत्यये कित्वं व्यर्थं स्यात् । अतः कित्वं व्यर्थीभूय आकारस्य न गुण इति ज्ञापयति । तदा गुणाभावे कित्वादालोपे गोदः, कम्बलदः एते सिद्धन्ति । एवम् इग्ग्रहणस्य प्रथमप्रयोजनं निराकृतम्।

**द्वितीयप्रयोजनस्य 'सन्ध्यक्षरस्य गुणनिवृत्त्यर्थमि'त्यस्य निराकरणम्** -

'सन्ध्यक्षरनिवृत्त्यर्थेनापि नार्थः । उपदेशसामर्थ्यात्सन्ध्यक्षरस्य गुणो न भवती'ति कथितम्। सन्ध्यक्षराणां (ए, ओ, ऐ. औ) स्थानित्वनिवृत्त्यर्थमिग्ग्रहणमावश्यकमिति व्यर्थमेव, पृथक्तया उपदेशसामर्थ्यात् । आचार्यपाणिनिः 'ए, ओ' इत्यस्य उपदेशान्तरं पुनः 'ऐ, औ' करणं (गुणविधानेन) । लाघवाथम् 'ए, ओ' इत्यस्यव उपदेशः अकरोत् । परन्तु एवं नास्ति । अतः एतेन ज्ञापितं यत् सन्ध्यक्षराणां गुणो न भवतीति ।

**तृतीयप्रयोजनस्य 'व्यञ्जननिवृत्त्यर्थमिग्ग्रहणमि'त्यस्य निराकरणम्** -

व्यञ्जनवर्णानां गुणवारणार्थमिग्ग्रहमिति यदुक्तं तदप्यनावश्यकमेव । पाणिन्या चार्यप्रवृत्ति-जर्ज्ञापयति - न व्यञ्जनस्य गुणो भवतीति । 'सप्तम्यां जनेर्डः'[17] इति सूत्रे डित्करणमस्य ज्ञापकम् । तद्यथा उपसरजः, मन्दुरज इत्यादिरूपसाधनार्थं पाणिन्याचार्यः 'जनेर्डः' इति सूत्रेण सप्तम्यन्ते उपपदे 'जनी प्रदुर्भावे' इति धातोः 'ड' इति प्रत्ययं विधत्ते । डप्रत्यये डकारस्य 'चुटू'

इति सूत्रेण इत्सञ्ज्ञा, अकारः शिष्यते । 'उपसर + जन् + अ' इति जाते, डप्रत्यये डित्वसामर्थ्यात् 'टेः' इति सूत्रेण टिलोपे 'उपसरजः' इति भवति । एवमेव 'मन्दुरजः' इति रूपम् । यदि व्यञ्जनस्य गुणः स्यात् तर्हि 'मन्दुर + जन् अ' इत्यत्र नकाररूपव्यञ्जनस्य अर्धमात्रिकस्य अर्धमात्रिकगुणाभावात् एकमात्रिके अकारे कृते 'मन्दुरज अ अ' इति जाते, त्रयाणामकारणां पररूपेण अकारे 'मन्दुरजः' इति रूपे सिद्धे डप्रत्यये डित्वं व्यर्थीभूय एवं ज्ञापयति न व्यञ्जनस्य गुणो भवतीति । 'मन्दुरज' इत्यत्र गुणाभावे, डित्वात् टिलापे 'मन्दुरजः' इति रूपं सिद्धति । एवञ्च व्यञ्जनस्य गुणवारणार्थमिग्ग्रहमनावश्यकमिति ज्ञायते । एवम् इग्ग्रहणस्य प्रथमं निरूपितानि त्रिणि प्रयोजनानि निराक्रियन्ते ।

पुनरग्रे ज्ञापकानां खण्डनं कृत्वा इग्ग्रहणस्य प्रयोजत्वेनैषां मण्डनं भाष्ये कृतम् मण्डितम् 'नैतानि सन्ति ज्ञापकानि' इत्युक्त्वा आरभ्यते । आदौ यदुक्तं 'आतोऽनुपसर्गे कः' इति सूत्रे कित्करणमाकारस्य गुणनिवृत्त्यर्थमिति चेत् तन्न । 'गोदः' 'कम्बलदः' इत्यादि रूपमाकास्य गुणे पररूपे च कृते सिद्ध्यत्येव । अतः कित्करणम् आकरस्य गुणनिवृत्त्यर्थं नास्तीति । अत्र कित्करणं 'तुन्दशोकयोः परिमृजापनुदोः' इत्युत्तरसूत्रे अनुवृत्त्यर्थमस्ति ।[18] तुन्दशब्दे उपपदे परिपूर्वकमृज् धातोः शोकशब्दे उपपदे अपोपसर्गपर्वकनुद् धातोः आलस्यसुखाहरणयोर्थयोः कप्रत्ययो विधीयते । तुन्दं परिमार्ष्टिः, तुन्दपरिमृजः, अलसः इत्युदाहरणम् । अत्र यदि 'अ' प्रत्ययो विधीयते तर्हि 'तुन्दपरिमृजः' इति रूपं न भवति । अत्र 'अ' प्रत्यये परे गुणे प्राप्ते, किदनुवर्त्तनात् 'क्ङिति च' इति गुणनिषेधः स्यात् । एवञ्च 'तुन्दपरिमृजः' इति रूपं सिद्ध्यति । अतः 'आतोऽनुपसर्गे कः' इति सूत्रे कप्रत्ययस्य उत्तरसूत्रेऽनुवृत्त्या तत्र कित्वस्य प्रयोजनं वर्त्तते इति हेतोः नैतत् कित्वमाकारस्य गुणो न भवतीति ज्ञापने समर्थं भवति । अतः याता, वाता इत्यत्र आकारस्य गुणनिवृत्यर्थम् इग्ग्रहणमावश्यकमेव इति चेत् उच्यते 'गापोष्टक्' इति सूत्रेण पाणिन्याचार्येण 'गै' शब्दे 'पा' पाने इति धातुभ्यां टक् प्रत्ययो विधीयते । अत्र प्रत्यये ककारस्यानुबन्धलोपे अकारः शिष्यते । साम गायतीत्यर्थे सामन् शब्दे उपपदे 'गै' धातोः टप्रत्यये 'आदेच उपदेशेऽशिति'[19] इति सूत्रेण आत्वे 'सामगा अ' इति जाते, 'आतो लोप इटि च' इति सूत्रेणाकारलोपे 'सामगः' इति इति रूपं भवति । अत्र टक्प्रत्यये कित्वस्यावश्यकता नास्ति । टित्वस्य स्त्रीत्वविवक्षायां ङीप्प्रत्ययेन सामगी इति रूपसिद्ध्यर्थमावश्यकत्वेऽपि, कित्वं व्यर्थमेव भवति । कित्वाभावेऽपि साम गा अ इति स्थिते, आकारस्य गुणेन अकारे पररूपे 'सामगः' इति रूपं सिद्ध्यत्येव । एवञ्च 'टक्' प्रत्यये विद्यमानं कित्वं व्यर्थीभूय आकारस्य गुणो न भवतीति ज्ञापयति तथा च आकारस्य गुणनिवृत्यर्थम् 'इग्ग्रहणम्' इति प्रथमं यत् प्रयोजनं कथितं तद्व्यर्थमेव भवति ।

द्वितीयप्रयोजनं सन्ध्यक्षरस्य गुणनिवृत्यर्थमिति, अस्य खण्डनावसरे उपदेशसामर्थ्यादेव सिद्ध्यते इति यदुक्तं तदपि न, यदि एवं चेत् तर्हि सन्ध्यक्षराणाम् आयादयोपि न प्राप्नुवन्ति । अत्रेदं बोध्यं - 'ग्लायते', 'म्लायते' इति रूपम् उपदेशसामर्थ्यात् न सिद्ध्यति ।'ग्लै', 'म्लै' इत्यत्र ऐकारोच्चारणस्य आयादेशः प्राप्नोति, तत्तत् उपदेशसामर्थ्यात् बाध्यते । अत्र ऐकारोच्चारणस्य अविकृतरूपश्रवणार्थत्वात् आयादयो न प्राप्नुवन्ति इति चेत् न, 'यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते'[20] इत्युक्त्या यस्य तु विधेर्निमित्तमेव नासौ बाध्यते । आयादेशस्य एकार एव निमित्तमित्यायादेशो न बाध्यते । गुणं च प्रत्युपदेशोऽनर्थकः अतः स विधिः बाध्यते । एवञ्च सन्ध्यक्षरस्य गुणनिवृत्त्यर्थम् इग्ग्रहणमनावश्यकमेव ।

तृतीयं व्यञ्जनस्य गुणनिवृत्त्यर्थमिग्ग्रहणमावश्यकम् इति प्रतिपाद्य 'जनेर्डः' इति सूत्रे डप्रत्ययस्य डित्वसामर्थ्येन व्यञ्जनस्य गुणो न भवतीत्युक्तम् । किन्तु 'मन्दुर्ज'इति स्थिते 'इको गुणवृद्धी'ति सूत्रे इग्ग्रहणाभावे नकारस्य अकार एव कर्त्तव्य इत्यत्र नियमाभावात् एकारः, ओकारो वा प्रवर्त्तते इति चेत् आन्तर्यात् अर्धमात्रिकस्य नकारस्य तादृशार्धमात्रिकस्य गुणस्याभावात् एकमात्रिक अकार एव क्रियते । न च अनुनासिकश्च नकारस्य स्थाने अनुनासिकाकारः स्यादिति वाच्यम् । तथाऽनुनासिके अकारे कृतेऽपि रूपसिद्धिर्भवतीति इग्ग्रहणमनावश्यकमेव इति चेत् न सप्तम्यां 'जनेर्डः' इत्युत्तरं पठिते 'अन्येष्वपि दृश्यते' इति सूत्रे दृशिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वेन 'गम्' धातोरयं डप्रत्ययः विधीयते । अन्तगः, परागः इत्यादिरूपसाधनार्थम् अन्तशब्दे उपपदे 'गम्' धातोः डप्रत्यये 'अन्त्गम्' इति स्थिते 'इको गुणवृद्धी' इति सूत्रे इग्ग्रहणाभावे गम्धातोः मकारस्य स्थाने गुण उच्यमानः स्थानत आन्तर्यात् ओकारः प्राप्नोति । तदानीमनिष्टं रुपं स्यात् । तत्र अन्तगः इत्यादि रूपसाधानार्थं टिलोपसिद्ध्यर्थं डित्वस्यावश्यकता वर्त्तत इति डित्वसामर्थ्यात् व्यञ्जनस्य गुणो न भवति, अतः व्यञ्जननिवृत्त्यर्थमिग्ग्रहणमावश्यकम् ।

एवञ्च 'इको गुणवृद्धी' इति सूत्रे इग्ग्रहणस्य त्रीणि प्रयोजनानि उक्तानि । प्रथममाकारस्य गुणनिवृत्त्यर्थम्, द्वितीयं सन्ध्यक्षरस्य गुणनिवृत्त्यर्थम्, तृतीयं व्यञ्जनस्य गुणनिवृत्त्यर्थमिति । परं 'गापोष्ठक्'[21] इति सूत्रे कित्करणमेतस्य ज्ञापकं यदाकारस्य गुणो न भवतीति । अतः आकारस्य गुणनिवृत्त्यर्थम् इग्ग्रहणस्यावश्यकता नास्तोति । एवमेव सन्ध्यक्षरस्य गुणनिवृत्त्यर्थमपि इग्ग्रहणस्य आवश्यकता नास्ति उपदेशसामर्थ्यात् । व्यञ्जनस्य गुणनिवृत्यर्थम् 'इको गुणवृद्धी' इति सूत्रे इग्ग्रहणमावश्यकमेव भवति ।

**सन्दर्भाः**

1. वैयाकरणसिद्धान्तकौमुद्यां सूत्र संख्या 319, अष्टाध्याय्यां 7.1.23 ।

2. वैयाकरणसिद्धान्तकौमुद्यां सूत्र संख्या 425, अष्टाध्याय्यां 6.4.14 ।
3. वैयाकरणसिद्धान्तकौमुद्यां सूत्र संख्या 262, अष्टाध्याय्यां 1.1.62 ।
4. वैयाकरणसिद्धान्तकौमुद्यां सूत्र संख्या 263, अष्टाध्याय्यां 1.1.63 ।
5. वैयाकरणसिद्धान्तकामुद्यां सूत्र संख्या 16, अष्टाध्याय्यां 1.1.1 ।
6. वैयाकरणसिद्धान्तकौमुद्यां सूत्र संख्या 17, अष्टाध्याय्यां 1.1.2 ।
7. वैयाकरणसिद्धान्तकौमुद्यां सूत्र संख्या 2168, अष्टाध्याय्यां 7.3.84 ।
8. वैयाकरणसिद्धान्तकौमुद्यां सूत्र संख्या 254, अष्टाध्याय्यां 7.2.115 ।
9. वैयाकरणसिद्धान्तकौमुद्यां सूत्र संख्या 265, अष्टाध्याय्यां 7.2.102 ।
10. वैयाकरणसिद्धान्तकौमुद्यां सूत्र संख्या 336, अष्टाध्याय्यां 7.1.84 ।
11. वैयाकरणमहाभाष्यम् उद्द्योत, पृ. संख्या 183 ।
12. वैयाकरणमहाभाष्यम् पृ. संख्या 139 ।
13. वैयाकरणसिद्धान्तकौमुद्यां सूत्र संख्या 2895, अष्टाध्याय्यां 3.1.133 ।
14. वैयाकरणमहाभाष्यम् पृ. 141 ।
15. वैयाकरणसिद्धान्तकौमुद्यां सूत्र 61, अष्टाध्याय्यां 6.1.78 ।
16. वैयाकरणमहाभाष्यम् पृ. संख्या 142 ।
17. वैयाकरणसिद्धान्तकौमुद्यां सूत्र 3007, अष्टाध्याय्यां 3.2.97 ।
18. वैयाकरणमहाभाष्यम् पृ. संख्या 143 ।
19. वैयाकरणसिद्धान्तकौमुद्यां सूत्र 2370, अष्टाध्याय्यां 6.1.45 ।
20. वैयाकरणमहाभाष्यम् पृ. संख्या 143 ।
21. वैयाकरणसिद्धान्तकौमुद्यां सूत्र संख्या 2922, अष्टाध्याय्यां 3.2.8 ।

**सहायकग्रन्थसूची** -


1. व्याकरणमहाभाष्यम्, षष्ठसंस्करणम्, चौखम्भाप्रकाशन, वाराणसी, सम्वत् - 2067
2. महाभाष्यम्, प्रथमसंस्करणम्, ईस्टर्न बुक लिंकर्स, दिल्ली, 1982 ।
3. व्याकरणमहाभाष्यम्, प्रथमसंस्करणम्, श्री मोतीलाल बनारसीदास, दिल्ली, सम्वत् - 2025 ।
4. पातञ्जलं महाभाष्यम्, द्वितीयं संस्करणम्, वाणीविलास प्रकाशन, वाराणसी, 1988 ।
5. व्याकरणमहाभाष्ये नवाह्निकम्, पञ्चमं संस्करणम्, निर्णयसागरमुद्रणालयः, मुम्बई, 1951।

6. व्याकरणमहाभाष्यम् - राष्ट्रियसंस्कृतसंस्थानम् नवदेहली ।
7. व्याकरणमहाभाष्यम् (नवाह्निकम्, प्रदीपोद्योततत्त्वालोकटीकासमुल्लसितम्), षष्ठ-संस्करणम्, चौखम्भाप्रकाशन, वाराणसी, सम्वत् -2067 ।
8. व्याकरण महाभाष्य हिन्दी अनुवाद तथा विवरण, चारुदेव शास्त्री, मोतीलाल बनारसीदास मुम्बई - 2002 ।
9. अमरकोषः, (रामाश्रमीसुधाटीकासहितः), द्वितीयसंस्करणम्, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 1987 ।
10. महाभाष्यम् (हिन्दीव्याख्यया सहितम्), युधिष्ठिरमीमांसकाः, प्रथमसंस्करणम्, श्री प्यारेलाल द्राक्षादेवी न्यास (ट्रस्ट), दिल्ली, वि.सं.2029 ।
11. पाणिनीयः अष्टाध्यायीसूत्रपाठः, सप्तदशं संस्करणम्, राधाप्रेस, दिल्ली, 2005 ।
12. धातुपाठः, षष्ठसंस्करणम्, मन्त्री रामलाल कपूर ट्रस्ट, सोनीपत, 2000 ।
13. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वबोधिनीसहिता) श्रीगिरिधारशर्मणा श्रीपरमेश्व-रानन्दशर्मणा च संशोध्य सम्पादिता, मोतीलाल बनारसीदासः, पुनर्मुद्रणः दिल्ली-2011 ।
14. वैयाकरणसिद्धान्तकौमुदीसम्पादकः डा. शिवप्रसाद शर्मा, चौखम्भासंस्कृतप्रतिष्ठानम्, वाराणसी प्रथमसंस्करणम् - 2008 ।
15. वैयाकरणसिद्धान्तदिग्दर्शनम्, प्रो.बोधाकुमारझाः, प्रथमसंस्करणम्, रचना प्रकाशनम्, जयपुर, 2006 ।

**उपयुक्तसंसाधनम् -**

1. धातुरूपाणि
2. वाचस्पत्यम् ।
3. शब्दकल्पद्रुमः ।
4. अष्टाधयायी सूत्रानुक्रमणिका ।

**शोधच्छात्रा ( व्याकरणम् )**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैया संस्कृतविद्यापीठम्**
**विद्याविहारः, मुम्बई - ७७**

★★★

# महाभाष्यदृशा ‘इको गुणवृद्धी’ सूत्रविमर्शः

✍श्रीसत्यराजरेग्मी

व्याकरणशास्त्रपरम्परायां ‘त्रिमुनिव्याकरणम्’ इति या प्रसिद्धिः वर्तते, तत्र महषिपतञ्जलिः विशिष्टां भूमिकां निर्वहति । तेन व्याकरणशास्त्रस्य ‘महाभाष्यम्’ इत्याख्यः अपूर्वो ग्रन्थः विलिखितः । स च ग्रन्थः महर्षिपाणिनेः शब्दानुशासनस्य समस्तानां वैदिकलौकिकशब्दानां शङ्कासमाधानमूलको विद्यते ।

महाभाष्यस्य तृतीयाह्निके महाभाष्यकारेण ‘वृद्धिरादैच्’[1] ‘इको गुणवृद्धी’[2] इत्यनयोः सत्रयोः भाष्यं विहितम् । मध्यस्थम् ‘अदेङ्गुणः’[3] इति सूत्रमेकं न व्याख्यातम् । तत् विनष्टमित्येव अनुमीयते । आह्निकेऽस्मिन् भगवता पतञ्जलिना सर्वादौ ‘वृद्धिरादैच्’ इति सूत्रे आक्षेपसमाधानपद्धत्या कुत्वविवेचनम्, तद्भाविताऽतद्भावितादैचां संज्ञाविवेचनम्, वृद्धिशब्दस्य माङ्गलिकत्वकथनम्, संज्ञायां प्राप्तस्य इतरेतर दोषविवेचनम्, प्रत्येकशब्दं विनापि आ, ऐ, औ वर्णानां प्रत्येकं वृद्धिसंज्ञाविवचेनम्, आदैच् इत्यत्र तपरकरणविवेचनञ्च कृतम् ।

ततः ‘इको गुणवृद्धी’ इति परिभाषासूत्रस्य विवचने अस्मिन् सूत्रे इग्ग्रहणप्रयोजनम्, सूत्रार्थसार्थकता, इको गुणवृद्धीति परिभाषोपस्थितिः, अस्याः परिभाषायाः स्वातन्त्र्यम्, सूत्रे वृद्धिग्रहणप्रयोजनम्, परिभाषायाः स्वतन्त्रविधित्वञ्च अवमत्य विधिविशेषसाधनं विवचेनञ्च साधितम् ।

‘महाभाष्यदृशा ‘इको गुणवृद्धी’ सूत्रविमर्शः’ इत्यस्मिन् शीर्षके विशेषेण ‘इको गुणवृद्धी’ सूत्रार्थः सूत्र इग्ग्रहणस्य प्रयोजनम्, ‘इको गुणवृद्धी’ सूत्रम् ‘अलोऽन्त्यस्य’ सूत्रस्य शेषः आहोस्वित् तपवादः, ‘इको गुणवृद्धी’ इत्यत्र वृद्धिग्रहणस्य प्रयोजनम् । एतेषां विषयाणां विमर्शः क्रियते ।

**‘इको गुणवृद्धी’ सूत्रार्थः**

‘इको गुणवृद्धी’ अस्मिन् सूत्रे ‘इकः’ इति षष्ठ्यन्तः शब्दः स्वरूपपरः । अत्र ‘इकस्’ इति नपुंसकप्रातिपदिकस्य प्रथमैकवचनान्तं पदम् । गुणश्च वृद्धिश्च इति गुणवृद्धी इतरेतरद्वन्द्वः । प्रथमाद्विवचनान्तं रूपम् । ‘वृद्धिरादैच्’ इत्यतः वृद्धिः ‘अदेङ्गुणः’ इत्यस्मात् गुणश्चानुवर्तते । ‘गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयते तत्र इकः इति षष्ठ्यन्तं पदमुपतिष्ठते’[4] इति

वैयाकरणसिद्धान्तकौमुद्यां सूत्रस्यार्थः कृतः । गुणो वृद्धिर्वा उच्चार्य यत्र गुणवृद्ध्योः विधानं सम्पाद्यते तत्र इकः इति षष्ठ्यन्तं पदं समुपतिष्ठते इति काचित् विशिष्टा योजना अनेन सूत्रेण क्रियते ।

**सूत्रे इग्ग्रहणस्य प्रयोजनम्**

'इको गुणवृद्धी' इति सूत्रे इग्ग्रहणं किमर्थम्? इति प्रश्नं समुद्भाव्य पतञ्जलिः प्राह – 'इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननिवृत्त्यर्थम्' इति । तत्र आकरनिवृत्त्यर्थम् – याता, वाता । अत्र आकारस्य गुणः प्राप्नोति । इग्गहणात् तन्न भवति । सन्ध्यक्षरनिवृत्त्यर्थम् – ग्लायति, म्लायति । इत्यत्र सन्ध्यक्षरस्य गुणः प्राप्नोति । इग्ग्रहणान्न भवतीति । व्यञ्जननिवृत्त्यर्थञ्च – उम्भिता, उम्भितुम्, उम्भितव्यम् । अत्रापि व्यञ्जनस्य गुणः प्राप्नोति । इग्ग्रहणात् तन्न प्राप्नोति । अत एव महाभाष्यकारेण उक्तम् – इग्ग्रहणस्य प्रयोजनम् 'आकारनिवृत्त्यर्थम् सन्ध्यक्षरनिवृत्त्यर्थम् व्यञ्जननिवृत्त्यर्थ' वर्तत इति ।

**आक्षेप समाधनञ्च**

ननु 'याता वाता' इत्यादौ गुणनिवृत्त्यर्थम् इग्ग्रहणं व्यर्थम् । 'गापोष्टक्'[5] इति सूत्रे टकः कित्वेनाकारस्य गुणो न भवतीति ज्ञापनात् । अन्यथा टप्रत्यये आकारस्य गुणे द्वयोः आकरयोः पररूपेण सामगेत्यादिसिद्धौ कित्करणं निरर्थकमेव स्यात् । न च 'ग्लायति' इत्यादौ सन्ध्यक्षरस्य गुणव्यावृत्त्यर्थम् इग्ग्रहणमावश्यकमिति वाच्यम् । प्रक्रियालाघवे ऐकारोपदेशसामर्थ्यात् सन्ध्यक्षरस्य गुणो न भवतीति ज्ञापनात् । आयादीनां निमित्तत्वान्न बाधः । यतो हि यं विधिं प्रति उपदेशोऽनर्थकः स विधिर्बाध्यत इति सिद्धान्तः । न च 'उपसरजः, मन्दुरजः' इत्यादौ जनेर्नकारस्य गुणनिवृत्त्यर्थम् इग्ग्रहणम् । 'सप्तम्यां जनेर्डः'[6] इति सूत्रे डवचनेन व्यञ्जनस्य गुणो न भवतीति ज्ञापनादिति चेन्न । 'अन्तगः' इत्यादिसिद्धये 'अन्येष्वपि दृश्यते'[7] इत्यत्र डकारानुवृत्तेः चरितार्थत्वं विद्यते । अतः व्यञ्जनस्य गुणव्यावृत्त्यर्थम् इग्ग्रहणमावश्यकम् ।

ननु अनेन परिभाषासूत्रेण गुणवृद्ध्योर्विधानात् 'दधि मधु' इत्यत्र गुणो न भवति कथम्? न चानेनैव सिद्ध 'मिदेर्गुणः'[8] इत्यादिसूत्रवैयर्थ्यापत्तिरिति वाच्यम् । 'सार्वधातुकार्धधातुकयोः'[9] अनेन गुण एवेति नियमार्थं सूत्रस्य चारितार्थ्यादिति चेदपि न । यतो हि 'उरण् रपरः'[10] इतिवद् 'इको गुणवृद्धी' 'इग्यणः सम्प्रसारणम्'[11] इत्यनयोरपि षष्ठ्यधिकारे करणेन विधिसूत्रेषु एकवाक्यता अर्थबोधेना दोषः, इति यावत् ।

**'इको गुणवृद्धो' सूत्रम् 'अलोऽन्त्यस्य'[१२] सूत्रस्य शेषः आहोस्वित् तदपवादः ?**

'इको गुणवृद्धी' किमयमलोऽन्त्यशेषः आहोस्विदलोऽन्त्यापवाद:? इति प्रश्नमुद्भाव्य भाष्यकार आह-यद्येकं वाक्यं तच्चेदञ्च अलोऽन्त्यस्य विधयो भवन्ति ''इको गुणवृद्धी'' ''अलोऽन्त्यस्य'' इति । ततोऽयं तच्छेषः । यदि नानावाक्यम्-तच्चेदं च 'अलोऽन्त्यस्य विधयो भवन्ति' 'इको गुणवृद्धी-अन्त्यस्य चानन्त्यस्य च' इति ततोऽयं तदपवादः ।

तत्र तच्छेषपक्षे मिदि-मृजि-पुगन्त-लघूपधच्छि-दृशि-क्षिप्र-क्षुद्रेषु इग्रूपान्त्यालोऽभावाद् अनयोः अनुपस्थानात् सर्वादेशापत्तिः । तदपवादपक्षे जुसि सार्वधातुकार्धधातुकह्रस्वाद्योः गुणेषु अनन्त्यस्यापि । अन्त्यस्यानुपस्थानात् गुणापत्तिः । तदपवादपक्षे ''सार्वधातुकार्धधातुकयो:''[13] इति सूत्रेण गुणे सिद्धे ''पुगन्तलघूपधस्य च''[14] इत्यादिसूत्रारम्भसामर्थ्याद् अनन्त्यस्य गुणो यदि स्यात्तर्हि ''पुगन्तलघूपधस्य च'' एवेति नियमात् प्रकृते न दोष इति न वाच्यम्, अनन्तरस्येति न्यायात् । ''सार्वधातुकार्धधातुकयो:'' यदि गुणस्तर्हि ''पुगन्तलघूपधस्य च'' इति नियमेन 'ईहिता' इत्यादौ दोषाभावेऽपि 'सोसुत्' इत्यादौ दोषस्य तादवस्थ्यात् ।

लक्ष्यानुरोधनाद् अनन्तस्य इति न्यायमनाश्रित्य ''पुगन्तलघूपधस्य च'' एव ''सार्वधातुकार्धधातुकयो:'', ''सार्वधातुकार्धधातुकयो:'' एव ''पुगन्तलघूपधस्य च'' इत्युभयविधि-नियमाश्रयणात् न दोष इति न वाच्यम् । 'अनेनिजुः' इत्यादौ ''जुसि च''[15] इति गुणापत्तेः । तस्मान्नायं तच्छेषः । नापि तदपवादः । अदेङ्निष्ठविधेयताप्रयोजकं गुणपदम् । आदैच्निष्ठप्रयोजकं वृद्धिपदञ्च यत्र तत्र इकः इति षष्ठ्यन्तं पदमुतिष्ठते इति पदोपस्थितिपक्ष एव । अत एव नियमात् इको गुणवृद्धी भवतो विप्रतिषेधेन इति क्रोष्टीयोक्तिः अपि सङ्गच्छत ।

अत एव मिदादौ समुपस्थितस्य इक्पदस्य समानाधिकरण्याऽसम्भवाद् व्यधिकरणान्वये निमित्ताभावाद् ''अलोऽन्त्यस्य'' अनुपस्थितिः । ''सार्वधातुकार्धधातुकयो:'' इत्यादौ असमानाधि-करण्यान्वये ''अलोऽन्त्यस्य'' इत्यनेन अन्त्यस्यादेशस्य इत्यर्थः । यद्वा मिदः इः मिदिः मिदेः इत्यादौ सर्वत्र स्थानिनः निर्देशात् तच्छेषपक्षेऽपि न दोषः, इति ।

**''इको गुणवृद्धी'' इत्यत्र वृद्धिग्रहणस्य प्रयोजनम्**

''इको गुणवृद्धी'' सूत्रे वृद्धिग्रहणं किमर्थम्? किं विशेषेण वृद्धिग्रहणञ्च उद्यते? न पुन-र्गुणग्रहणमपि । अयमस्ति विशेषः-गुणविधौ न क्वचित्स्थानी निर्दिश्यते, तत्र अवश्यं स्थानिनिर्देशार्थं गुणग्रहणं कर्तव्यमिति । वृद्धिविधौ पुनः सर्वत्रैव स्थानी निर्दिश्यते - ''अचोऽ-ञ्णिति''[16] ''अत उपधाया:''[17] ''तद्धितेष्वचामादे:''[18] इत्यादि ।

इति आक्षेपं समुपस्थाप्य भाष्यकार आह–'वृद्धिग्रहणमुत्तरार्थम्' 'इहार्थञ्चापि' । ननु इहार्थं वृद्धिग्रहणं कर्तव्यम् ''सिचि वृद्धिः परस्मैपदेषु''[19] इको गुणवृद्धिः स्याद् अनिको मा भूत्, अन्यथा 'अचिकीर्षीत्' इत्यादौ अकारस्यापि वृद्धिप्रसङ्गादिति चेत् न । ''अतो लोपः''[20] इति बाधात् । न च 'अयासीत्' इत्यादौ वृद्धिः शङ्क्या, सत्यां वृद्धौ असत्यां वा नास्ति विशेषः । न चापि 'उदवोढाम्' इत्यादौ सन्ध्यक्षरस्य वृद्धिः शङ्क्या ढलोपस्य असिद्धत्वात् । 'अभैत्सीत्' इत्यादौ व्यञ्जनस्य तु वृद्धिर्न शङ्क्या, हलन्तलक्षणा वृद्ध्या बाधात् । न च ''नेटि''[21] इत्यनेन हलन्तलक्षणावृद्ध्याः बाधे ''सिचि वृद्धिः परस्मैपदेषु'' अनेन 'अकोषीत्' 'अमोषीत्' इत्यादौ षकारस्य वृद्धिः स्यादिति वाच्यम् । ''नेटि'' इत्यनेन ''सिचि वृद्धिः परस्मैपदेषु'' इत्यस्यापि बाधात् । लक्षणं हि नाम-ध्वनति भ्रमति मुहुर्त्तमपि नावतिष्ठते । अथवा सिचिवृद्धेः हलन्त-लक्षणावृद्धिर्बाधिका । तस्याश्च ''नेटि'' इति सूत्रेण बाधादिष्टसिद्धेः । एवम् इहार्थं फलं नास्ति ।

उत्तरार्थं फलमस्ति । ''क्क्ङिति च''[22] इति सूत्रे अनुवृत्त्यर्थं वृद्धिग्रहणं परमावश्यकम्। यद्यपि मृज्यर्थं तत् फलं नास्ति 'मृजेर्वृद्धिश्च' ततो 'ञ्णिति' इति योगविभागेन इष्टसिद्धेः । न च 'न्यनार्ट्' इत्यादौ अटोऽपि वृद्धिः स्यादिति वाच्यम्, अनन्त्यविकारे अन्त्यसदेशस्य अनेन परिहारात्। इहान्ये वैयाकरणाः अजादौ सङ्क्रमे विभाषावृद्धिमारभन्ते –'परिमृजन्ति – परिमार्जन्ति' इति । अस्मिन् व्याकरणशास्त्रेऽपि तत् साधानीयम् । अतः योगविभागः कार्यः । 'मृजेर्वृद्धिश्च' ततः 'अचि क्ङिति' इति अत्र 'अचि क्ङिति' इति नियमार्थं भविष्यति अजादौ एव क्ङिति नान्यत्र ततो 'अचि क्ङिति' 'मृजेर्वृद्धि'र्वा भवति । अतः मृज्यर्थं नास्ति फलम्।

परन्तु 'न्यनुवीत्' अत्र ''गाङ्कुटादिभ्योऽञ्णिन्ङित्''[23] इति ङित्वेऽपि ''सिचि वृद्धिः परस्मैपदेषु'' अनेन वृद्धिर्मा भूत् एतदर्थं वृद्धिग्रहणम् । न च अन्तरङ्गत्वादनुङादेशे कृते ''सिचि वृद्धिः परस्मैपदेषु'' प्राप्नोतीति वाच्यम्, सिचि अन्तरङ्गत्वाभावात् । अन्यथा 'अकार्षीत्' इत्यादौ गुणे रपरत्वे च कृते वृद्धिर्न स्यात् । अत्र निषेधे हलन्तलक्षणाया वृद्धेः स्वीकारेऽपि 'न्यस्तारीत्' इत्यादौ ''नेटि'' इत्यनेन निषेधे हलन्तलक्षणावृद्धिः अप्राप्तेः । अत्र ''अतो ल्रान्तस्य''[24] अनेन वृद्धिस्वीकारे 'अलावीत्' इत्यत्र वृद्ध्यप्राप्तः । 'ल्रान्तस्य' इत्यत्र वकारप्रश्लेषाभ्युपगमेऽपि 'मा भवानतीत्' अत्र वृद्धिः प्राप्नोति ।

यदि ''ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्''[25] इति सूत्रे णिश्व्योः स्थाने 'अविमव्योः' इति प्रश्लेषः उच्यते तर्हि आचार्यप्रवृत्तिर्ज्ञापयति-सिच्यन्तरङ्गान्न भवति । ज्ञापकञ्चात्र ''अतो हलादेर्लघोः''[26] इत्यत्र आकारग्रहणम् । यदि सिचि अन्तरङ्गम् अभविष्यच्चेत् 'अकोषीत्-अमोषीत' इत्यादौ गुणे कृते अलघुत्वात् वृद्ध्यप्राप्तेः अकारग्रहणं व्यर्थमेव अभविष्यत् । न च

'न्यकूटीत्' इत्यादौ प्रतिषेधविषयार्थं अकारग्रहणमिति वाच्यम्, णिश्विप्रतिषेधस्य ज्ञापकत्वात् । तस्माद् इग्लक्षणा वृद्धिः इत्येव सिद्धान्तः ।।

**सन्दर्भाः**


1. पाणिनीयसूत्राष्टाध्यायी-1/1/1 ।
2. पाणिनीयसूत्राष्टाध्यायी-1/1/3 ।
3. पाणिनीयसूत्राष्टाध्यायी-1/1/2 ।
4. वैयाकरणसिद्धान्तकौमुदी, प्रथमो भागः, परिभाषाप्रकरणम् ।
5. पाणिनीयसूत्राष्टाध्यायी-3/2/8 ।
6. पाणिनीयसूत्राष्टाध्यायी-3/2/97 ।
7. पाणिनीयसूत्राष्टाध्यायी-3/2/101 ।
8. पाणिनीयसूत्राष्टाध्यायी-3/2/82 ।
9. पाणिनीयसूत्राष्टाध्यायी-7/3/84 ।
10. पाणिनीयसूत्राष्टाध्यायी-1/1/51 ।
11. पाणिनीयसूत्राष्टाध्यायी-1/1/45 ।
12. पाणिनीयसूत्राष्टाध्यायी-1/1/52 ।
13. पाणिनीयसूत्राष्टाध्यायी-7/3/84 ।
14. पाणिनीयसूत्राष्टाध्यायी-7/3/86 ।
15. पाणिनीयसूत्राष्टाध्यायी-7/3/83 ।
16. पाणिनीयसूत्राष्टाध्यायी-7/2/115 ।
17. पाणिनीयसूत्राष्टाध्यायी-7/2/116 ।
18. पाणिनीयसूत्राष्टाध्यायी-7/2/117 ।
19. पाणिनीयसूत्राष्टाध्यायी-7/2/01 ।
20. पाणिनीयसूत्राष्टाध्यायी-6/4/48 ।
21. पाणिनीयसूत्राष्टाध्यायी-7/2/04 ।
22. पाणिनीयसूत्राष्टाध्यायी-1/1/05 ।
23. पाणिनीयसूत्राष्टाध्यायी-1/2/01 ।
24. पाणिनीयसूत्राष्टाध्यायी-7/2/02 ।

25. पाणिनीयसूत्राष्टाध्यायी–7/2/05 ।
26. पाणिनीयसूत्राष्टाध्यायी–7/2/07 ।

**शोधच्छात्रः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**( मानितविश्वविद्यालयः )**
**क. जे. सोमैयासंस्कृतविद्यापीठम्**
**विद्याविहारः, मुम्बई ।**

★★★

# ''तुल्यास्यप्रयत्नं सवर्णम्'' इत्यस्मिन् सूत्रे सावर्ण्यविचारः

✍आ. पद्मराज रेग्मी

तुल्यास्यप्रयत्नमिति प्रथमान्तपदम्, सवर्णमित्यपि प्रथमान्तपदम् । ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यादिति सूत्रस्यार्थः ।

किं नाम सावर्ण्यम्? इति जिज्ञासायाम् उच्यते-सवर्णस्य भावः सावर्ण्यम् ''**गुणवचनब्राह्मणादिभ्यः कर्मणि च**'' इत्यनेन ष्यञ्प्रत्यये सावर्ण्यमिति शब्दसंस्कारः ।

तुलया संमितं तुल्यम् इति व्युत्पत्या ''**नावयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु**'' इति सूत्रेण संमितार्थे यत् प्रत्ययः । आस्यञ्च प्रयत्नश्च आस्यप्रयत्नम्, तुल्यास्य प्रयत्नश्च सवर्णसंज्ञं भवतीति भाष्याशयः ।

**किं पुनरास्यम्?**

लौकिकमास्यम् । ओष्ठात्प्रभृति प्राक् काकलकात् । काकलकं नाम ग्रीवायामुन्नतप्रदेशः। अस्यन्त्यनेन वर्णान् इति आस्यम्, अन्नमेतदास्यन्दत इति वास्यम् ।

**अथ कः प्रयत्नः?**

प्रयतनं प्रयत्नः । प्रकृष्टो यत्नः इति कोशः । प्रपूर्वात् यततेर्भावसाधनो नङ् प्रत्ययः । अथवा वर्णोच्चारणप्रसङ्गे बाह्याभ्यन्तरविषयः ।

**आस्यमित्यत्राक्षेपभाष्यम्**

यदि लौकिकमास्यम् । किमास्योपादाने प्रयोजनम्? सर्वेषां हि तत्तुल्यम् ।

**समाधानभाष्यम्**

वक्ष्यत्येतत्-प्रयत्नविशेषणमास्योपादानमिति । समादधात्याचार्यः प्रयत्नस्य विशेषणम् आस्योपादानम् ।

**आक्षेपवार्तिकम्**

''सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गः प्रयत्नसामान्यात्''

सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गो भवति । जबगडदशाम् । किं कारणम्? प्रयत्नसामान्यात् एतेषां हि समानः प्रयत्नः ।

**भाष्याशयः**

पृथक् पथक् वर्णानामपि प्रयत्नसमानत्वात् मिथः सवर्णसंज्ञा प्राप्यते । यथा-ज, ब, ग, ड, द एतेषां वर्णनाम् उच्चारणस्थानभिन्नत्वेऽपि स्पर्शत्वात् समानप्रयत्नः । अत एते सवर्ण-संज्ञकाः । ''सिद्धं त्वास्ये तुल्यदेशप्रयत्नं सवर्णम्'' सिद्धमेतत् । कथम्? आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञकाः भवन्तीति वक्तव्यम् । एवमपि किमास्योपादाने प्रयोजनम्, सर्वेषां तत्तुल्यम्? इत्याक्षेपे समाधानमिदम-यत्नविशेषणमास्योपादानम् । सन्ति ह्यास्याद् बाह्याः प्रयत्नाः । ते हापिता भवन्ति । तेषु सत्स्वसत्स्वपि सवर्णसंज्ञा सिद्धा भवति। के पुनस्ते? विवारसंवारौ, श्वासनादा, घोषवदघोषता, अल्पप्राणता महाप्राणतेति । तत्र वर्गाणां प्रथमद्वितीया विकृतकण्ठाः, श्वासानुप्रदाना अघोषाश्च । एकेऽल्पप्राणाः, अपरे महाप्राणाः ।। तृतीयचतुर्थाः संवृतकण्ठा नादानुप्रदाना घोषवन्तः । एकेऽल्पप्राणाः, अपरे महाप्राणाः । यथा तृतीयास्तथा पञ्चमा आनुनासिक्यवर्जम् । आनुनासिक्यमेषामधिको गुणः ।

**भाष्याशयः**

प्रयत्नविशेषणमिति । तस्य संभवव्यभिचारसद्भावादित्यर्थः । बाह्यप्रयत्नव्युदा-साच्चत्वार आभ्यन्तरा गृह्यन्ते । ते स्पृष्टेषत्स्पृष्टविवृतसंवृताख्याः ।

**आक्षेपभाष्यम्**

एवमप्यवर्णस्य सवर्णसंज्ञा न प्राप्नोति किं कारणम्? बाह्यं ह्यास्यात्स्थानमवर्णस्य ।

**आशयः**

काकलकस्याधस्तादुपजत्रुस्थानमवर्णस्यैक इच्छन्ति । सति च बाह्यदेशसंभवे तद् व्यव-छेदायास्येन देशो विशेष्यत इति प्रश्नः ।

**समाधानम्**

सर्वमुखस्थानमवर्णनम् एक इच्छन्ति । अर्थात् अष्टादशभेदात्मकस्य अवर्णस्य कण्ठस्थानं यद्यपि सदृशं तथापि बहिर्भूतात्मके आस्ये तत्स्थानं सवर्णसंज्ञायाः प्रयोजको न सम्भवति ।

**आक्षेपभाष्यम्**

एवमपि व्यवदेशो न प्रकल्पते-'आस्ये येषां तुल्यो देशः' इति । अत्राशङ्क्यते यत् सम्पूर्णमुखमेवावर्णस्य स्थानं भवतीति स्वीकारे मुखे एषां वर्णानां स्थानं तुल्यं ते सवर्णसंज्ञका इति व्यवहार अशक्यः ।

**समाधानभाष्यम्**

व्यपदेशिवद्भावेन व्यवदेशो भविष्यति । निमित्तसद्भावाद्विशिष्टोऽपदेशो मुख्यो व्यवहारो यस्यास्ति स व्यपदेशी । परिभाषेन्दुशेखरेऽपि **'व्यपदेशिवदेकस्मिन्'** अनया परिभाषया उक्तदोषो निवार्यते ।

**एकदेशिभाष्यम्**

अथवा किं न एतेन प्रारम्भो यत्नस्य प्रयत्न इति ।। प्रयतनमेव प्रयत्नः । तदेव च तद्धितान्तमास्यम् । यत्समानं तदाश्रयिष्यामः । किं सति भेदे । सतीत्याह । सत्येव हि भेदे सवर्णसंज्ञया भवितव्यम् । कुत एतत्? भेदाधिष्ठाना हि सवर्णसंज्ञा यदि हि यत्र सर्वं समानं तत्र स्यात्सवर्णसंज्ञावचनमनर्थकं स्यात् । एवं तर्हि प्रयतनमेव प्रयत्नः । तदेव हि तद्धितान्तमास्यम् । न त्वयं द्वन्द्वः आस्यञ्च प्रयत्नश्च आस्यप्रयत्नमिति । किं तर्हि? त्रिपदोयं बहुव्रीहिः-तुल्य आस्ये प्रयत्न एषामिति । अथवा पूर्वस्तत्पुरुषः ततो बहुव्रीहिः-तुल्यः आस्ये तुल्यास्यः तुल्यास्यप्रयत्न एषामिति अथवा परस्तत्पुरुषः ततो बहुव्रीहिः-आस्ये प्रयत्न आस्यप्रयन्तः तुल्य आस्यप्रयत्न एषामिति ।

**भाष्याशयः**

''**तुल्यास्यप्रयत्नं सवर्णम्**'' इत्यस्मिन् सूत्रे समासविधिना चत्वारः पक्षाः निगदिताः सन्ति-1. द्वन्द्वगर्भोबहुव्रीहिः, 2. त्रिपदोबहुव्रीहिः, 3. तुल्यास्यशब्दयोः पूर्वं तत्पुरुषः ततो बहुव्रीहिः, 4. आस्यप्रयत्नशब्दयोः पूर्वं तत्पुरुषः ततो बहुव्रीहिः । एते चत्वारः पक्षाः भाष्ये प्रदर्शिताः । तत्र प्रथमे पक्षे आस्यञ्च प्रयत्नश्च आस्यप्रयत्नम्, तुल्यास्यञ्च तुल्यप्रयत्नञ्च सवर्ण-संज्ञं भवतीत्यर्थः । आस्य शब्देन लौकिकमास्यम् । ओष्ठात्प्रभृति प्राक् काकलकात् । अस्यन्त्यनेन वर्णान् इति व्युत्पत्त्या अन्नं प्राप्यैतदास्यन्दते द्रवीभवतीति व्युत्पत्त्या वाऽऽस्यम् । प्रपूर्वात् यती प्रयत्ने इत्यस्माद् भ्वादिगणस्याद् धातोः भावे नङ्प्रत्यये यत्नशब्दः सिद्धो भवति यत्नमात्रं प्रयत्नः ।

नन्वास्य एव सर्ववर्णानां निष्पन्नत्वाद् आस्योपादानस्य किम्प्रयोजनमितिचेन्न । ज, ब, ग, ड, द वर्णानां प्रयत्नसाम्यात् सवर्णसंज्ञानिरासाय पयत्नाविशेषणार्थमास्यपदोपादानस्याऽऽवश्यक-त्वात् । नन्वेवमपि द्वन्द्वे प्रयत्नास्येनाविशेषणन्मुखप्रयत्नयोस्तुल्यत्वादिकापत्तिस्तदवस्थेति चेन्न, आस्ये तुल्यदेशप्रयत्नमितिन्यासान्तरकरणेन दोषपरिहारात् । अत्र प्रयत्नविशेषणार्थमास्योपादानम् तेन विवारादि बाह्यप्रयत्नसाम्याऽभावेऽपि सवर्णसंज्ञा सिद्धा । न चाऽऽस्याद् बाह्यस्थानत्वेन 'अ' वर्णस्य सवर्णसंज्ञा न स्यादिति वाच्यम्? अवर्ण सर्वमुखस्थाननिष्पन्नत्वात्, मुखाबाह्यत्वाच्च ।

आस्ये येषां तुल्यो देश इति व्यवहारस्तु व्यपिदेशिवद्भावेन विज्ञेयः । ननु न्यासान्तरमाश्रित्य भिन्नदेशेष्वतिप्रसङ्गवारणमयुक्तमिति वाच्यम्? अपाणिनीयत्वात् । भिन्नदेशेष्वतिप्रसङ्गनिरासाय आस्ये भवमिति तद्धितान्तस्य ग्रहणं प्रयत्नशब्देन प्रारम्भो यत्नस्येति । अवर्णस्य एङोश्च तुल्यस्थानत्वाऽभावाच्च न सवर्णसंज्ञा अथवा **''झरो झरि सवर्णे''** इति सूत्रे सवर्णग्रहणेन यत्किञ्चित्भेदे सत्यपि सवर्णसंज्ञा भवतीति ज्ञापनात्सर्वेष्टसिद्धेः । न च स्थानसाम्यात् सकारचकारयोरपि परस्परं सवर्णसंज्ञा स्यादिति वाच्यम्? तुल्य आस्ये प्रयत्न एषामिति त्रिपदबहुव्रीहिस्वीकारेण, तुल्यः आस्यः तुल्यास्यः, तुल्यास्यः प्रयत्नः एषामिति समासस्वीकारेण आस्ये प्रयत्न आस्यप्रयत्नः तुल्यास्यप्रयत्न एषामिति समासेन च अपूर्वोक्तापत्तिनिरासेनेष्टसिद्धिरपि भवतीति सारः ।

**सूत्रेऽस्मिन् सवर्णग्रहणस्य फलम्**

**''अणुदित्सवर्णस्य चाप्रत्ययः''** इति ज्ञापकात् अविधीयमानोऽण् उदितश्च सवर्णसंज्ञकाः स्युरिति भावः स्फुट्यते । अत आदेशप्रत्ययागमभिन्नोऽण् अविधीयमानशब्देन व्यवह्रियते। फलञ्चास्य **''अकः सवर्णे दीर्घः''** सूत्रमिदं पर्याप्तम् । यथा - मनोरमाकारेणाऽपि कथितम्-**'अकोऽकि दीर्घः'** इत्येव सुवचनम् तथा सति **''अ अ''** इत्यस्मिन् सूत्रे दीर्घं स्यात्, सवर्णत्वात् उच्चारणसाम्याच्च । किन्त्वाभ्यन्तरप्रयत्नस्तु भिन्नः । **''विवृतमनूद्य संवृतम् अनेन विधीयते''** इति नियमेन प्रथमस्याकारस्य विवृतम्, द्वितीयस्याकारस्य च संवृतम् । अतो आभ्यन्तरप्रयत्नभिन्नत्वात् **''तुल्यास्यप्रयत्नं सवर्णम्''** इति सूत्रेण सवर्णत्वाभावः । एवं सति **''अ अ''** इत्यत्रापि सवर्णसंज्ञा न ।

वस्तुतस्तु सूत्रमिदं सम्पूर्णाम् अष्टाध्यायीं प्रति असिद्धत्वात् सूत्रदृष्ट्या विवृतत्वमस्त्येव, **'पूर्वत्रासिद्धम्'** इत्यस्मिन् अधिकारे । महावैयाकरणेन नागेशेनाऽपि विषयोऽयं स्वपरिभाषया कथितः-**''भाव्यमानेन सवर्णानां ग्रहणं न''** भाव्यमानेन = विधीयमानेन सवर्णानां ग्रहणं न भवतीति परिभाषार्थः । फलितञ्चेदम्-**इमम्** इति प्रयोगे । अत्र मकारस्य स्थाने अकारादेशो भवति, स च निरनुनासिक एव ।

**उपासंहारः**

**''तुल्यास्य प्रयत्नं सवर्णम्''** सूत्रस्यास्य भाष्यालोडनेन स्पष्टं भवति यत् येषां वर्णानाम् उच्चारणस्थानम्, आभ्यन्तरप्रयत्नश्च तुल्यं (समानं) भवति ते एव वर्णाः परस्पर सवर्णसंज्ञकाः भवतीति भाष्यकारपतञ्जलेराशयः । किञ्च आस्यप्रयत्नयोः अन्यतरप्राप्तौ न सवर्णसंज्ञा ईप्सिततमत्वम् उभयोरावश्यकत्वात् ।

**सवर्ण्याश्रितानि कानिचन सूत्राणि**

1. तुल्यास्यप्रयत्नं सवर्णम् ॥ 1/1/9 ॥
2. अणुदित्सवर्णस्य चाप्रत्ययः ॥ 1/1/69 ॥
3. अकः सवर्णे दीर्घः ॥ 6/1/101 ॥
4. इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ॥ 6/1/127॥
5. झरो झरि सवर्णे ॥ 8/1/65 ॥
6. सावर्ण्यापवादकं सूत्रम्-नाऽऽज्झलौ ॥ 1/1/10 ॥

अतः दधि हरति, दधि शीतलम्, दधि षष्ठम्, दधि सान्द्रम् इत्यादिषु प्रयोगेषु यणादिकं न भवति । इत्थं भाष्ये विहङ्गावलोकनम्, न तु सिंहावलोकनम् ।

**शोधार्थी**
**श्रीमुक्तानन्दसंस्कृतमहाविद्यालयः**
**शान्तिमन्दिरम्, मगोदः, वलसाडम्**
**गुजरातम् ।**

★★★

# महाभाष्ये शाबरभाष्ये च कृतः संज्ञाविचारः

✍श्रीधर अवधूतलोहोकरे

व्याकरणशास्त्रस्य मीमांसाशास्त्रस्य च परमं प्रयोजनं वेदार्थज्ञानमस्ति । व्याकरणं वेदाङ्गं भवति । कानि व्याकरणस्य प्रयोजनानि इति महाभाष्यकृता स्वयमेव प्रश्नं कृत्वा प्रथमान्हिके स्वयमेवोत्तरं दत्तम् ''रक्षोहागमलघ्वसंदेहाः प्रयोजनम्'' । ''असंदेहमुपपादयितुं'' महाभाष्यकाराः ''स्थूलपषतीमाग्निवारुणीमनड्वाहीमालभेत'' इति उदाहरन्ति । अत्र स्थूलपृषती इत्यस्मिन् पदे स्वरज्ञानाभावात् बहुव्रीहिर्वा तत्पुरुषो वा इति समासनिर्णयः न भवति । तेन विना अर्थनिर्णयः न भवति । अतः अर्थज्ञानार्थं व्याकरणशास्त्रमध्येतव्यम् । मीमांसाशास्त्रस्य अधिकारी कः इति चिन्तनवेलायामुक्तं यस्य साङ्गवेदाध्ययनं जातमस्ति तेन यस्य आपाततः वेदार्थज्ञानं जातमस्ति तस्मात् यस्य अनुष्ठानविषयकः संदेहः अस्ति सः अधिकारी । तस्य आपाततः वेदवाक्यार्थज्ञानं जातमस्ति । निस्संदिग्ध-वेदवाक्यार्थ-ज्ञानार्थं मीमांसाशास्त्रेण यत्नः क्रियते । निस्संदिग्धज्ञानेन विना निष्कम्पा प्रवृत्तिः भवितुं नार्हति । निष्कम्पा प्रवृत्तिः नास्ति चेत् कर्मणि श्रद्धा न जायते । तेन फल वैगुण्यं भवति । अनेन ज्ञायते यत् निस्संदिग्धवेदवाक्यार्थज्ञानमेव मीमांसाशास्त्रस्य प्रयोजनम् । वेदार्थज्ञानार्थं प्रवृत्तं शास्त्रद्वयमादाय संज्ञास्थले ताभ्यां कः विचारः कृतः इति अस्मिन् शोधपत्रे मया चिन्त्यते । महाभाष्यस्य तृतीये आह्निके अष्टाध्याय्याः प्रथमाध्यायस्य प्रथमपादस्य वृद्धिरादैच् इति सूत्रमधिकृत्य वात्तिककारैः महाभाष्यकारैश्च संज्ञास्थले विचारः कृतः ।

**संज्ञाधिकारः संज्ञासंप्रत्ययार्थः** -

इति प्रथमं वात्तिकम् । अनेन वात्तिकेन वात्तिककृता महाभाष्यकृता च उक्तम् यत् अथ संज्ञा इति अधिकारम् आरम्भ वृद्धिरादिसंज्ञाः गणनीयाः । अयमर्थः वात्तिकस्य प्रथमेन भागेन ज्ञातः । अस्य प्रयोजनं द्वितीयेन भागेन ज्ञायते । वृद्धिः इति संज्ञा अस्ति इति ज्ञानमेव प्रयोजनम् ।

**इतरथा ह्यसंप्रत्ययो यथा लोके** -

अधिकारमनादाय यदि वृद्ध्यादिशब्दप्रयोगः क्रियेत तर्हि वृद्धिः संज्ञा अस्ति इति जनानां ज्ञानं न स्यात् । यथा लोके कानिचन पदानि वत्तन्ते चेदपि जनानां तानि पदानि अबोधकानि भवन्ति तथैव वृद्ध्यादिपदसत्वे अपि इयं संज्ञा इति बोधकपदाभावे बोधः न स्यात् ।

**संज्ञासंज्ञ्यसंदेहश्च** -

अथ संज्ञा इति अधिकारः क्रियते चेदपि वृद्धिरादैच् इति सूत्रे वृद्धिः आदैच् इति पदद्वयमस्ति । तयोः कस्य संज्ञात्वं कस्य संज्ञित्वं नैव ज्ञायते । तर्हि तयोः निर्णयः कथं क्रियते चेदपि वृद्धिरादैच् इति सूत्रे वृद्धिः आदैच् इति पदद्वयमस्ति । तयोः कस्य संज्ञात्वं कस्य संज्ञित्वं नैव ज्ञायते । तर्हि तयोः निर्णयः कथं क्रियते इति बोधयितुं अग्रिमं वार्त्तिकमवतारयति ।

**आचार्याचारात्संज्ञासिद्धिः**

इयं संज्ञा अस्ति अयं संज्ञी अस्ति इति आचार्यस्य शब्दप्रयोगात् एवं संज्ञासंज्ञिनोः विवके विद्मः । शब्दप्रयोगात् ईदृशं ज्ञानं भवति इति कुत्र दृष्टं तद् वक्तुम् अग्रिमं वार्त्तिमवतारयति ।

**यथा लौकिकवैदिकेषु**

लोके मातापितरौ पुत्रस्य संज्ञां कुर्वाते । तयोः तया संज्ञया व्यवहारात् जनाः जानन्ति अस्य पिण्डस्य इयं संज्ञा इति । वैदिका अपि स्फ्यः इत्यादिसंज्ञया व्यवहारं कुर्वन्ति । तेन व्यवहारेण अन्ये तां संज्ञां जानन्ति । एवमेव आचारव्यवहारात् इयं संज्ञा अयं संज्ञी इति स्पष्टा प्रतिपत्तिः भवितुमर्हति ।

**अनाकृतिः**

व्यक्तौ जातिः भवति यथा मनुष्ये मनुष्यत्वं जातिः भवति । तद्वत् मनुष्य इति संज्ञायां मनुष्यत्वजातिः न भवति । अनेनापि संज्ञासंज्ञिनोः भेदः ज्ञायते । एतावता वार्त्तिककार-महाभाष्यकारयोः संज्ञाविषयकाः विचाराः उपस्थापिताः ।

अधुना शबरस्वामिनां मतमुपपाद्यते । 'अथातो धर्मजिज्ञासा' इति शास्त्रारम्भसूत्रे शबर-स्वामिनः सूत्राणि कथं व्याख्येयानि तदुपपादयन्ति – 'लोके येष्वर्थेषु प्रसिद्धानि यानि पदानि तानि सति संभवे तदर्थान्येव सूत्रेष्वित्यवगन्तव्यम् नाध्याहारादिभिरेषां परिकल्पनीयोऽर्थः परिभाषितव्यो वा। एवं वेदवाक्यान्यवैभिर्व्याख्यायन्ते इतरथा वेदवाक्यानि व्याख्येयानि स्वपदार्थाश्च व्याख्येयाः इति यत्नगौरवं प्रसज्येत ।' इति ।

अस्य भाष्यस्य विवरणं क्रियते । वेदवाक्यार्थज्ञानार्थ जैमिनिमुनिना सूत्राणि रचितानि । सूत्रेषु विद्यमानानां पदानां लोके ये अर्थाः तदपेक्षया भिन्नाः यदि अर्थाः भवेयुः तर्हि आदौ ते अर्थाः बोधनीयाः तदुत्तरं सूत्रार्थज्ञानं भवेत् । ज्ञाते सूत्रार्थे वेदार्थः ज्ञायेत । अस्मिन् पक्षे सूत्रार्थः ज्ञातव्यः इति यत्नगौरवं प्रसज्येत । अतः भाष्यकृता उक्तम् लोके तेषां पदानां ये अर्थाः ते एव अर्थाः अत्र स्वीकर्तव्याः । अध्याहारादिकं कृत्वा तेषाम् अर्थान्तरं न परिकल्पनीयम् । परिभाषा अपि न कल्पनीया ।

अस्य भाष्यस्य वार्त्तिककारैः कुमारिलभट्टपादैः षडर्था उच्यन्ते ।

**'लोके इत्यादिभाष्यस्य षडर्थान् सम्प्रचक्षते ।'**[१]

ते षडर्था अग्रे उच्यन्ते ।

**सर्वव्याख्यामुपालम्भं प्रत्याख्यानं तथापरे ।**
**परिसंख्या स्तुतिः केचिदथशब्दस्य दूषणम् ॥ २७ ॥**[२]

1. सर्वव्याख्या, 2. उपालम्भः, 3. प्रत्याख्यानम्, 4. परिसंख्या, 5. स्तुतिः, 6. अथशब्दस्य दूषणम् इति षडर्था उच्यन्ते । एतेषु अपेक्षितः विषयः निरूप्यते ।

**व्याख्याङ्गत्वाभिमानेन येऽध्याहाराद्यपक्षते ।**
**स्वसंज्ञां वापि तस्येदं शास्त्ररूपं निरूप्यते ॥३२ ॥**[३]

वात्तिकार्थः उच्यते । शास्त्रान्तरे अध्याहारादिकं कृत्वा सूत्राणामर्थः उच्यते । तत्र संज्ञाः कृत्वा तासामर्थाः उच्यन्ते । अस्मिन् शास्त्रे एवं व्याख्यानं न कर्तव्यमिति शबरस्वामिनः शिक्षयन्ति।

**वृत्यन्तरेषु केषाञ्चिल्लौकिकार्थव्यतिक्रमः ।**
**स्वसंज्ञां वापि तस्येदं शास्त्ररूपं निरूप्यते ॥३३ ॥**[४]

अनेन वात्तिकेन उक्तं यत् भवदाससंज्ञकेन ग्रन्थकृता सूत्राणां लौकिकार्थं त्यक्त्वा अन्यः अर्थः उक्तः । संज्ञा अपि कृता । तस्य निन्दा भाष्यकारेण अनेन भाष्येण कृता ।

**प्रसिद्धहानिः शब्दानामप्रसिद्धे च कल्पना ।**
**न कार्या वृत्तिकारेण सति सिद्धार्थसंभवे ॥३५॥**[५]
**सूत्रार्थे क्लिश्यतश्चैवं दूरे वेदार्थनिर्णयः ।**
**तत्र यत्नस्य भारत्वं वक्तुश्रोत्रोः प्रसज्यते ॥३६ ॥**[६]

अनयोः वात्तिकयोः अर्थः अपि स्पष्टः । शब्दानां प्रसिद्धम् अर्थः वक्तव्यः । संज्ञादिकं न कर्तव्यम् । अन्यथा संज्ञानामर्थाः वक्तव्याः वेदवाक्यार्थोऽपि वर्णनीयः इति यत्नाधिक्यं भवति ।

इत्थं संज्ञाविषयकं मतं भाष्यकारवार्त्तिककाराभ्यां वर्णितम् । इदानीं तयोः विमर्शः क्रियते। आदौ किं नाम संज्ञा तदुपपाद्यते । नैयायिकमते 'अस्मात् पदात् अयमर्थो बोध्यव्यः इति ईश्वरेच्छा शक्तिः' । यथा घटस्थले अस्मात् पदात् नाम घटपदात् अयमर्थः नाम घटपदार्थः बोद्धव्यः इति ईश्वरस्य इच्छा एव शक्तिः । कम्बुग्रीवादिमान् पदार्थः घटपदेनैव बोधनीयः इत्यत्र किमपि नियामकं नास्ति । अतः ईश्वरेच्छा एव तत्र नियामिका भवति । तर्हि वृद्ध्यादिपदस्थले ईश्वरेच्छा वक्तुं न शक्यते । ताः संज्ञाः पाणिनिना कृताः । अतः तादृशे स्थले पाणिनेः इच्छा एव नियामिका भवति । वृद्धिः गुणः इत्यादिसंज्ञानाम् ईश्वरेच्छया अपि अर्थाः ज्ञायन्ते । पाणिनेः इच्छया अपि अर्थाः ज्ञायन्ते । अत्र 'लोके येष्वर्थेषु प्रसिद्धानि यानि पदानि तानि सति संभवे

तदर्थान्येव सूत्रेष्वित्यवगन्तव्यम्' इति शाबरभाष्योक्तरीत्या ईश्वरेच्छया ज्ञायमानः अर्थः प्रबलः । सति संभवे स एव स्वीकर्तव्यः । तस्य बाधे सति पाणिनेः इच्छया ज्ञायमानः अर्थः ग्राह्यः । कदाचित् सूत्रपदस्थपदे शक्त्या बोध्यमान अर्थः अपि त्यक्तव्यो भवति । शबरस्वामिनः अपि सूत्रे विद्यमानानां पदानाम् शक्त्या बोध्यमानम् अर्थं त्यक्त्वा लक्षणया बोध्यमानमर्थं वर्णयन्ति । यथा 'औत्पत्तिकस्तु शब्दस्य अर्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् ।' इत्यस्मिन् सूत्रे 'औत्पत्तिकः इति नित्यं ब्रूमः । उत्पत्तिर्हि भाव उच्यते लक्षणया ।' इति भाष्येण औत्पत्तिकपदस्य नित्य इति अर्थः स्वीकृतः । उत्पत्तिशब्दस्य भावः इत्यर्थः उक्तो लक्षणया ।

**निष्कर्षः**

शास्त्रद्वये सूत्राणि सन्ति । शास्त्रद्वयस्य साक्षात् परम्परया वा प्रयोजनं वेदार्थज्ञानमस्ति । तथापि व्याकरणशास्त्रे संस्कृतभाषामात्रस्य विचारः क्रियते । महत्कार्यं लघुना उपायेन साधयितुं पाणिनिमुनिना संज्ञाः कृताः । अतः सूत्रव्याख्यानकाले एवं विचारः कर्तव्यः - पदानां शक्त्या बोध्यमानः अर्थः वक्तव्यः । सति संभवे संज्ञादिकं न कर्तव्यम् । महदुपकारः भवति चेत् कर्तव्याः संज्ञाः ।

**सन्दर्भाः**


1. श्लो. वा. 26 (1.1.1)
2. श्लो. वा. 27 (1.1.1)
3. श्लो. वा. 32 (1.1.1)
4. श्लो. वा. 33 (1.1.1)
5. श्लो. वा. 35 (1.1.1)
6. श्लो. वा. 36 (1.1.1)



**शोधकर्ता**

**सहसम्पादकः**

**डेक्कन कॉलेज पदवी एवं**

**पदव्युत्तरशोधसंस्था पुणे ।**


★★★

# बाह्यप्रयत्नविवेकः

✍कु. मुग्धा चन्द्रकान्तदाते

पातञ्जलमहाभाष्यस्य चतुर्थाह्निके प्रथमाध्यायस्य प्रथमपादस्य 'तुल्यास्यप्रयत्नं सवर्णम्' इति सूत्रमायाति । सूत्रव्याख्यानप्रसङ्गे सूत्रगतप्रत्येकशब्दस्य अर्थविचारः कृतः दृश्यते । तत्र किं नाम आस्यं, कः प्रयत्नः इत्यादिकं विचारितम् । तत्र उच्चारणस्थानं तथा आभ्यन्तरप्रयत्नसाम्यात् सवर्णसंज्ञा उक्ता । बाह्यप्रयत्नास्तु आन्तरतम्यतान्वेषणाय विचार्यन्ते । के पुनस्ते (बाह्याः) इति प्रश्ने उत्तरयति भाष्यकारः 'विवारसंवारौ श्वसनादौ घोषवदघोषता अल्पप्राणता महाप्राणेति । इत्युक्त्वा अष्ठबाह्यप्रयत्नाः उक्ताः । किन्तु सिद्धान्तकौमुद्यादिग्रन्थेषु एकादशबाह्ययप्रयत्नाः उक्ताः सन्ति ।' तत्र उदात्तानुदात्तस्वरितानाम् अपि ग्रहणं कृतम् ।

आधुनिकभाषाशास्त्रेऽपि बाह्यप्रयत्नाः अतिविस्तरेण विचारिताः । तत्र आधुनिकशास्त्रेण स्वप्रामाणिकताप्रदर्शनाय विविधतन्त्रांशानां छायाचित्रणमादोनामपि उपयोजनं क्रियते । तस्मात् बाह्यप्रयत्नानां विषये प्राचीनाधुनिकसिद्धान्तानां तुलनात्मकमध्ययनं पत्रेऽस्मिन् प्रयतते ।

सर्वप्रथमं भाष्यकारकृतां आस्यस्य व्याख्यां अवलाकयामः । तत्र 'किं पुनरास्यम्' इति प्रश्ने उत्तरयति भाष्यकारः 'ओष्ठात्प्रभृति प्राक्काकलकात्' । 'काकलको नाम चुबुकस्याधस्तात् ग्रीवायामुन्नतप्रदेशः' इति कैयटेनोक्तम् । तत्र आभ्यन्तरप्रयत्नानां क्षेत्रं प्राक्काकलकं, बाह्यय-प्रयत्नानां क्षेत्रं गलबिलादसहितकाकलकम् ।

तस्मात् बाह्यप्रयत्नविवेचने काकलकस्य गलविवरस्य च कार्यं कथं प्रचलति येन वर्णेषु प्राणभेदाः (अल्पप्राणमहाप्राणञ्च) तथा च घोषाघोषता आयाति तद् अवलोकनीयम्, येन 'पारं' 'भारं' न भवति 'धर्मः' 'घर्मः' न भवति 'चेता' 'जेता' न भवति ।

आधुनिकभाषाविज्ञाने अवलोकयामश्चेत् तत्र त्रयः विषयाः विचारणीयाः । Initiation is concerned with how an air pressure is built for the production of a sound. Phonation talks about what & how the larynx along with the vocal cords & the glottis play a role in the production of a sound. (बाह्यप्रयत्नाः) Whereas, articulation is related to different places & manner of articulation. (स्थानानि तथा आभ्यन्तरप्रयत्नाः)

गलबिलादस्य कार्यविस्तरात् पूर्व काकलकस्य संरचना विषये विवेचनमावश्यकम् । यथा पूर्वोक्तं 'काकलको नाम चुबुकस्याधस्तात् ग्रीवायामुन्नतप्रदेशः' इति कयटः । अतः यदि 'काकलकम्' इति 'Larynx' इत्यस्य पर्यायशब्दः इति निश्चीयते तर्हि काकलकस्यैव भागो नाम गलविवरं तथा च 'Vocal cords' । पत्रेऽस्मिन् 'Vocal cords' कृते 'गलयवनिका' इति पर्यायशब्दः मया प्रयुज्यते । 'Vocal cords' अथवा गलयवनिका इति युग्मं वर्तते । तयोः कार्येणैव यः कोऽपि ध्वनिः उच्चार्यते । तयोः कार्याभावात् उच्चारणमेव असम्भवम् ।

सर्वेषां बाह्यप्रयत्नानां अवालंबित्वं गलयवनिकायां वर्तते । तयोः विविधाः स्थितयः विविधप्रकारकाणां ध्वनीनां निर्माणं कुर्वन्ति । कदाचित् ते सामान्यस्थित्यां वा शिथिलस्थित्यां वर्तेते । यथा सामान्य श्वासोच्छ्वासक्रियायाम् । कदाचित् परस्परात् सुदूरं भवतः, यथा अघोष-वर्णोच्चारणे । कदाचित् तयोः परस्पराघातः जायते, यथा घोषवर्णोच्चारणे । केचन अन्याः वर्णोच्चाराः सन्ति यत्र तयोः विभिन्नाः स्थितयः दृष्यन्ते; किन्तु तादृशाः ध्वनयः वर्णरूपेण संस्कृतभाषायां न प्रयुज्यते । अतः नात्र विचार्यन्ते ।

इदानीं बाह्यप्रयत्नानां प्रत्यक्षनिर्माणविषये अर्थात् काकलकस्य कार्यविषये विस्तरामि । विवारश्वासाघोषाः एकत्र विचार्यन्ते । एतेषु प्रयत्नेषु द्वाभ्यां गलयवनिकाभ्याम् अधिकं अंतरालं वर्तते येन वायुः यथेच्छं अव्यवहितत्त्वेन उर्ध्व वहति । गलयवनिकाभ्यां व्यवधानाभावेन तत्र श्वासानुप्रदानम् अधिकं भवति । तस्मात् श्वासः इत्युच्यते । गलयवनिकयोः आघाताभावात् कम्पनं न भवति तस्मात् ध्वनिघोषः न भवति अतः अघोषः इत्युच्यते । आधुनिकभाषाशास्त्रे एतेभ्यः 'Voiceless' इति शब्दः प्रयुज्यते ।

संवारनादघोषाः एकत्र विचार्यन्ते । एतेषु प्रयत्नेषु द्वाभ्यां गलयवनिकाभ्यां न्यूनतमम् अंतरालं वर्तते येन वायोः वहने गलयवनिकाभ्यां व्यवधानं भवति । तस्मात् उर्ध्वगवायुप्रवाहः व्यवहितत्वेन वहति येन कम्पनं जायते । गलयवनिकाभ्यां व्यवधानेन अर्थात् आघातेन नादः जायते अतः नादः इत्युच्यते । गलयवनिकयोः आघातेन कम्पनं भवति । तस्मात् ध्वनिघोषः भवति । अतः घोषः इत्युच्यते । आधुनिकभाषाशास्त्रे एतेभ्यः 'Voiced' इति शब्दः प्रयुज्यते।

इदानीं अल्पप्राणतामहाप्राणताविषयकं चिन्तनं पश्यामः । यत्र सामान्यवायूत्क्षेपणेन वर्णोच्चारणं भवति स अल्पप्राणः । यस्मिन् वर्णे सामान्यवर्णोच्चारणापेक्षया अधिकं वायूत्क्षेपणं भवति सः महाप्राणः ।

आधुनिकभाषाशास्त्रे अल्पप्राणमहाप्राणयोः व्याख्या तु तथैव क्रियते किन्तु वर्णानां अल्पप्राणतामहाप्राणताविषये मतभेदाः दृष्यन्ते । तत्र आधुनिकतन्त्रज्ञानस्य छायाचित्रणस्य च

माध्यमेन अधुना स्पष्टतया द्रष्टुं शक्यते यत् संस्कृते वा अन्यासु भारतीयभाषासु श्रूयमाणस्य अघोषवर्णस्य महाप्राणप्रयत्नः तथा च घोषवर्णस्य महाप्राणप्रयत्नः एतयोः भेदः वर्तते । अतः आधुनिकभाषाविज्ञाने तयोः कृते द्वौ भिन्नौ शब्दौ प्रयुज्येते । तथा च आधुनिकभाषाशास्त्रस्य सार्वत्रिकलिप्यां (IPA-International phonetic alphabet) इत्यत्र द्वयोः लेखनं भिन्नं भवति येन च प्रयत्नभेदः अपि द्रष्टुं शक्यते । यथा प्रकारस्य (p) महाप्राणः ($p^h$) इत्येवम् बकारस्य च (b) महाप्राणः ($b^h$) इत्येवं लिखन्ति । तथैव अन्येषां घोषाघोषानामपि महाप्राणाः विलिख्यन्ते ।

इदानीं उदात्तादिविषयकं चिन्तनं प्रस्तूयते । तत्र 'उच्चैरुदात्तः' नीचैरनुदात्तः इति सूत्रद्वयव्याख्यानप्रसङ्गे सिद्धान्तकौमुदीकारेणोक्तं 'ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽच् उदात्तसंज्ञः स्यात्' अन्यत्र चोक्तम् 'अधोभागे निष्पन्नोऽच् अनुदात्तसंज्ञः स्यात ।' संगीत-शास्त्रदृष्ट्या पश्यामश्चेत् ध्यन्युच्चारणे मन्द्रतः तारस्वरपर्यन्तम् उच्चारणपरिवर्तनं क्रियते तदा स्वरभेदः जायते । तेन ज्ञायते यद् उदात्तानुदात्तस्वराणाम् उच्चारणं गानस्वरसदृशं भवति । यदा च गानस्वरभेदैः सह उदात्तानुदात्तस्वरितानाम् उच्चारणं क्रियते तदा काकलकस्य स्वस्थानात् उपरि अधः चलनं भवति । काकलके हस्तं निधाय स्वप्रयोगेणापि एतद् ज्ञातुं शक्यते ।

इत्थम् बाह्यप्रयत्नविषयकं चिन्तनम् । बाह्यप्रयत्नविषये पाचीनैः यदुल्लिखितं तस्य सिद्धता तथा च प्रामाणिकता आधुनिकतंत्रांशानां माध्यमेन वयं द्रष्टुं शक्नुमः । प्राचीनकाले तान्त्रिकसंसाधनानाम् अभावेन यावत् चिन्तनं आभ्यन्तरप्रयत्नस्य शक्यं न तावद् बाह्यप्रयत्नविषयकं चिन्तनं प्रस्तुतीकरणाय नम्रप्रयत्नाः कृताः इत्यलम् ।

**आचार्यद्वितीयवर्षम् (व्याकरणम्)**
**मुक्तस्वाध्यायकेन्द्रम्,**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैयासंस्कृतविद्यापीठम्**
**विद्याविहारः, मुम्बई ।**

★★★

# महाभाष्यदृशा 'इको गुणवृद्धी' इति सूत्रविमर्शः

✍श्रीसर्वेशकुमारतिवारी

श्रीमद्भगवत्पतञ्जलिविरचितस्य महाभाष्यस्य तृतीयाऽऽह्निकस्यान्तिमं सूत्रमिदम् 'इको गुणवृद्धी' इति । अत्र पूर्वं तावत् सूत्रार्थविचारः क्रियते । षड्विधव्याख्यानक्रमे पूर्वं तावत् पदच्छेदक्रम आपतति । यतोहि–पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना ।

**आक्षेपश्च समाधानं षड्विधं व्याख्यानं स्मृतम् ॥**

पदद्वयात्मकं सूत्रमिदम् । इक इति षष्ठ्यन्तानुकरणप्रथमान्तं पदम् । गुणश्च वृद्धिश्च गुणवृद्धी इति प्रथमायाः द्विवचनान्तमिदम् । अत्र हि हरिहरावितिवत् 'वृद्धिगुणौ' इति कथन्न? यद्युच्यते इदमेव ज्ञापयिष्यति यत् पूर्वनिपातोऽनित्यः तन्न, राजदन्तादित्वेन निर्देशस्योपपन्नत्वे हि ज्ञापकत्वासम्भवः ।

न च सिद्धान्तकौमुद्यां 'गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र इकः' इति षष्ठयन्तं पदमुपतिष्ठते एवमर्थः कथं संगच्छते सकृदुच्चरितः शब्दः संकृदेवार्थङ्गमयति इति न्यायात् । अत्र भाष्यकारः आह–''गुणवृद्धिग्रहणसामर्थ्यात् । कथं पुनरन्तरेण गुणवृद्धिग्रहणमिको गुणवृद्धी स्याताम् । प्रकृतं गुणवृद्धिग्रहणमनुवर्तते ।'' अर्थात् पूर्वाभ्यां सूत्राभ्यामेव गुणवृद्धिलाभे सिद्धे सूत्रस्थं गुणवृद्धिग्रहणं व्यर्थीभूय गुणपदस्य अदेङ्निष्ठविधेयताप्रयोजकगुणपदे वृद्धिपदस्य आदैच्निष्ठविधेयताप्रयोजकवृद्धिपदे लक्षणां ग्राहयति । तदाह–गुणवृद्धिशब्दाभ्यां ........ उपतिष्ठते संगच्छते इति । गुणवृद्धिशब्दाभ्यामित्यत्र ल्यब्लोपे पञ्चमी, तेन गुणपदमुच्चार्य गुणो विधीयते वृद्धिपदमुच्चार्य वृद्धिर्विधीयते तत्र इक इति षष्ठ्यन्तं पदमुपतिष्ठते । गुणवृद्धिशब्दाभ्यामित्यत्र प्रयोज्यत्वं तृतीयार्थः । यत्र गुणवृद्धिपदनिरूपितप्रयोज्यतावती अदेङादैच्निष्ठविधेयता तत्र इकः इत्युपतिष्ठते । तेन अदेङ गुणः, वृद्धिरादैच् इत्यत्र विधेयताप्रयोजकगुणवृद्धिपदसत्त्वेऽपि विधेयता गुणवृद्धिपदनिष्ठा विधेयतायाः अदेङादैच्निष्ठत्वाभावेन इक इत्यस्य नोपस्थितिः ।

किञ्च लक्षणया सूत्रस्थं गुणपदम् अदेङ्निष्ठविधेयताप्रयोजकगुणपदस्य वृद्धिपदम् आदैचनिष्ठविधेयताप्रयोजकवृद्धिपदस्य बोधकं भवति । मतमिदम् गुरुतरम् मे प्रतिभाति उद्योतकारस्य नागशभट्टस्य । यतोहि लक्षणावृत्तिकल्पनापेक्षया शक्त्या कार्ये सिद्धे शक्त्या-श्रयणमेव कर्त्तव्यम् ।

प्रदीपकारः कैयटः गुणेन यो गुणः वृद्ध्या या वृद्धिरिति योजनया अर्थः साधितः । यद्युच्यते अत्रापि अनुवर्त्तमानयोः पदयोः लक्षणाश्रयणेनैव एतदर्थः सम्पद्यते तन्न, यतोहि प्राचोनानां मते संज्ञाशास्त्रादन्यत्रानुवर्त्तमानं संज्ञापदं स्वरूपपरमेव तेन लक्षणाश्रयणस्य नास्त्यावश्यकता ।

किञ्च 'बहुगणवतुडति संख्या' इत्यस्मात् सूत्रात् 'ष्णान्ता षट्' इत्यत्रानुवत्तमानसंख्यापदं न हि स्वरूपपरम् षान्तत्वनान्तत्वासम्भवात् । तद्वारणाय संज्ञाशास्त्रातिरिक्तत्वविशेषणं देयम् । किञ्च 'सुप्तिङन्तं पदमि'त्यस्मात् 'स्वादिष्वसर्वनामस्थाने' इत्यत्रानुवर्त्तमानं पदपदं स्वरूपपरम् अतः परिष्क्रियते 'यस्मात् तदनुवर्तते तदीयविधेयतावच्छेदकधर्मेतरधर्मावच्छिन्नविधेयता-प्रयोजकसंज्ञाशास्त्रातिरिक्तशास्त्रेऽनुवृत्तसंज्ञापदं स्वरूपपरम् ।' तस्मात् अनुवृत्तयोः गुणवृद्धिपदयोः स्वरूपपरकत्वात् न लक्षणाश्रयणमुचितं मे प्रतिभाति । महाभाष्ये पतञ्जलिना इग्ग्रहणं किमर्थमि-त्युक्त्वा समाधानं दीयते । 'इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननिवृत्त्यर्थम् अर्थात् आकारनिवृत्त्यर्थं सन्ध्य-क्षरनिवृत्त्यर्थ व्यञ्जननिवृत्त्यर्थञ्च इग्ग्रहणम् ।' आकारनिवृत्त्यर्थं तावत् - याता वाता इत्यत्र आकारस्य अकारः गुणः प्राप्नोति किन्तु इग्ग्रहणेन न भवति ।

सन्ध्यक्षरनिवृत्त्यर्थं तावत् ग्लायति म्लायति । अत्र ऐकारस्य एकारः गुणः प्राप्नोति इग्ग्रहणान्न भवति ।

व्यञ्जननिवृत्त्यर्थं तावत् - उम्भिता उम्भितुम् । अत्र व्यञ्जनस्य गुणः प्राप्नोति । इग्ग्रहणान्न भवति ।

किञ्च भाष्यकारः प्रथमप्रयोजनस्योपरि आक्षिपति यत् आचार्यप्रवृत्तिर्ज्ञापयति गुणो न भवति । 'आतोनुपसर्गे कः' इत्यत्र कित्करणमस्य ज्ञापकम् । कित्करणम् आकारलोपार्थं चेदुच्यते तन्न आकाराय गुणे कृते 'अतो गुणे' इत्यनेन पररूपेणैव गोदः कम्बलदः इति सिद्ध्यतः । अतः कित्करणमेव आकारस्य गुणाभावाज्ञापकं भवति । किञ्च न हि कित्करणं व्यर्थमपितु उत्तरार्ध-मेतत्स्यात् - 'तुन्दशोकयो परिमृजापनुदोः' । अतः आकारनिवृत्यर्थम् इग्ग्रहणमावश्यकम् ।

सन्ध्यक्षरनिवृत्तिः इग्ग्रहणस्य न प्रयोजनम् यतोहि उपदेशसामर्थ्यादेव सन्ध्यक्षरस्य गुणो न प्राप्नोति । यद्युच्यते यद्यत्सन्ध्यक्षरस्य प्राप्नोति तत्तदुपदेशसामर्थ्याद् बाध्यते, एवं तु आयादयोऽपि न भवितुर्महन्ति, तन्न यं विधिं प्रति उपदेशोऽनर्थकं स विधिर्बाध्यते । यस्य विधेः निमित्तं नासौ बाध्यते । अत्र गुणविधिं प्रति उपदेशोऽनर्थकः अतः स बाध्यते ।

तृतीयप्रयोजनमिग्ग्रहणस्य व्यञ्जननिवृत्तिः, तदपि न सम्भवति । व्यञ्जनस्यगुणाभावज्ञापकं जनेड इति डित्करणम् । डित्करणस्य प्रयाजनं टिलोपो यद्युच्यते तर्हि टिलोपं विनाऽपि आन्तर्यतः अर्धमात्रिकस्य व्यञ्जस्य एकमात्रिकोऽकारो भविष्यति । त्रयाणामकारणां पररूपेण उपसरजः

सिद्ध्यति । किञ्च गमेरप्ययं डो वक्तव्यो भवति । एवमेव तत्रापि आन्तर्यतः ओकारः गुणः प्राप्नोति तेन ग्रामगः न सेत्स्यति अतः इग्ग्रहणं कर्तव्यम् । एतावता भाष्ये इग्ग्रहणस्य सार्थक्यं प्रत्यपादि पतञ्जलिना ।

सूत्रस्यास्य लिङ्गं विधेयसमर्पकगुणवृद्धिपदं यथा 'सार्वधातुकार्धधातुकयोरि'त्यत्र विधेय-समर्पकगुणपदं विद्यते तत्र इक इति पदमुपतिष्ठते, तेन इगन्ताङ्गस्य गुणो भवति 'वृद्धिर्यस्यचामादिस्तद्वृद्धम्', 'अतो गुणे' किञ्च विधेयसमर्पकगुणवृद्धिपदोपादानं यत्र तत्रास्योप-स्थापनञ्चेत् 'अचो ञ्णिति' इति सूत्रे 'ओर्गुणः' इत्यत्र च तथा सत्त्वादत्रापि इक इत्यस्योपस्थापनं स्यात् तन्न, 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इति सूत्रेण लिङ्गस्य श्रुत्यपेक्षया दुर्बलत्वेन प्रथमतः श्रौताच्पदार्थादिघटितनिराकाङ्क्षवाक्यार्थबोधे जाते स्वलिङ्गेनोपस्थितस्यापि इक्पदस्य वाक्यार्थे नान्वयः । 'सार्वधातुकार्धधातुकयोरि'त्यादौ तु इक्पदो-पस्थितिं विना स्थान्याकाङ्क्षाशान्त्यभावेन इक्पदार्थघटितनिराकाङ्क्षवाक्यार्थबोधो भवति ।'

'अलोऽन्त्यस्ये'ति सूत्रस्य षष्ठीनिर्देशरूपलिङ्गात् प्रवृत्तिः । अपि च 'इको गुणवृद्धी' इत्यस्य विधेयसमर्पकगुणवृद्धिपदश्रुत्या प्रवृत्तिर्भवति । 'सार्वधातुकार्धधातुकयोरि'त्यत्र अङ्गस्य गुण इति षष्ठीनिर्देशात् अलोऽन्त्यस्य इत्युपतिष्ठते, गणपदश्रुत्या तु इकः इति । यदा इकोऽङ्गं विशेष्यते । विशेषणत्वात् तदन्तविधिः, तदार्थः - सार्वधातुकार्धधातुकाव्यवहितपूर्वत्वविशिष्टस्य इगन्ताङ्गस्य अन्त्यस्यालो गुणो भवति । अर्थेऽस्मिन् सः इको गुणवृद्धी अस्य अलोऽन्त्यस्य शेषः विशेषणं भवति ।

यदा तु अलोऽन्त्यस्यैव तस्य शेषो भवति तदार्थः सम्पद्यते - सार्वधातुकार्धधातुका-व्यवहितपूर्वत्वविशिष्टस्य अङ्गान्त्यस्य इका गुणो भवति । अयमेव हि तच्छेषपक्षं । तच्छेषपक्षे परस्परं विशेष्यविशेषणभावेन एकवाक्यता भवति ।

भाष्यकारेण अत्र पक्षद्वयमुपस्थापितम् - किमयम् अलोऽन्यशेष आहोस्विदलोऽन्त्यापवादः। पक्षद्वयेऽपि दोषदानपुरस्सरं समाहितं यत् नायं तच्छेषः नापि तदपवादः । एतत्सर्वमत्र विचार्यते - तच्छेषपक्षस्वीकारे हि 'मिदिमृजिपुगन्तलघूपधच्छिर्दृशिक्षिप्रक्षुद्रेषु इग्ग्रहणं कर्तव्यम्' अर्थात् एतेषु स्थलेषु अन्त्येकभावेन गुणे कर्तव्ये वचनान्तरं कल्पनीयं भविष्यति । अत्र एकस्य अलोऽन्त्यस्य असम्भवे इकोगुणवृद्धी इत्यपि न प्रवर्तते । एतावता तच्छेषपक्षः दोषग्रस्तः ।

अस्तु तर्हि तदपवाद इति चेत् इङ्मात्रस्य गुणे प्राप्ते जुसिसार्वधातुकार्ध-धातुकह्रस्वाद्योर्गुणेष्वनन्त्यप्रतिषेधो वक्तव्यः । यथा जुसि इत्यनेन गुणो यथा अजुहवुः अबिभयुः इत्यत्र तथैव अनन्तस्य इकः गुणः प्राप्नोति अत्र - अनेनितुः पर्ववेविषुः । एवमेव

'सार्वधातुकार्धधातुकयोरि'त्यनेन यथा कर्ता हर्ता नयति इत्यत्र गुणो भवति तथैव इहिता ईहितुम् इत्यत्रापि अनन्त्यस्य इकः गुणः प्राप्नोति । अतः एतद्दोषान् परिहर्तुं वचनान्तरं कल्पनीयं भविष्यति । एतावता तदपवादपक्षोऽपि दोषग्रस्तः । अत एव भाष्ये उभावपि पक्षा अस्वीकृत्य पदोपस्थितिपक्षमेव सिद्धान्तितम् । तद्धि भाष्यम् - 'एवं तर्हि वृद्धिर्भवति गुणो भवतीति यत्र ब्रूयात् 'इकः' इत्येतत्तत्र उपस्थितं द्रष्टव्यम् । तत्र द्वितीया षष्ठी प्रादुर्भाव्यते । तत्र कामचारः गृह्यमाणेन इकं विशेषयितुम्, इका वा गृह्यमाणम् ।'

भाष्याशयोऽयं यत् द्वितीयं षष्ठ्यन्तं पदं तत्रोपतिष्ठते । गृह्यमाणेन सूत्रे साक्षादुच्चरितेन षष्ठ्यन्तेन यदा 'इकः' विशेष्यते तदा अवयवषष्ठी । यदा इका गृह्यमाणं विशेष्यते तदा स्थानषष्ठी । स्थानषष्ठी इति स्वलिङ्गेन अलोऽन्त्यस्य अस्थितिः, तेनान्त्यस्यैव इको गुणः ।

मिदेर्गुण इत्यत्र मिदेरवयवस्य इको गुणः । एतेन कुत्रापि दोषो न सम्भवति । एतदेव भाष्यहार्दमादाय भट्टोजिदीक्षितेन मूले उल्लिखितं यत् - 'इकं' इति षष्ठ्यन्तं पदमुपतिष्ठते ।

**शोधच्छात्रः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**( मानितविश्वविद्यालयः )**
**भोपालपरिसरः, मध्यप्रदेशः ।**

★★★

# 'न धातुलोप आर्धधातुके' इति सूत्रभाष्यविमर्शः

✍सुश्रोबिन्दुहासिनीमिश्रः

'न धातुलोप आर्धधातुके' इति निषेधात्मकं सूत्रं चतुर्थाह्निकस्यादौ भाष्यकारेण व्याख्यातम् । सूत्रमिदष्टाध्यायां प्रथमाध्यायस्य प्रथमपादे इकः स्थाने प्राप्तगुणवृद्धयोः निषेधः विदधाति । यथा लोलुवः, पोपुवः, सरीसृपः, मरिमृजः इत्यादौ 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणप्राप्तः, प्रकृतसूत्रेण गुणः प्रतिषिध्यते । प्रकृतसूत्रे त्रीणि पदानि सन्ति । न इति अव्ययपदम्, धातुलोपे इति सप्तम्याः प्रथमान्तपदम्, आर्धधातुके इति सप्तम्याः प्रथमान्तं पदम् । धातुलापे इत्यत्र समासः धातोः धात्वयवस्य लोपः यस्मिन् तदिदं धातुलोपम् तस्मिन् धातुलोपे उत्तरपदलोपो बहुव्रीहिः । एवञ्च आर्धधातुकनिमित्ते धातुलोपे इकः स्थाने ये गुणवृद्धि प्राप्नुतः ते न भवतः इति सूत्रस्यार्थो भवति ।

**प्रकृतसूत्रे धातुग्रहणं किमर्थम् ?** धातुग्रहणाभावे उद्देश्यहानिः स्यात् । तर्हि लोपविधानं कस्य इति प्रसङ्गे निश्चयाभावः, तदर्थं सूत्रे धातुग्रहणमावश्यकम् । यथा धात्ववयवस्य एकदेशभूतस्य लोपसत्यां लुञ्-लविता, पुञ्-पविता इत्यादौ गुणवृद्धिनिषेधः क्रियते । किञ्च लवितुम्, पवितुम् इत्यादौ धातुग्रहणाभावे नानुबन्धस्य लोपः किन्तु पौर्वापर्येण कस्यापि वर्णस्य लोपः भवेत् इति चेन्न लुञ्-लविता इत्यत्र ञकारानुबन्धः न तु धातुः, तस्य ञकारस्य क्रियावाचकत्वाऽभावात् पविता इत्यादौ तृच्प्रत्यये आर्धधातुके परे 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणः स्यात् तम् गुणं वारणाय 'न धातुलाप आर्धधातुके' सूत्रे धातुग्रहणम् आवश्यकम् ।

पुनश्च आर्धधातुकग्रहणं किमर्थम् ? पुनश्च आर्धधातुकग्रहणं त्रिधा बद्धो वृषभो रोरवोति लोपविशेषणम् । ननु आर्धधातुकग्रहणस्य लोपविशेषणत्वे आर्धधातुकनिमित्ते लोपे सति ये गुणवृद्धी प्राप्नुतस्ते न भवतः इत्यर्थस्य कृते उपेद्धः, प्रेद्धः इत्यादौ निषेधापतिरार्धधातुक-निमित्तलोपसत्वादिति चेन्न, अन्तरङ्गप्रतिषेधदृष्ट्या बहिरङ्गगुणस्यासिद्धतया निषेधाप्रयोगात् । गुणवृद्धिविशेषणत्वे धातुलोपे सति आर्धधातुकनिमित्ते ये गुणवृद्धो प्राप्नुतस्ते न भवतः इत्यथें क्नोपयतीत्यत्र निषेधापत्तिरार्धधातुकनिमित्तगुणस्य सत्वादिति चेन्न । 'चेले क्नोपेः' इति निर्देशात्प्रतिषेधाऽऽप्रवृत्तेः । एवञ्च पक्षद्वयस्य निर्दुष्टत्वेऽपि गुणवृद्धिविशेषणपक्षे लवितेत्यत्र निषेधाभावाय धात्ग्रहणकरणे गौरवमिति लाघवात् अल्लोपविशेषणपक्ष ज्याय्यः । न च नुम्लोप-

श्रिव्यनुबन्धलोपेऽप्रतिषेधार्थं यङ्-यक्-क्यच् लोपे प्रतिषेध इति परिगणनं कर्त्तव्यमिति वाच्यम् । अभाजि रागः इत्यादौ वृद्धेखिलक्षणत्वात्, स्यादादिषु निपातनात् वृद्धिप्रतिषेधसिद्धेः, उपर्बहणम् इत्यत्र वृहः प्रकृत्यन्तरत्वात्, आस्रयमाणम् इत्यत्र आर्धधातुकतिमित्तलोपाभावात्, जीरदानुः इत्यत्र आर्धधातुकनिमित्तलोपाभावात् जीवेः रकिदानु प्रत्यये च सति क्क्ङति चेति निषेधात् स्वाभीष्टसिद्धौ परिगणनं सर्वथा निष्प्रयोजनम्। न च परिगणनाभावे भेद्यते इत्यत्र निषेधः शङ्क्यः धातोलोपो यस्मिन् तदिदं धातुलोपं तस्मिन् धातुलोपे इति बहुव्रीहि समासमाश्रित्य व्याख्यानेनादोषात्। वाच्यम् न चैवं अलक्षणयोर्गुणवुद्धयोः प्रतिषेधे पापचकः पापठकः, मगधकः, दृषदकः इत्यादौ प्रतिषेधः न प्राप्नोतीति वाच्यम् । अत्र अल्लोपस्य स्थनिवत्त्वेन सकलेष्टसिद्धेरिति दिक् ।

**उपसंहारः-**

'न धातुलोप आर्धधातुके' इत्यस्य वृत्तिस्तु धात्वंशलोपनिमित्ते आर्धधातुके परे इको गुणवृद्धी न स्तः इति । प्रधानतया प्रकृतसूत्रस्य भाष्ये बिन्दुत्रयं प्रतिपादितम्-

1) आर्धधातुकपदं गुणवृद्धयोः लोपस्य च विशेषणत्वेन स्वीकृत्य, अत्रागतानां दोषानां परिहारः ।
2) प्रकृतसूत्रप्रविष्टस्थलानि परिगणय्य, इग्लक्षणगुणवृद्ध्योः निषेधस्वीकरणेन अस्य परिगणस्य प्रत्याख्यानम् ।
3) स्यानिवद्भावेनैव इष्टसिद्धौ सति प्रकृतसूत्रस्य खण्डनञ्च ।

**आचार्यप्रथमवर्षम्**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैयासंस्कृतविद्यापीठम्**
**विद्याविहारः, मुम्बई ।**

★★★

# ‘ईदूदेद्द्विवचनं प्रगृह्यम्’ इति सूत्रभाष्यविमर्शः

✍सुश्रीआशाछेडा

वैदिकलौकिकशब्दानाम् अनुशासनार्थं भगवता पाणिना सभेदं सूत्राणि प्रणीतानि । तत्र प्रगृह्यसंज्ञासूत्रेषु आद्यं सूत्रं वर्तते ‘ईदूदेद् द्विवचनं प्रगृह्यम्’ इति । सूत्रेऽस्मिन् अधोलिखिततत्त्वानि विवेचनीयानि -

1. प्रकृतसूत्रे तपरकरणप्रयोजनम् ।
2. ‘ईदूदेद्’ इत्यस्य अर्थः ।

**प्रकृतसूत्रे तपरकरणप्रयोजनम्**

प्रकृतसूत्रे तपरकरणस्य प्रयोजनद्वयं वर्तते । तत्र प्रथमं भिन्नकालिकानां ह्रस्वेकारोकाराणां निवारणमिति, किन्तु एतेषाम् अनण्त्वाभावात् नास्ति प्रयोजनम् । द्वितीयन्तु उदात्तादिगुणानां ग्रहणं यथा स्यात् तदर्थं तपरकरणम् इति चेत् तन्न । ‘वृद्धिरादैच्’ इति सूत्रे भगवता पतञ्जलिना अभेदकाः गुणाः इति सिद्धान्तातित्वात् स्वतः एव उदात्तादिगुणानां ग्रहणं भवतीति तपरग्रहणस्य आवश्यकता नास्ति ।

अतएव प्रकृतसूत्रे तपरकरणस्य प्रयोजनं भाष्यकारेण विचारितम् । तत्र पूर्वपक्षिणा प्लतानां प्रगृह्यसंज्ञार्थं तपरकरणकृतमिति आक्षेपितम् । किन्तु प्लुतस्य प्रगृह्यसंज्ञा न प्राप्नोति, तस्याः अतत्कालिकत्वात् त्रिमात्रिकत्त्वादिति चेत्तन्न । ‘दूराद्धूते च’ इत्यनेन विहितप्लुतस्य त्रिपादित्त्वात् ‘पूर्वत्रासिद्धम्’ इत्यनेन असिद्धत्वेन द्विमात्रिकेणापि तत्कालेन ग्रहणं भवति । अत्र ज्ञापकं तु - ‘प्लुतप्रगृह्या अचि नित्यम्’ अनेन प्लुतमुद्देश्य प्रकृतिभावः विधीयते इत्येव । यतो हि ‘‘कार्यिणः कार्येण भवितव्यम्’’ इति रीत्या प्लुतस्यसत्त्वादेव असिद्धत्त्वाभावात् प्रकृतिभावो विधीयते । अनेन ज्ञाप्यते यत् स्वरसन्धिषु प्लुतः सिद्धः इति ।

अस्य ज्ञापकस्य प्रयोजनं तु ‘‘अतोरोरप्लुतादप्लुते’’ इत्यत्र स्वरसन्धौ प्लुतस्यासिद्धत्त्वात् तपरकरणेन एव तेषां निवृत्तिसम्भावात् अप्लुतग्रहणस्यावश्यकता न स्यात्। तथा च ‘कार्यकालं संज्ञापरिभाषम्’ इति कार्यकालपक्षे विधिसूत्रस्याधिकरणमेव संज्ञासूत्रस्याप्यधिकरणं भवति । तथा च ‘‘प्लुतप्रगृह्या अचिनित्यम्’’ ‘‘ईदूदेद् द्विवचनं प्रगृह्यम्’’ इति द्वयम् अपि सपाद-सप्ताध्यायिस्थत्त्वात् असिद्धत्त्वप्रश्नः न उदेति ।

किन्तु प्लुतस्य प्रगृह्यसंज्ञा सिद्धत्वे 'अप्लुतवदुपस्थिते' इत्यत्र दोषो जायत-अग्नी3 इति । इत्यत्र प्लुतमाधारीकृत्य प्रकृतिभावस्य प्रतिषधेऽपि प्रकृतसूत्रेण विहितप्रगृह्यसंज्ञकस्य प्रकृतिभावस्तु भवत्येव । तथा च ईकार-ऊकाराणाम् अनण्त्वात् एकारेणैव सवर्णनानां ग्रहणं क्रियते । किञ्च ह्रस्वेकारोकाराणां प्रगृह्यसंज्ञा न कर्तुं शक्यते । तेन 'अकुर्वह्यत्र' इत्यत्र प्रकृतिभावेन दोषः स्यात्। अनेन सिध्यति यत् दीर्घाणामेव ईकार-ऊकार-एकाराणाम् प्रगृह्यसंज्ञा विधीयते । तथा च ''प्लुतप्रगृह्या अचिनित्यम्'' इत्यनेन तु प्लुतभाविनां प्रकृति भावो विधीयते इत्येव ज्ञाप्यते । किञ्च 'अप्लुतादाप्लुते' इत्यत्र अप्लुतग्रहणं कृतमिति पाणिना, न प्रयोजनमस्य । एवञ्च कार्य-कालपक्षस्य ग्रहणे ''अणोऽप्रगृह्यस्यानुनासिकः'' इत्यत्र दोषः आपद्यते । अतएव यथोद्देशपक्षे प्लुतस्य असिद्धत्त्वात् दोषपरिहारात् यथोद्देशपक्षमेव स्वीक्रियते ।

**'ईदूदेद्' इत्यस्य अर्थः :**

प्रकतसूत्रे भाष्यकारेण पक्षचतुष्टयमुपस्थापितम् :

(ii) ईकार-ऊकार-एकार-रूपं यद्विवचनं तस्य प्रगृह्यसंज्ञा स्यात् ।

(iii) ईकारान्त-ऊकारान्त-एकारान्त-रूपं यद्विवचनं तस्य प्रगृह्यसंज्ञा स्यात् ।

(iv) ईकारान्त-ऊकारान्त-एकारान्त-रूपं यद्विवचनान्तं तस्य प्रगृह्यसंज्ञा स्यात् ।

(v) ईकारान्त ऊकारान्त एकारान्त रूपं यद्विवचनं तदन्तं यत् समुदायरूपं तस्य प्रगृह्यसंज्ञा स्यात् ।

उपर्युक्तचतुर्णां पक्षाणां गुणदोषं विचार्य भाष्यकारेण द्वितीयं पक्षं सिद्धान्तत्वेन प्रतिपादितम् । अत्र क्रमशः चतुर्णामपि पक्षाणां विवेचनं क्रियते ।

1. ईकार-ऊकार-एकार-रूपं यद्विवचनं तस्य प्रगृह्यसंज्ञा स्यादिति गृह्यते चत् ईकाराद्यन्तानामपि प्रगृह्यसंज्ञा वक्तव्या । यथा पचेते इति, पचेथे इत्युभयत्र केवलः एकारः एव द्विवचनं नास्ति अपितु एकारान्तः आताम्, आथाम् इति प्रत्ययेषु ''टित आत्मनेपदानां टेरे'' इत्यनेन सूत्रेण टेः एत्वादेशे एकारान्तमेव द्विवचनं भवतीति एकारान्तस्य प्रगृह्यसंज्ञा विधीयते इति गौरवम् । यद्युच्यते द्विवचनशब्दस्य द्विवचना-वयवार्थे शक्तिः इति कृत्वा द्विवचनावयवः एकारः इत्यनेन दोषपरिहारसम्भवेनापि 'खट्वे इति' 'माले इति' । इत्यत्र एकारान्तत्वाभावात् दोषः स्यात् ।
2. ईकारान्त-ऊकारान्त-एकारान्त-रूपं यद्विवचनं तस्य प्रगृह्यसंज्ञा स्यात् इति पक्षे तु एकाकिनः ईकारस्य ऊकारस्य एकारस्य च द्विवचनस्य प्रगृह्यसंज्ञा कर्त्तव्या इति वचनं कर्त्तव्यमिति गौरवम् । 'खट्वे इति', 'माले इति' इत्यत्र एकाकिनः एकारः

एव द्विवचनम् तथा च एकारान्तद्विवचनाभावात् अस्य प्रगृह्यसंज्ञा वक्तव्या । अस्य निराकरणं तु भाष्ये ''आद्यन्तवदेकस्मिन्'' इति सूत्रेण एकस्मिन् कार्ये कर्त्तव्ये आद्यन्तवद्भावं विधीय खट्वे माले इत्यत्रकारस्य एकारान्तद्विवचनं मत्वा प्रगृह्यसंज्ञा अपि स्वतः प्राप्नोति, तदर्थं वचनस्यावश्यकता नास्ति इति दोषाभावः ।

3. ईकारान्त-ऊकारान्त-एकारान्त-रूपं यद्विवचनान्तं तस्य प्रगृह्यसंज्ञा स्यादिति स्वीकारे कुमार्य्यगारं वध्वगारमित्यत्र द्विवचनप्रत्ययस्य लुकि प्रगृह्यसंज्ञायाः प्रतिषेधः कर्त्तव्यः इति दोषः । अत्र कुमार्योः अगारम् इत्यत्र कुमारी इति ईदन्तस्य प्रत्ययलक्षणेन द्विवचनान्तत्वात् प्रगृह्यसंज्ञा प्राप्नोति, तस्मात् प्रकृतिभावात् यण्सन्धिः न स्यात् तदर्थं प्रगृह्यसंज्ञायाः प्रतिषेधो वक्तव्यः । यद्युच्यते 'ईदूतौ च सप्तम्यर्थे' इत्यस्मिन् सूत्रे अर्थग्रहणं प्रत्ययलक्षणस्य प्रतिषेधे ज्ञापकमिति, तदपि गौरवमेव ।
4. ईकारान्त-ऊकारान्त-एकारान्तरूपं यद्विवचनं तदन्तं यत् समुदायरूपं तस्य प्रगृह्यसंज्ञा स्यादिति स्वीकारेऽपि 'अशुक्ले वस्त्रे शुक्ले सम्पद्येताम्-शुक्ल्यास्ताम् वस्त्रे' इत्यत्र अभूततद्भावार्थे च्विप्रत्ययः तथा च शुक्ली+आस्ताम् इत्यवस्थायां 'जसः शी' इत्यनेन विहितस्य ईकारस्य लुकि प्रत्ययलक्षणेनात्र ईकारान्ताद्विवचनं प्राप्नोति । तत्समुदायस्य विशेषणीभूय तदन्तविधिना ईदाद्यन्तं यद्विवचनं तदन्तशब्दरूपम् इत्यस्य सत्वात् प्रगृह्यसंज्ञा प्राप्नोति तेन प्रकृतिभावे सति यण् प्राप्तिः न स्यादिति दुष्टः पक्षोऽयम् ।

अत एव भाष्ये द्वितीपक्षः एव सिद्धान्तत्वेन स्वीकृतः - ईदूदेदित्यनेन ईकारान्त-ऊकारान्त-एकारान्तं यद्विवचनं तस्य प्रगृह्यसंज्ञा स्यात् इति ।

**उपसंहारः :**

प्रगृह्यसंज्ञायाः इदमादिमं सूत्रं वर्त्तते । सूत्रेऽस्मिन् ईदूदेद् इत्यत्र समासस्तु ईच्च ऊच्च एच्चेति समाहारद्वन्द्वः । तथा च ईदूदेद् इति द्विवचनविशेषणत्वात् 'येन विधिस्तदन्तस्य' इत्यनेन तदन्तविधिः ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञकं स्यादित्यर्थो लभ्यते । अत्र द्विवचनमित्यस्यापि तदन्तविधिस्तु न -'संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति' इति परिभाषया प्रगृह्यस्यसंज्ञाविधित्वात् द्विवचनस्य प्रत्ययत्वात् च न तदन्तविधिः । अस्य सूत्रस्योदाहरणानि तु-हरी एतौ, विष्णू इमौ, गङ्गे अम् इत्यादि । ईदूदेदन्तमिति तदन्तविधेः प्रयोजनं तु 'पचेते इमौ', अत्र तदन्तविध्यभावे ईदूदेदात्मकं द्विवचनं प्रगृह्यमिति अर्थे सति पचेते इत्यत्र इते इति द्विवचनरूपत्वाभावात् प्रगृह्यत्वं न स्यात् । सूत्रेऽस्मिन् तपरकरणप्रयोजनं प्रदर्श्य भाष्यकारेण

यथोद्देश्यपक्षे प्लुतानामसिद्धत्वात् तत्कालेनैव ग्रहणात् तेषामपि प्रगृह्यसंज्ञा कृता । एवञ्च सूत्रे ईदूदेद् इत्यस्य सम्भाविताः चत्वारोऽर्थाः प्रदर्श्य, तत्र पक्षत्रयस्य दुष्टत्वं प्रतिपाद्य, द्वितीय एव पक्षः ईदाद्यन्तं यत् द्विवचनमिति सिद्धान्तत्वेन स्वीकृतः ।

**आचार्यद्वितीयवर्षम्**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैयासंस्कृतविद्यापीठम्**
**विद्याविहारः, मुम्बई ।**

★★★

# ‘ष्णान्ता षट्’ इति सूत्रभाष्यविमर्शः

✍श्रीश्यामकिशोरपाण्डेयः

महर्षिपाणिनिना शब्दसाधुत्वबोधनाय अष्टाध्याय्यां सूत्राणि विरचितानि । तत्र संज्ञासूत्रमिति सूत्रप्रकारेषु अन्यतममं वर्त्तते तेषु सूत्रेषु ‘ष्णान्ता षट्’ इति सूत्रमिदम् प्रथमाध्यायस्य प्रथमपादे चतुर्विंशतितमम् । अस्य व्याख्यानं भाष्यकारेण पञ्चमाह्निके कृतम् । सूत्रेऽस्मिन् भाष्यकता बहवः अंशाः विवेचिताः -

1. षट्संज्ञायामुपदेशग्रहणनिराकरणम् ।
2. बह्वर्थकः एकशब्दः ।
3. प्रियाष्टौ इत्यादिशब्दानाम् असाधुत्वप्रतिपादनम् ।

**१. षट्संज्ञायामुपदेशग्रहणनिराकरणम् -**

षट्संज्ञाविधायकसूत्रे उपदेशग्रहणं शतानि सहस्राणि इत्यत्र नुमर्थम् । तथा च अष्टानाम् इत्यत्र नुडर्थमुपदेशग्रहणं कर्तव्यम् अर्थात् शत् + जस इत्यत्र जसः स्थाने शी आदेशे नुमि दीर्घे च शतानि इति सिद्ध्यति । ष्णान्ता षट् इति प्रकृतसूत्रेण शतान् इत्यवस्थायां नकारान्तत्वात् षट्संज्ञा प्राप्नोति । अत्र उपदेशग्रहणेन उपदेशकाले शतशब्दस्य नकारान्तत्वाभावेन षट्संज्ञानिषधः, तेन ‘षड्भ्यो लुक्’ इत्यनेन सूत्रेण लुगापत्तिदोषो न स्यात् । एवमेव अष्टन् + आम् इत्यत्रापि ‘अष्टन् आ विभक्तौ’ इत्यनेन अष्टनशब्दस्य नकारस्य आकारान्तत्वात् षट्संज्ञाभावः ‘षट्चतुभ्यश्च’ इत्यनेन सूत्रेण नुडागमाभावे अष्टानामिति रूपस्य असिद्धिः स्यात् इति दोषः आपतति । यदि सूत्रेस्मिन् उपदेशगहणं क्रियते चेत् उपदेशकाले अष्टन्शब्दस्य नकारान्तत्वात् षट्संज्ञा इति दोषाभावः । एतेषां दोषानां निवारणं भाष्ये महर्षिपतञ्जलिः एवं चकार आदौ ‘शतानि’ इत्यत्र प्राप्तदोषस्य निराकरणम् तु ‘सन्निपातलक्षणं विधिरनिमित्तं तद्विघातस्य’ इति परिभाषया कृतम् सन्निपातः - द्वयोः सम्बन्धः तन्निमित्तौ विधिः तम् सन्निपातेन यो विहन्ति तस्यानिमित्तम् इत्यर्थकया षट्संज्ञा निषेधः क्रियते । अत्र ‘शत + इ’ इत्यत्र सर्वनामस्थानसञ्ज्ञकजसः ‘नपंसकस्य झलचः’ इत्यनेन सूत्रेण नुमागमो विधीयते तेन शतशब्दस्य नकारान्तत्वात् षट्संज्ञायाम् ‘षड्भ्यो लुक्’ इत्यनेन जसः लुको निमित्तं न भवति इति शतानि इत्यत्र उपदेशाभावेऽपि रूपसिद्धिः जायते तस्मात् उपदेशग्रहणस्य आवश्यकता नास्ति । एवञ्च अष्टानाम् इत्यत्र ‘अष्टनो दीर्घात्’ इति सूत्रेऽस्मिन् दीर्घग्रहणम् आकारान्त-अष्टन्शब्दस्य षट्संज्ञायाः

ज्ञापकम् । अष्टभिः अष्टाभिः इतिरूपद्वयमपि तृतीयायाः बहुवचने भिसि वर्त्तते । अत्र आत्वे सति अन्तोदात्तत्वम् आत्वाभावे च मध्योदात्तत्वम् इति सिद्धान्तो वर्त्तते । अष्टसु इत्यत्र 'झल्युपोत्तमम्' इत्यनेन सूत्रेण उदात्तः स्वरः प्राप्नाति तम् बाधितुम् 'अष्टनो दीर्घात्' इति सूत्रमिदम् प्रारभ्यते । दीर्घान्त-अष्टन्शब्दपरे असर्वनामस्थानविभक्तेः उदातत्वं विधीयते । यदि 'अष्टन आ विभक्तौ' इत्यनेन आत्वास्थायां प्रकृतसूत्रेण षट्संज्ञाभावे आत्वपक्षे 'अष्टनो दीर्घात्' इत्यस्य सावकाशेन, आत्वाभावपक्षे तु 'झल्युपात्तमम्' इत्यनेन बाधः स्वयं सिद्धः, तदर्थं दीर्घग्रहणं व्यर्थं स्यात् । दीर्घग्रहणं व्यर्थीभूय आकारान्ताष्टन्शब्दस्य षट्संज्ञायाम् ज्ञापकं भवति । अत एव षटसंज्ञा सूत्रे उपदेशग्रहणस्य अष्टानामिति साधायितुम् आवश्यकता नास्ति ।

**२. बहवर्थकः एकशब्दः -**

उपदेशग्रहणस्याभावज्ञापने महाभाष्ये आकारान्तस्य संख्यावाचकस्यापि षट्संज्ञा 'ष्णान्ता षट्' इत्यस्मिन् सूत्रे आकारप्रश्लेषे प्राप्नोति इति भाष्ये प्रदर्शितः । तथा च 'सधमादो द्युम्न एकास्ताः' इत्यस्मिन् मन्त्र एका इत्यत्रापि आकारान्तत्वात् संख्यावाचकत्वात् च प्रकृतसूत्रेण षट्संज्ञायाम् 'षड्भ्योलुक' इत्यनेन विभक्तेर्लुक् प्राप्नोति इति दोषः आपद्यते । अस्य दोषस्य निराकरणं भाष्ये एकशब्दः बहवर्थकः, प्रकृतसूत्रेण संख्यावाचकैकशब्दस्यैव षट्संज्ञा प्राप्नोति । एकशब्दस्तु संख्यावाची यथा एकः, द्वौ बहवः इत्यत्र, अपरः असहायवाची यथा एकाग्नयः एतानि, एकाकिभिः क्षुद्रकैर्जितमित्यत्र एकशब्दस्य असहायार्थः एक शब्दः । तथैव 'सधमादो द्युम्न एकास्ताः' इत्यत्रापि एकशब्दः अन्यवाचक एव तेन संख्यावाचकत्वाभावेन षट्संज्ञा न प्राप्नोति ।

**प्रियाष्टौ इत्यादिशब्दानाम् असाधुत्वप्रतिपादनम्**

प्रकृतसूत्रे उपदेशग्रहणखण्डनकाले महाभाष्ये अपरः पक्षः प्रदर्शितः । स च सप्तमाध्याये योगविभागः अर्थात् 'अष्टन आ विभक्तौ' इति सूत्रानन्तरं 'रायः' इति योगः, तदनन्तरं 'हलि' इति योगविभागः क्रियते तथा च रैशब्दस्य विभक्तिपरे अष्टनशब्दस्य विभक्तिपरे आत्वमिति आदिमसूत्रद्वयस्यार्थः। एवञ्च 'हलि' इति योग विभागः सूत्रद्वयेन सम्बद्धः, तेन उभयत्रापि हलि विभक्तौ परे एव आत्वं विधीयते । किञ्च 'अष्टन् + आम्' इत्यवस्थायां 'ष्णान्ता षट्' इत्यनेन षट्संज्ञायाम् 'षट्चतुर्भ्यश्च' इत्यनेन नुडागमे 'अष्टन + न् + आम्' इत्यवस्थायां हल्विभक्ति-सत्वात् आत्वं विधाय अष्टानामिति रूपं सिद्धयति । अत्र भाष्ये प्रियाष्टौ प्रियाष्टाः इत्यत्र दोषः प्रदर्शितः 'प्रियाः अष्टौ ययोः इति प्रियाष्टौ' अत्र प्रियाष्टन् औ इति जाते औ इति हलादिविभक्त्याभावे आत्वं न स्यात् तन नान्तोपधायाः 'सर्वनामस्थाने चासम्बुद्धौ' अनेन सूत्रेण

दीर्घे सति राजानौ इतिवत् प्रियाष्टानौ इति रूपं सिद्ध्यति । अस्य समाधानं तु भाष्ये यथा लक्षणं प्रयुक्ते इत्युक्त्वा कृतम् अर्थात् अप्रयुक्तशब्देषु यथा लक्षणं कार्यं क्रियते तेन आत्वाभावे प्रियाष्टानौ इत्येव रूपं साधुः।

**उपसंहारः -**

षट्संज्ञायाः प्रथमं सूत्रं 'ष्णान्ता षट्' इति वर्त्तते । अत्र ष्णान्ता इति पदस्य समासस्तु षश्च नश्च इति ष्णौ, तौ अन्ते यस्याः सा ष्णान्ता इति द्वन्द्वगर्भबहुव्रीहिसमासः । तथा च ष्णान्ता इति स्त्रोलिङ्गनिर्देशात् पूर्वसूत्रदनुवृत्तसंख्यैव ष्णान्ता इत्यनेन विशेषणेन विशिष्यते । एवञ्च वृत्तिस्तु षकारान्ता नकारान्ता च या संख्या सा षट्सञ्ज्ञिका भवति इति । यदि सूत्रे स्त्रीलिङ्गनिर्देशा न क्रियते तदा सर्वं ष्णान्तं शब्दरूपं षट्संज्ञं स्यादिति सति राजानः विप्रुषट् इत्यत्रपि 'षड्भ्यो लुक्' इत्यनेन लुक् स्यादिति दोषवारणाय स्त्रीलिङ्गनिर्देशः सूत्रे कृतः । सूत्रेऽस्मिन् उपदेशगहणाभावे ये दोषाः जायन्ते ते सन्निपातपरिभाषया ज्ञापकत्वेन वा निवार्य्य भाष्यकारेण उपदेशग्रहणस्य सूत्रे निष्फलत्वं प्रदर्शितम् । तथा च प्रियाष्टौ इत्यादिशब्दानामसाधुत्वं प्रदर्श्य यथा लक्षणमप्रयुक्ते इति वचने ये शब्दाः अप्रयुक्ताः ते यथालक्षणमेव वियुज्यन्ते इति प्रतिपाद्य प्रियाष्टानौ इत्यादोनामेव साधुत्वं प्रदर्शितम् ।

**शास्त्रितृतीयवर्षम्**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैया संस्कृतविद्यापीठम्**
**विद्याविहारः, मुम्बई - ७७**

★★★

# 'बहुगणवतुडति संख्या' इति सूत्रभाष्यविमर्शः

✍श्रीचन्दमापौड्यालः

संज्ञासूत्राणि आधुनिकशक्तिग्राहकानि भवन्ति । अत्र संख्यासंज्ञासूत्रेषु :बहुगणवतुडति संख्या'[1] इति अन्यतमं सूत्रं वर्त्तते । पञ्चमाह्निके प्रकृतसूत्रस्य व्याख्यानावसरे भगवत्पतञ्जलिना इमानि तत्त्वानि विवेचितानि ।

1. 'उभयगतिरिह भवती'ति परिभाषामण्डनम् ।
2. प्रकृतसूत्रखण्डनम्, अध्यार्धादीनां वाचिकी संख्यासञ्ज्ञा ।

एतेषां क्रमशः विवेचनं क्रियते । तत्रादौ -

**१. 'उभयगतिरिह भवती'ति परिभाषामण्डनम्** -

भाष्येऽस्मिन् प्रकृतसूत्रे संख्याग्रहणं संख्यासम्प्रत्ययार्थमिति पूर्वपक्षिणा स्वीक्रियते । प्रकृतसूत्रे संख्याशब्दस्य ग्रहणेन बहुगणवतुप्प्रत्ययान्त-डतिप्रत्ययान्तसंख्यावाचिनां च संख्यासंज्ञा भवति । तेन एकद्वि-इत्यादिसंख्यानामपि संख्यासंज्ञया शास्त्रेऽस्मिन् ग्रहणं कर्तुं शक्यते । यतो हि '**कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः ।**'[2] इति परिभाषया कृत्रिमाणां संख्यासंज्ञकानामेव ग्रहणं न तु प्रसिद्धानाम् एकद्वीत्यादिसंख्यानाम् । यथा लोके गोपालकमानय, कटजकम् आनय इत्युक्ते सति गोपालसंज्ञकम्, कटजकसंज्ञकमेव आनयति न तु गवां स्वामिनम् । अस्याः परिभाषयाः खण्डने 'उभयगतिरिह भवतीति' परिभाषा पतञ्जलिना उपस्थापिता । 'उभयगतिरिह भवति' इत्यत्र इह अर्थात् व्याकरणशास्त्रे उभय इत्युक्ते कृत्रिमे अकृत्रिमे च गतिः ज्ञानं ज्ञायते । एषा उभयावगतिस्तु व्याख्यानाधारीकृत्यैव जायते । अस्याः ज्ञापकं तु '**संख्यायाः अतिशदन्तायाः कन्**'[3] इत्यस्मिन् सूत्रे अत्यन्तशदन्तयोः प्रकृतसंख्यासंज्ञकसूत्रे अभावात् अकृत्रिमानां सिद्धानां संख्यानां ग्रहणं क्रियते तथा च अतिशदन्तायाः इति निषेधं व्यर्थीभूय परिभाषामिमां ज्ञापयति । किञ्च प्रकरणादीनां लोके कृत्रिमाकृत्रिमयोः कार्यज्ञानं क्रियते । तथैव व्याकरणशास्त्रेऽपि व्याख्यानाधारेणैव कृत्रिमाकृत्रिमाः निर्धार्यन्ते यथा 'कर्तुरीप्सिततमं कर्म'[4] इत्यनेन कर्म इति कृत्रिमसंज्ञा विधीयते । तथा च 'कर्मणि द्वितीया'[5] इति सूत्रे कृत्रिमसंज्ञाकानामेव ग्रहणम् 'कर्त्तरि कर्मव्यतिहारे'[6] इत्यस्मिन् सूत्रे तु कर्म इत्यनेन अकृत्रिमक्रियां गृह्यते । तथैव 'साधकतमं करणम्' इत्यनेन कृत्रिमकरणसंज्ञा विधीयते, एवञ्च 'कर्तृकरणयोस्तृतीया'[7] इत्यत्र कृत्रिमकरण- संज्ञकः

'शब्दवैरकलाभ्रकण्वमेघेभ्यः करणे'[8] इत्यत्र तु अकृत्रिमकरणार्थकः गृह्यते । एवमेव 'आधारोधिकरणम्'[9] इत्यनेन कृत्रिमाधिकरणसंज्ञा विधीयते । 'सप्तम्यधिकरणे च'[10] इत्यस्मिन् कृत्रिमाधिकरणं 'विप्रतिषिद्धं चाधिकरणवाचि' इत्यत्र अकृत्रिमद्रव्यग्रहणं अधिकरणपदेन क्रियते । तस्मात् भाष्यव्याख्यानमाधारिकृत्यैव कृत्रिमाकृत्रिमयोः कार्यज्ञानं क्रियते ।

**२. प्रकृतसूत्रखण्डनम्**

प्रकृतसूत्रस्य भाष्ये एकादिपदानां संख्यासंज्ञार्थं संख्यापदाभावेऽपि संख्यासंज्ञाकरणाय एषः पक्षः उद्धृतः - अस्य सूत्रस्य अतिदेशसूत्रत्वमिति अर्थात् बहुगणवत्वन्तडत्यन्तशब्दाः संख्यावन्तः भवन्ति । अर्थात् संख्यायाः इव एतेषामपि कार्यं भवति । सूत्रेऽस्मिन् वतिनिर्देशाभावेऽपि अतिदेशसूत्रत्वन्तु 'ह्यन्तरेण वतिमतिदेशो गम्यते' इति भाष्योक्तरीत्या भवति । यथा 'एष ब्रह्मदत्तः' इति अब्रह्मदत्तं ब्रह्मदत्तं इत्युक्ते ब्रह्मदत्तवत् अयमिति जानीमः । एवं शास्त्रेऽस्मिन् असंख्यां संख्या इत्युक्ते सति संख्यावत् कार्यं क्रियते । अथवा पूर्वोक्तानुसारेण 'संख्यायाः अतिशदन्तायाः कन्' इत्यत्र अतिशदन्तायाः इति निषेधार्थकायाः पदेनैव ज्ञापनं भवति यत् एकादिसंख्यानामपि प्रसिद्धसंख्यासंज्ञा शास्त्रे स्वीक्रियते इति ।

न तु 'ति' इत्यनेन डतिप्रत्ययान्तस्य ग्रहणं भवति 'अर्थवत् ग्रहणेनानर्थकस्य' इति परिभाषया । अथवा लघ्वर्थं हि संज्ञाकरणं क्रियते अत्र संख्या इति महत्याः संज्ञाया करणे एतदेव प्रयोजनं यत् एषा अन्वर्थसंज्ञा अर्थात् 'संख्यायते अनया इति संख्या' तेन एकादिकयाऽपि संख्यायते अत एव तेषामपि संख्या इति संज्ञाग्रहणं भवति । यदि उच्यते उत्तरसूत्रे 'ष्णान्ता षट्'[11] इत्यत्र संख्याग्रहणमावश्यकं तदर्थं प्रकृतसूत्रे संख्याग्रहणेन तत्रापि अनुवृत्तिः स्यात् । 'ष्णान्ता षट्' इत्यनेन षकारान्ताः नकारान्ताः ये संख्यावाचिनः तेषां संख्यासंज्ञा विधीयते । प्रकृतसूत्रे तु संख्या इति संज्ञाबोधकः उत्तरसूत्रे संख्या इति तु विशेष्यतया अन्वयं प्राप्नोति । किञ्च अन्यार्थं प्रयुक्तं पदं अनुवृत्त्या अन्यार्थे न प्रयुज्यते । यथा 'नहि गोधा सर्पन्ती इति सर्पणादहिर्भवतीति' लौकिकन्यायेन प्रकृतार्थं न त्यजते इति चेत् तन्न । द्रव्यादिविषये तु न्यायोऽयं उचितः किन्तु शब्दविषये तु येन विशेषेण अभिसम्बध्यते तस्य विशेषणमपि भवति । अथवा ष्णान्ता इति स्त्रीलिङ्गनिर्देशात् संख्यायाः अध्याहारः क्रियते ।

अध्यर्धशब्दस्य सूत्रेऽस्मिन् ग्रहणमावश्यकं - समासे कन् प्रत्ययार्थम् । तथा च 'अध्यर्धशूर्पकम्', 'अध्यर्धकम्' इति रूपाणि भवन्ति । अधिकग्रहणमपि सूत्रे द्विगुसमास तन्निमित्तकलुगुत्तरपदवृद्ध्यर्थं करणीयम् । अधिकग्रहणेन 'संख्यायाऽव्यासन्नादूराधिकसंख्याः संख्येये'[12] इति सूत्रे अधिकशब्दस्य संख्याशब्देनैव ग्रहणं जायते इति लाघवमपि भवति । एतेषु

संख्या सम्बन्धिकार्यं तु ज्ञपकबलादेव सिध्यति । अत्र ज्ञापकं 'वतेरिड् वा'[19] इति सूत्रम् । अनेन सूत्रेण कन्प्रत्ययस्य वत्वन्तस्य वैकल्पिक इड् विधीयते । तथा च वतुप्रत्ययान्तस्य संख्यासंज्ञाभावे 'संख्यायाः अतिशदन्तायाः कन्'[14] इति सूत्रेण कन् प्रत्ययोऽपि न स्यात् तेन वत्वन्ताद्विहितस्य कन्प्रत्ययस्य इडागमोऽपि न प्राप्नोति इति सूत्रमिदं व्यर्थीभूय ज्ञापकं भवति वत्वन्तस्यापि संख्यासंज्ञा भवतीति । किञ्च वतु-इत्यनेन वत्वन्तमात्रस्यैव संख्यसंज्ञा न जायते । अपि तु वतु-पठितप्रकरणस्य ज्ञापनम् । वतुपठितप्रकरणन्तु 'तस्यपूरणे डट्'[15] इत्यनेन संख्यावाचकत्वात् पूरणार्थे डट् प्रत्यये विधीयते । तस्मात् सूत्रात् डटः प्रत्ययात् परे 'षट् कतिकतिपयचतुरां थुक्'[16] इत्यनेन कत्यादिशब्देभ्यः थुगागमः 'बहुगुणसङ्घस्य तिथुक्'[17] सूत्रेण बह्वादिशब्देभ्यः तिथुगागमः तथैव 'वतोरिथुक्' इति सूत्रेण वत्वन्तात् इथुगागमः विधीयते तेन डट् इत्यस्य संख्यासंज्ञया एव एतेषां ग्रहणं भवति तस्मात् पृथकतया न्यासस्य आवश्यकता नास्ति । एवञ्च भाष्यकारस्य वचनेनैव अर्ध्य-अर्ध-अधिकाशब्दानामपि वाचिकी संख्या संज्ञा स्वीक्रियते ।

**उपसंहारः**

संख्यासंज्ञाविधायकसूत्रं 'बहुगणवतुडति संख्येति'। अत्र बहुश्च गणश्च वतुश्च डतिश्चेति समाहारद्वन्द्वसमासः । अर्थस्तु - बहुगणशब्दौ वतुडतिप्रत्ययान्ता च शब्दौ संख्यासंज्ञकाः भवन्तीति। एतेषामुदाहरणानि - बहुकत्वः, बहुधा, बहुकः, बहुशः, । तथैव गणकत्वः, गणधा, गणकः, गणशः। वतुप्रत्ययान्तस्य तावत्कृत्वः, तावद्धा, तावच्छः । डतिप्रत्ययान्तस्य तु कतिकृत्वः, कतिधा, कतिकः, कतिशः इति । अत्र वतुडतिप्रत्ययान्तमित्यत्र तदन्तग्रहणस्य 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति'[18] परिभाषया न निषेधः, एतयोः केवलयोः प्रयोगानार्हत्वात् । वतु इत्यनेन 'यत्तदेतेभ्यः परिमाणे वतुप्'[19] इति विहितवतुप्प्रत्ययः गृह्यते । एवञ्च वतुना तद्धितप्रत्ययेन साहचार्यात् 'किमः संख्यापरिमाणे डति च'[20] इति डति-प्रत्ययः एव गृह्यते । एवञ्च प्रकृतसूत्रे संख्या इति ग्रहणाभावेऽपि 'संख्यायाः अतिशदन्तायाः कन्' इत्यत्र अतिशदन्तायाः इति पदेनैव एकादिपदानामपि संख्यासंज्ञा सिद्ध्यति। किञ्च प्रकृतसूत्रमन्तरेणापि ज्ञापकसिद्धत्वात् अन्वर्थसंज्ञा इति मत्वा वा संख्यासंज्ञानिमित्तकार्याणि जायन्ते इति प्रकृतसूत्रस्य खण्डनमपि भाष्यकारेण कृतम्।

**सन्दर्भाः**


1. अष्टाध्याय्यां सूत्रसंख्या 1.1.23 ।
2. परिभाषेन्दुशेखरे ।
3. अष्टाध्याय्यां सूत्रसंख्या 5.1.22 ।
4. अष्टाध्याय्यां सूत्रसंख्या 1.4.49 ।

5. अष्टाध्याय्यां सूत्रसंख्या 2.3.2 ।
6. अष्टाध्याय्यां सूत्रसंख्या 1.3.14 ।
7. अष्टाध्याय्यां सूत्रसंख्या 2.3.18 ।
8. अष्टाध्याय्यां सूत्रसंख्या 3.1.17 ।
9. अष्टाध्याय्यां सूत्रसंख्या 1.4.45 ।
10. अष्टाध्याय्यां सूत्रसंख्या 2.3.36 ।
11. अष्टाध्याय्यां सूत्रसंख्या 1.1.24 ।
12. अष्टाध्याय्यां सूत्रसंख्या 2.2.25 ।
13. अष्टाध्याय्यां सूत्रसंख्या 5.1.23 ।
14. अष्टाध्याय्यां सूत्रसंख्या 5.1.22 ।
15. अष्टाध्याय्यां सूत्रसंख्या 5.2.48 ।
16. अष्टाध्याय्यां सूत्रसंख्या 5.2.51 ।
17. अष्टाध्याय्यां सूत्रसंख्या 5.2.52 ।
18. परिभाषेन्दुशेखरे ।
19. अष्टाध्याय्यां सूत्रसंख्या 5.2.69 ।
20. अष्टाध्याय्यां सूत्रसंख्या 5.2.41 ।

**आचार्यद्वितीयवर्षम् ( व्याकरणम् )**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैया संस्कृतविद्यापीठम्**
**विद्याविहारः, मुम्बई - ७७**

★★★

# 'निपात एकाजनाङ्' इति सूत्रभाष्यविमर्शः

✍श्रीउमेशत्रिवेदी

'निपात एकाजनाङिति' अष्टाध्याय्याः प्रथमपादे प्रगृह्यसंज्ञाविधायकं सूत्रं वर्त्तते । सूत्रमिदं भगवत्पतञ्जलिना महाभाष्यस्य पञ्चमाह्निके व्याख्यातम् । सूत्रेऽस्मिन् नैके अंशाः व्याख्याताः ते-

1. सूत्रघटकपदानां पदकृत्यप्रदर्शनम् ।
2. वर्णग्रहणे जातिग्रहणमिति परिभाषाज्ञापनम् ।
3. आङित्यस्य ङित्वाङित्वविचारः ।

**१. सूत्रघटकपदानां पदकृत्यप्रदर्शनम्** -

सूत्रेऽस्मिन् निपात इति ग्रहणस्य भाष्ये प्रयोजनं चकाराऽत्र जहाराऽत्र इति प्रदर्शितम् । अत्र 'चकार अत्र' इत्यत्र अ इत्यस्य एकाच्त्वात् 'एकाजनाङ्' इत्यनेन प्रगृह्यसंज्ञायां प्रकृतिभावस्य प्रसक्तिः स्यात् इति दोषवारणाय प्रकृते निपातग्रहणं क्रियते । तेन अ इत्यस्य निपातत्वाभावात् न प्रगृह्यसंज्ञेऽति, सवर्णदीर्घेण चकारात्र जहारात्र इति रूपं सिद्ध्यति । प्रकृतसूत्रे एकाजित्यत्र कर्मधारयसमासः (एकश्चासौ अच्चेति एकाच्) । तेन प्रेदं ब्रह्मा, प्रेदं क्षेत्रं इत्यत्र प्र इति निपातस्तु अज्झल्संयोगात् अज्रूपनिपातत्वाभावात् प्रकृतसूत्रेण प्रगृह्यसंज्ञाभावः, तेन गुणो विधीयते। सूत्रे अज्ग्रहणेन प्रकृते अज्झलानाम् ग्रहणं न स्यात् अपितु अज्रूपमिपातस्यैव ग्रहणम् इति बोधो जायते । तथा चात्र निपातेति विशेष्यः अजिति विशेषणम् । विशेषणत्वात् 'येन विधिस्तदन्तस्य' इत्यनेन तदन्तविधिना अजन्तो यो निपातः इत्यर्थे सति प्रपरेत्यादोनां, 'आद्यन्तवदेकस्मिन्' इति सूत्रसाहाय्येन आ-उ-इत्यादिनामपि प्रगृह्यसंज्ञा प्राप्नोतीति अज्ग्रहणस्य प्रयोजनं नास्ति । एवं च अनाङ् इत्यनेन आचार्यप्रवृतिः ज्ञापयति यत् सूत्रे 'येनविधिस्तदनतस्य' इत्यनेन तदन्तग्रहणं नास्ति इति यतो हि आङित्यस्य एकाच्त्वात् अजन्तत्वाभावात् स्वतः प्रगृह्यसंज्ञा न प्राप्नोति तन्निषेधार्थम् नाङ्ग्रहणं व्यर्थं स्यात् । तद्व्यर्थं भूत्वा ज्ञापयति सूत्रेऽस्मिन् तदन्तविधिर्नास्ति इति तेन अज्रूपीयोनिपातः इत्येव बुध्यते ।

**२. वर्णग्रहणे जातिग्रहणमिति परिभाषाज्ञापनम् -**

प्रकृतसूत्रे अज्ग्रहणेनैव कार्यसिद्धे पुनः एकग्रहणात् ज्ञायते यत् 'वर्णग्रहणे जातिग्रहणमि'ति परिभाषा । अस्याः अर्थस्तु वर्णस्य ग्रहणेन तद्वर्णजातिः वर्णसमुदायश्च उभयोरपि ग्रहणं भवति । अस्याः परिभाषायाः प्रयोजनं तु 'हलन्ताच्च' इति सूत्रे उक्तवार्तिकस्य उपपत्तिः । अत्र वात्तिकं 'दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात् सिद्धम्' अर्थात् इकः समीपे यो हल् तदन्तधातुभ्यः परे झलादिसन् किद्वत् भवति इत्यर्थकेन 'हलन्ताच्च' इति सूत्रेण 'दम्भ सन्' इत्यत्र किद्वत्वाभावः प्राप्नोति । यतः अत्र एकैव हल् नास्ति अपि हलद्वयस्य समूह वर्त्तते प्रकृतसूत्रे एकग्रहणेन शास्त्रेऽस्मिन वर्णग्रहणेन जातिग्रहणामिति परिभाषाज्ञापितत्वात् 'दम्भ + सन्' इत्यत्र हल् - द्वयस्यापिग्रहणात् किद्वत्वेन 'अनिदितां हल उपधायाः क्क्ङिति' इत्यनेन मलोपे सति धिप्सति इति रूपं सिद्धयति । एवं सूत्रे एकग्रहणस्य सार्थक्यं प्रतिपादितम् ।

**आङित्यस्य ङित्वाङित्वविचारः -**

सूत्रे अनाङित्यनेन आङ्भिन्नस्य अज्रूपनिपातस्य प्रगृह्यसंज्ञा विधीयते । तस्मात् -

आ + उदकान्तात् इत्यत्र आङः ङित्वात् प्रगृह्यसंज्ञाभावात् गुणे ओदकान्तात् इति रूपं भवति । 'आ एवं नु मन्यसे', 'आ एवं किल तत्' इत्यादिषु आङः ङित्वाभावात् प्रगृह्यसंज्ञायां प्रकृतिभावो विधीयते । सूत्रेऽस्मिन् ङकारानुबन्धविशिष्टाकारस्य ग्रहणात् अनुबन्धरहितस्याकारस्य प्रगृह्यसंज्ञा भवत्येव । ङकारनुबन्धत्व व्यवस्था श्लोकवार्तीके बोधिता ।

**इषदर्थे क्रियायोगे मर्यादाभिविधौ च यः।**
**एतमातं ङितं विद्यात् वाक्यस्मरणयोरङित् ॥**

अनेन ईषदर्थे क्रियावाचकस्ययोगे, मर्यादायाम्, अभिविधौ इत्येतेषु अर्थेषु आकारः ङिद्भवति । तथा च ङित्वात् प्रकृतसूत्रेण प्रगृह्यसंज्ञाभावः । वाक्यार्थे अन्यथार्थत्वे स्मरणे च आकारः अङिद्भवति अङित्वात् प्रकृतसूत्रेण प्रगृह्यसंज्ञा । एतेषां क्रमशः उदाहरणानि -

1. ईषदर्थे -आ + उष्णम् = ओष्णम् ।
2. क्रियावाचकस्य योगे - आ + इतः = एतः ।
3. मर्यादायाः - निर्दिश्यमानं स्थानं विहाय सीमाकथनं क्रियते सा मर्यादा भवति । अस्याः उदाहरणम् - आ + उदकान्तात् = ओदकान्तात् ।
4. अभिविधा - निर्दिश्यमानं स्थानं गृहीत्वा यत्र सीमाकथनम् भवति सा अभिविधिः यथा - आ + उदकान्तात् = ओदकान्तात् ।
5. वाक्यार्थस्य अन्यथार्थत्वे - आ एवं नु मन्यसे ।

6. स्मरणार्थे - आ एवं किल तत् ।

**उपसंहारः -**

निपातानां प्रगृह्यसंज्ञार्थं सूत्रमिदं प्रारब्धम् सूत्रेस्मिन् एकश्चासौ अच्च इति एकाच् कर्मधारयसमासः, न आङ् अनाङ् इति नञ्तत्पुरुषसमासश्च । अस्य वृतिस्तु एकोऽज्निपात आङ्वर्जः प्रगृह्यः स्यात् । सूत्रे निपातग्रहणेन चकारात्र जहारात्र इति रूपं सिध्यति । एकाज्ग्रणेन च वर्णग्रहणेन जातिग्रहणमिति परिभाषा ज्ञायते, तया 'हलन्ताच्च' इति सूत्रस्थवार्त्तिकस्य 'दंभेर्हल्ग्रहणस्य जातिवाचकत्वात् सिद्धम्' इत्यस्योपपत्तिर्भवति । तथा च अचपदग्रहणेन अज्रूपी यो निपातः तस्यैव प्रगृह्यसंज्ञेति तस्मात् 'प्रेदं ब्रह्म' इत्यादिषु गुणः सिध्यति । एवञ्च अनाङ् इत्यस्य प्रयोजनन्तु 'आ एवं नु मन्यसे' इत्यादि, अत्र आ इत्यस्य अङित्वात् प्रगृह्यसंज्ञा भवति तेन सत्यां संज्ञायां प्रकृतिभावो विधीयते । 'ओदकान्तात्' इत्यत्र आ + उद्कान्तात् इत्यत्र मर्यादाभिविधिस्थले तु ङित्वात् प्रकृतसूत्रेण प्रगृह्यसंज्ञाभावे गुणे रूपमिदम् ।

**आचार्यद्वितीयवर्षम् (व्याकरणम्)**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैया संस्कृतविद्यापीठम्**
**विद्याविहारः, मुम्बई - ७७**

★★★